वनमिति वनस्याहूस्य समीपत्वं तज्जतलक्षणत्वं चानुद्योत्यं तदाह वनस्य समीपमिति
वनसमीपदेशानिष्ठत्वापकत्वानिरूपितत्वाप्यत्वावत्तगमनकर्मीभूतो ग्रामादिरितिबो
धः पत्नेवनस्यानु नचानोः कर्मप्रवचनीयत्वात् द्वितीयापत्तिः वनस्य कर्मप्रवचनी
यप्रयुक्तत्वाभावात् तत्त्वं च कर्मप्रवचनीयसंज्ञकद्योत्यत्वमिति क्रोपसत्संज्ञकद्योत्यसं
बंधाश्रितोर्थस्तद्वाचकत्वं नत्रकौडिन्यन्यायानयकेतेचतरद्वालक्षणत्वं संबंधाश्रित
त्वं वनसमीपस्य स च न तद्योत्यः एवं नाश्रितविषत्रिक इति दोषाभावः तस्मादाहुः अन्ये तु सामीप्य
ताप्यत्वं चानुद्योत्यं वनसामीप्यवान्न तत्ताप्यतावान् ग्रामादिरित्यर्थः द्वितीया तु न शत्रुसत्या
येन नाधाप्तिन्यायेन च लक्षणत्वेनो संबंधनिमित्त षष्ठ्या द्वितीयया बाधे विसामीप्यनिरूपित
संबंधनिमित्तया षष्ठ्यार्थमात्रनिमित्तकत्वेनांतरंगत्वादपवादोपवादाद्यन्यत्रेति न्यायाद्वा द्विती
यायाबाधोपपत्तेः अग्निमभीत्यादौ त्वाभिमुख्ये अग्नेर्न ग्रामाद्योतत्वयः वृक्षादि ग्रामाण्या दि
त्याहुः यत्तु इत्थंभूतादिसाहचर्येण लक्षणमात्रद्योतके संवर्गमपरत्वमिति तन्नअग्निम।

भिरत्यादावसिध्यापत्तेः अनुलेखलाणारत्वस्य सामर्थ्याद्वेतत्तनीयावाधकत्वमिति ग्रंथाः संग
त्यापत्तेश्च यमुनावाराणस्यामोदैर्घ्यैरत्यायामन्वदगतेलक्षणत्वं चानुद्योत्वं अत एव नद्वि
तीयाप्राप्तुत्तप्युक्तेः तात्पर्यं च वाराणस्यायामेः न तु वाराणसी तत्स्याः स्वरूपेण तात्पर्यत्वा
नु अत एव किं प्रागंगायना वाराणसी उतोदगायनेति संदेहे रदं चपुत्सने गंगायालक्षणे
त्वेनुपरं परया अन्यपदार्थप्राधान्येप्ययमव्ययीभावः प्रवृत्तिस्वाभाव्यात् अत एव वाराणे +
स्या सामानाधिकरण्ये अनुगंगं वाराणसीति भाष्ये दर्शितं गंगाया आयामो यस्याः इत्यर्थः
पाठांतरं यस्य दैर्घ्यमिति यदैर्घ्यं सदृशा दैर्घ्यमित्यर्थः तत्र गंगापदस्य तात्पर्यक गंगालक्षकत्वे
न दैर्घ्यसदृशादैर्घ्यसंबाधेनैतत्यान्वयेयानुपपत्त्यर्थे ग्राहकत्वबोधकपदाहारो वा परंपरापि अत्रा
पिलक्षणेति वक्ष्येने इत्यंतं एवं गंगादैर्घ्योपलक्षितदैर्घ्यवती वाराणसीति शाब्दोर्थः गंगा
या अन्वित्यत्र स्वनिष्ठदैर्घ्यं तात्पर्यदैर्घ्यं च पर्यः तस्य भेदसंबंधेन वाराणस्यामन्वयः अयं समा
स उपमानविधया तात्पर्यकत्वे एव भवतीति ध्वनयन्नूफलितार्थमाह गंगासदृशीति उपल दैर्घ्य
क्षितेत्यस्य युक्तेन्यर्थः ध्वनितं चेदं सर्वभाष्यादो निपातगुणकार एवकारार्थेनेनेषां लक्षणं तरेष्वे
वोन तेन परमनिष्ठत्गुरुत्वाद्वितेति भाष्यं एवं चोन्यत्र के प्राक्वेषी त्यादि चिंत्यं अत्र वृत्तं
तरं प्रकाराणां समासरूपमेवग्रहणं तत्त्वाहुः केचित्वव्ययीभावव्यतिरिक्तसमासस्यैव वा
रणं अव्ययीभावस्तु भवत्येव तेनानाति एकुत्त यत्संध्यां वप्रिमायतीगवमित्यादि भट्टिव्या

३९६

प्रा० श्रो

396

ख्यातइत्याहुः आतिष्ठद्गु इति शब्दकादेशायतीगवादिति पाठइत्यन्ये इहशत्रन्तात्रइति प्रथमासामा
नाधिकरण्यान्न प्राप्नोतीति भावः यद्यपि वचन पुरुषइत्यादिवत्सिध्यति तथापि पुनःपाठस्यो
पायांतराद्दूषकत्वाददोषः तिष्ठद्गुइत्यत्र तत्र आदेशमात्रं इत्यादीनि वहद्गु खलेयवं खले
बुसं सप्तम्यलुक् निपातनात् लूनयवं लूयमानयवं पूयमानयवं संह्रियमाणयवं सं
ह्रियमाणबुसं खलेयवादयो ऽन्यपदार्थे वर्तन्ते यः प्रथमांता एवेति स्पष्टं भाष्यकैयटयोः एते
कालप्रह्वाः समभूमि समपदाति संभूमि संपदाति समं भूमि समं पदाति इत्यणां समत्वं भूमे
रित्यर्थः सुविनिर्दुर्भ्यः षमं सुषमं समस्य शोभनत्वादीत्यर्थः आयती समं शत्रादेशाद्
वत्वाभावो निपातनात् आयतीसमा संवत्सरइत्यर्थः एवं पापसमं पुण्यसमं प्राह्णं प्रमृग
प्ररथं प्रदक्षिणे पुनः प्रगतन्त्वमह्न इत्यादि विग्रहः प्रतिगतस्य संगतत्वमित्यर्थे संप्रति विपरी
तमसंप्रति इच्च कर्मव्यतिहारे ऽस्य यमेव द्विदंड्यादिषपीति तस्याप्यव्ययत्वं पारेमध्ये षष्ठ्यावेति
अयंभावः महाविभाषयाप्येकार्थीभावस्य पाक्षिकत्वं बोध्यते वृत्तिश्चैकार्थीभावेन स्येवेति
येनना प्राप्ति न्यायेनाव्ययीभावस्तत्पुरुषं बाधेत षष्ठ्येकदेशिसमासः षष्ठीतत्पुरुषमिति
पाक्षिकतत्पुरुषलाभार्थं पुनर्वा ग्रहणमिति इदमेव च ज्ञापयति महाविभाषा विशेषणी
भूतसमासमपि सत्यैव विकल्पिके नित्यं प्राप्तं इति एकत्वाभावः संतानप्रवृत्तं पावेशारत्याहुः दोमु
नीति पाणिनिकात्यायनोत्रिमुनिभाष्यकृत्तनोच स्यपदार्थे प्राधान्य एवायं समासः

नन्वेवं त्रिमुनि व्याकरणमिति सामानाधिकरण्यमनुपपन्नमित्यत आह विधानद्वारा मन्ति
न्नम्मनोदाहरन्ति एकविंशतीति एकविंशतिभरद्वाजानां वंशः इति विग्रहः ननु भारद्वाजग्रा
त्रादौ योप्यत्रोक्तोलिलुकुप्राप्नोति यञ्जगर्गादित्वाभूतानां गर्गाणां कुलमित्यर्थे गर्गकु
लमित्यादौ इति चेन्न तत्तीया समस्यार्थे रिति सूत्रस्थभाष्यकारप्रयोगादेव लुगभाव इति हरद
त्तादयः नदीभिः नन्विदं आरंभसामर्थ्यात् समानाधिकरणसमासबाधकं यद्वा अत्रत्योध्यप अत्रत्योयपत्रे
त्रेपि एतस्यैवाव्ययीभावत्वेन प्रकृतिभागस्यानव्ययत्वात् समासांतानाम लौकिकवाक्ये समा
सान्पूर्वं प्रवृत्तेः समासांतावेलायां पूर्वभागस्यापि प्रवृत्तायाः समाससंज्ञायाश्च नपदेन विशिष्टा
वयवत्वबोधनात् नदंतेपि आर्नेरित्याहुः अव्ययीभावश्चेत्यत्र लुङ् मुखस्वरोपचारादेरिति परि
गणनात् अदोषः इत्यनेनोच्यते गतोय ... पंतास्तेषां समाहारः इति विकल्पेप्राप्ते नित्यार्थः पाठ इति प्रांचस्त
दयादः इति गणसूत्रे प्रतिपरेति च अव्ययत्वमिति लक्षणेनाभिप्रतीति समासः पाठेन प्रति
विषये प्राक् समासः अन्ताः परमिति अविषये पर इत्यर्थः अक्षि शब्दो वृत्तिविषये इंद्रियमात्र
परः इंद्रियाविषयमनुमानादिगम्यः परोक्ष इत्यर्थः नन्वव्ययाघटितत्वात्कथमत्राव्ययीभाव
इत्यत आह सामर्थ्यादिति परस्यैकारांतस्य शाकृद्रस्य उकारादेशः इत्यर्थः एङः पदांतादिति पूर्वेनं
क्वचिन्न परस्य उकारादेशः इति पाठः नत्र परस्याक्षिशब्दस्यादेरकार इत्यर्थः आनुगुण्यः उपसर्जन
स्याप्यक्षिशब्दस्यात एव निपातनात् प्रतिनिपातनं इति वोध्यं स्वष्टं चेदं सर्वं परोक्षे लिडिति सूत्रे भाष्ये

प्रा॰ श्रो॰

केटयोः कैयटस्तु मयूरव्यंसकादित्वात्समासेऽव्ययीभावित्वाभावेऽपि सामर्थ्यात्समासान्तरे प्राप्ते प्र
वर्त्तते अत एवास्य त्रिलिंगतेत्याह पार्श्वान्तरं तत्त्विति त्यंपरोक्षार्थाः क्रियेत्यत्र ङीनापत्तेः टित्वप्रयुक्तङीपोऽप्र
सिद्धत्वं वा अत्र गणपाठग्रहणेनास्पैवेति पदान्तरमपि नेन नितं भाष्यस्वरसोऽप्येवमेव तत्रेति बोध्यं
अर्धोऽस्य धचीति धत्तापदव्दाति भावः रत्यंतं समासत्वमिति अर्हत्वोऽयोगपमत्वाः पश्चादिति वा विग्रहः
नदीभिः स्वहस्वरूपस्यैव ग्रहणं न संज्ञार्थाः पौर्णमास्या ग्रहायण्योः पृथक्कृत्य ग्रहणात् उपनदीति
रूढभावेन पुंसकत्रस्वः गोस्त्रियोरिति वा ह्रस्वः नदीभिश्चेति सूत्रे दाहरणभूते पंचनदमित्यत्र +
त्वचू प्रत्यये त्वचेति योगविभागसिद्धं गोदावर्योश्च नद्याश्च संख्या या उत्तरे पदे त्यभिप्रेतोऽक्तेर्नित्य +
समासेवेति बोध्यं पूजार्थमिति अन्यतरस्यां ग्रहणस्य प्रकृतत्वादिति भावः ननु सेनकग्रहणेन
दीत्यादेर्व्यवस्थितविभाषात्वबोधनद्वारा काचित्त्वितनयाप्रवृत्तिरित्यर्थे मा चप्रपकं अत एव च
संख्यासंज्ञासूत्रस्थभाष्येन नदीपौर्णमासीति सूत्रे पौर्णमस्यादिग्रहणसामर्थ्यात्तन्नदीसंज्ञक +
स्य ग्रहणं न च नदीभिश्चेति वह्निशेषाणां ग्रहणमपि स्यात् प्राक्प्रवृत्तिर्भुविपाठ्शब्दपाठसामर्थ्या
न्नेत्युक्तं सगच्छते अस्पवैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकत्वात् ज्ञापकत्वासंगतिः स्पष्टैवे
तिचेन्न तस्य सर्वमते पाक्षिकत्वं गिर्यैसेन सेनकमते एवं टस्य ज्ञानान्यमते रूति स्पष्टता प्रयुक्ति।
बोधनेन चरितार्थस्पत स्य तत्राप्रमाणत्वात् तस्मात्प्रयोगानुरोधात् भाष्यप्रामाण्याच्चावङ्ग
टीनामिव नदीत्यादेरुत्त्वसिद्धिरित्याहुः केचित्तु संख्यासंज्ञासूत्रस्थभाष्यप्रामाण्यात्पुंस।

पुरस्तादपवादन्यायेन पूर्वकालैकेत्यस्यैव बाधकं तथा चैकनदीतरस्यत्राव्ययीभावे नपुंस
कह्रस्वत्वापत्तिः एकाऽपूपीवत्समाहारविवक्षायां तु द्विगुत्वेन पुंसकह्रस्वत्वे उपसर्जनह्र।
स्वत्वं वा स्यादित्येकनदीतरो न सिध्यतीत्यत आह समाहारे चेति तत्रैवेत्यर्थः एवं च नदवि।
वक्षायां पूर्वकालेति समासेन त्विद्धिरिति भावः न च तत्रापि गोदावर्याश्च नद्याश्च संख्याया।
उत्तरपदीत्यच्यूद्वेरः एतद्वाच्यप्रामाण्यात्तस्याव्ययीभाव एवेत्यस्यांगीकारात् अत्रेदं बोध्यं
रह संज्ञानदीस्वरूपयोर्ग्रहणं बहुवचननिर्देशात्किं त्वर्थस्य तद्वाचकाश्च सामान्यशब्दा
विशेषशब्दाश्च संकोचे मानाभावात् तेन पंचनदं सप्तगोदावरमित्यादिसिद्धिरित्याहुः अन्य
पदार्थे च संज्ञायामिति नित्यं नदीग्रहणमनुवर्तते तदाह सर्वं तं नदीभिरिति संज्ञेनिवगमा
दिति संज्ञेति कर्मण्यण् तेन संज्ञितो देशादिविशेषस्यानवगमादित्यर्थः अन्यपदार्थानवग
मादिति तु नोक्तं चयस्यत्यादिपदांतरसमभिव्याहारेण तत्प्रतीतेः अत एव बहुव्रीहि
णेति नित्यसमासः तद्धटितमेव च तत्र वाक्यं न केवलं विशेषपदार्थे घटितमिति भावः नि।
समास इति तत्स्वरूपशब्दात्यर्थः नैतावता वाग्रहणसंबंध इति भ्रमितव्यं तत्सादृश्येन समा
नार्थकवाक्याभावेन विग्रहस्यैवासमासघटकीभूतानां पदानां अत एव द्वितीयत्वनी
येति सूत्रेऽन्यतरस्यां ग्रहणेनास्वर्गापवादयोर्महाविभाषया विकल्पविषयेऽपवादाभावेऽ
त्स्वर्गोपस्य इति विशेषार्थेनापिते उन्मत्तगंगमित्युदाहरंते अव्ययीभावेन पुंसकेव बहुव्रीहिर्नभव
न

३५७

पा. रो. १

नीति चोक्तं संगच्छते एवमन्यत्रापि बोध्यं संज्ञायां किं शीघ्रगं गोदेश्याः समासान्ताः अत्र

समासपदं तदन्तं वैयलौकिकविग्रहवाक्यपरं एवमव्ययीभावादिपदान्यपि तदीयावगो

स्त्रियोरित्यत्र भाष्ये कपि कृतस्य ह्रस्वस्य प्रतिषेधो बहुकुमार्यः बहुकुमारीकः न बहुकुमार्यः कपि कृते

अनन्त्यात् ह्रस्वत्वं न भविष्यति इदमिह संप्रधार्यं कप्क्रियतां ह्रस्वत्वमिति परत्वात्कप् स

३५/२ मासस्यामान्यापेक्षत्वात् तदनन्तरं ह्रस्वत्वं अन्तरंगत्वात् कप् ननु चायं कप् समासान्त उच्यते तात्

पर्यान्नात्र कर्त्तव्यं भविष्यतीति न कपीति निषेधस्य न तन्त्रस्येति न्यायोक्ते एरइत्यस्येवेति तदा

शयः नन्विदं द्वित्रिभ्यां पादन्मूर्धस्विति सूत्रस्थभाष्येण विरुध्यते न ह्यत्र हि यदि कृतसमासां

त मूर्धस्विति निर्देशात्साहचर्येण नाद्यत्वात् कृतसमासान्ते प्रवृत्तिः तदा कृते समासान्ते हि मू

र्धत्वादौ स्वरउपसंख्येयः अकृतसमासान्ते ग्रहणेन दोषः समासान्तापेक्षया पूर्वं परत्वा

त्स्वरे कृते टिलोपे उदात्तनिवृत्तिस्वरेण सिद्धे इति युक्तं तस्यायं भावः उच्यते न समासान्तवि

धायके अवयवदात्तत्वे तस्य समासैकदेशत्वेन पश्चात्तदन्तेनापि समासान्तो नुदात्त एवेति तत्रत्या

समासान्तविधायके आद्युदात्तत्वे तस्य समासैकदेशत्वेन लौकिकविग्रहवाक्य एव समासा

न्तप्रवृत्तेः परत्वात्स्वरस्य संगतत्वात् तस्मात्समासप्रवृत्त्युत्तरमेव समासान्ता इति चेत्त्र १

श्रौतत्वे भाष्यविरोधेन तत्र भाष्यस्य प्रौढिवादपरत्वात् प्रकृतसूत्रे समासस्यैव कार्यित्व

मात्रित्याकृतसमासान्तग्रहणेऽपि कृतसमासान्तं हि मूर्धनेनैव सूत्रेऽप्येषसिद्धिसत्त्वाच्च किंचे २६७

वमंतरङ्गनिमित्तत्वस्य भाष्यमसंगतं स्यात् नन्वत्र किं समासस्यांत उदात्तत्वमाहोस्विदुत्तरपदस्याद्युदात्तत्वेर
देशपद्मकारस्यादौ कापि पूर्वस्योपसंख्यानं श्रुतेश्च न च रत्नस्यादौ नन्वत्र भाष्यमित्यनेनोंकारस्योदात्त
नु त्वानापत्तिरिति त्वदीयेदंपद्मकारस्यादौ समासांतत्वेद्वत्वापरत्वादिदमेतन्नन्तभ्यः पद्मम२
रणयोः क्रियागणेनेत्यनेन स्वरेस्याद्युदात्तभावात् यत्तु बहुकुमारीकरत्यादौ पश्चात्समा
सांतेपि पूर्वेनङ्स्वः ग्रकृतव्युह्यपरिभाषयानदयाङ्गेरिति नन्न पश्चात्कथमपि नन्नः पूर्वभाग
स्योपसर्जनस्त्रीप्रत्ययांतत्वान्प्रातिपदिकत्वसत्वेन नदैवेतेः न हि कृत्स्वविधौ समासत्वमपि निमि
त्तकोटौ प्रविष्टं न कपीति निषेधस्तत्र नंतरस्येतित्यायेन केवलस्यैवेति स्पष्टमिति दिक् न
न च पूर्वे समासांतप्रवृत्तौ नन्तानियोगशिष्टत्वाद्युदात्तत्वेदेकवाक्यतापत्रे च पूर्वस्य निघाते कृते
पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्रवृत्तौ उच्चरितत्वं व्यर्थमिति वा
च्यं तत्सामर्थ्यादेव समासांतविधौ स्वाद्युदात्तश्चेत्यस्य संबंधस्य ज्ञापनात् तेन समृद्धिपुरोरा
नेत्यादौ पूर्वपदप्रकृतिस्वरसिद्धिः समृद्धा पूर्वस्येति विग्रहः यद्यपि बहुकुमारीकेत्यत्र
व्यूह्यपरिभाषयाङ्गस्वाभावः पश्चागमेकृतेनरङ्गनप्रत्ययत्वाद्येवं समासांतेकृतेतत्पूर्वभा
गस्य नसमासत्वेप्रातिपदिकत्वादिनप्याप्तिविरोधः पूर्वविन्दुपुरविंदुमित्यादावकारांतस्यां
तोदात्तत्वसिद्धये समासांतस्यादौ समासादि पदानां लक्षणे वाप्तित्यभवावतात्रत्यथा
हि पूर्वसमासे पदत्वात्स्वरेतत्तोञ्जायमानं समासांतउक्तरीत्या उदात्तः स्यात् स्वरविधौ तु न

पा॰ पो
२
397/3

त्परिभाषायाश्च प्रवृत्तिरापन्नादि सूत्रे उक्ता उ चाप्रत्ययमथ्यैकं सत्तिसार्थकं भवतीति दिक्
अंतं न शारदशब्दस्य भावयववाचीन समीपवाची पूर्वत्र्यपरत्वे नैव समासात् टजिति न्यासे सिद्धान्त
कृद्ग्रहणे च पर्यायपत्तेः स च समुदायावयवः अत एव शारदमित्यत्र नाव्ययीभावादित्यमसि
ध्यति अव्ययानां भमात्रे इति टिलोपाभावश्च पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वा
त् केचित्तु समासान्ताः इत्यावर्त्तते तत्रैकस्योक्तोऽर्थः अपरस्य समासार्थे विग्रहवाक्यस्या
न्तरपदलक्षणयोत्तरपदावयवकाः इत्यर्थः अत्र पक्षेपि अवयवावयवस्य समुदायावय
वत्वात्समासावयवत्वमस्त्येव तयोश्च लक्षणानुरोधेन व्यवस्थानं तत्राद्ये अंतं इति सूत्रस्थं भा
ष्यमाने अकारान्तोत्तरपदो द्विगुरिति वार्त्तिके उत्तरपदग्रहणं न हि समासान्ते प्रवृत्त्यभावा
र्थं अत एव द्विगुश्चेति सूत्रादौ पंचराजं पंचगवमिति भाष्योदाहरणे संगच्छते अत एव त्रि
यप्यइत्यादौ त्रियवपर्चीत्यात्यादिन यथायोगमौन्नित्यायेन चाप्नि उत्तरव्याख्याने समासान्ता इति
सूत्रे न ग्रहणं किमर्थमेतन्नावयवो यथा स्यान्न प्रयोजनं द्विधुरी त्रिधुरीति द्विगोरिति ङीविनि
भाष्यमाने समाससमात्रावयवत्वे अकारान्तोत्तरपदत्वाभावेन स्त्रीत्वाभावेन ङीपो प्राप्तेः अत ए
वानच इत्यादौ उत्तरपदस्य कार्यित्वेपि न त्र्यभ्यामित्युदाहृत्य सिद्धः अत एव नञ्सुभ्यां परमुत्त २
रपदं कपि परतः पूर्वमन्तोदात्तं बहुव्रीहाविति नञ्सुभ्यां संबंध इत्यर्थे परमंत इति सूत्रस्य भाष्ये प्रत्येकं ३८७
नञ्सुभ्यामित्युत्तरं कपि पूर्वमिति सार्थकं नहि व कुक्कुमारीक इत्यादावीकारायुत्तरत्वायकपि पूर्व

काद्विति कृत्रस्यान्यतरस्यां ग्रहणस्याचरितार्थत्वमेव कल्प्यमिति सेनकग्रहणं तु विकल्पार्थमे
व ध्वनितं चेदं मतं प्राग्दीव्यतमिति ननु पूर्वोक्तरूपद्वितीयं कृतोरिति प्राग्दीव्यतोऽणिति सूत्र
स्थमनोरमायां शब्दरत्नमूलं तु द्वयसाद्यनुरोधेनेत्याहुः इत्यव्ययीभावः। चकारबलेनेति
संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण संख्यापूर्वस्य तद्धितार्थे इत्यत्रोक्तस्य तत्पुरुष
संज्ञाविधानसमर्थ्यादेव पर्याये सिद्धे चकारः समावेशार्थ इति भावः। तत्र तत्पुरुषत्वेफ
लमाह पंचराजमिति तत्पुरुषस्येति भावः समासान्तानां समुदायावयवत्वेनाकारां
तोत्तरपदत्वाभावात् स्त्रीत्वाभावः समासान्तास्तु उत्तरपदावयवा इति पक्षस्तु क्वाचित्क इति
निरूपितं द्विगुत्वे फलं त्वग्रे स्फुटं द्वितीया श्रितादिप्रकृतिकेति येन विधिरिति सूत्रभा
ष्याद्युक्त्यादिग्रामण्येनास्य संबुद्धिः स्त्रीलिंगप्रत्ययान्तानभिन्नेत्यविग्रहत्वेराव्ययकत्वे न तत्र
श्रितादीनां तु वं तन्त्रासंभवान्नैषां तत्र लक्षणया सूपः शब्दस्य यत्वेन तदा हि प्रकृत्यंशांश
तिविशेषणान्यपावानतल्लाभ इति भावः। नन्वेवं कष्टाश्रितेत्यादौ न सिध्यति कदाचित्किता
प्राप्तादद्वितीयांगतेः तस्मात्स्वप इति नानुवर्तते एवं च गतिकारकोपपदानामिति न्यायेन सु
बुत्पत्तेः पूर्वं समासे ततो विशिष्टादापि प्रश्निते न्तस्य स्त्रीप्रत्ययानां तत्त्वाभावान्न दोष इति चेन्न
कर्तृकरणे इति वत्तकारकतद्धिशेषयोरनुपादानेन गतिकारकोपपदानामित्यस्याप्रवृत्तेः
न च द्वितीया श्रितेत्यत्र तद्विशेषोपस्थापक इति वाच्यं द्वितीयोपपदविभक्तिः साधारण

 त्वात् किंच परिपूर्णार्थस्याभिव्यक्तपदार्थस्य पदांतरेणान्वयात्परत्वांतरंगत्वाभ्यां चो।
त्तरपदे स्तपूर्वो रइति नदन्तवृत्तावपि सोः प्राक् समासोऽदुर्लभः अत एवाम इति नकार।
यामित्यादौ नञ्समासमाशंक्य भाष्येउक्तं अमं न स्यान् अभिव्यक्तपदाकत्वेनासामर्थ्या।
न्न समास इति उपदमतिङ्निर्दिः त्यादौ तु यष्ठ्योत्तपदो वा धत्स्याप्यावश्यनेदेवः करोतु मान्तुः
स्मरति इत्यादौ विशेषणसमासादिवारणाय सपेत्यस्य उक्त नरत्वान्तु उदन्ते राव शूपकत्वेन मध्ये
ऽसंबंधे मानाभावाच्च तदघटकश्रितशब्दो न तु न कदाचिदपि ठक् पूर्वपदेनैकार्थीभूतस्यत
स्यापदत्वेन निष्कृष्टस्याप्यन्यपदार्थान्वये सामर्थ्याभावाच्च इति केचित् दिहाणाजिति +
स्त्रो न्याततस्त तत्र स्यभाष्यसंमतरीत्या श्रितादपृथग्वृत्तादपि कदाचिद्दिक् काषाश्रेने यो
भवन्येवेति तत्रैव निरूपितं कष्टंश्रित इति न लोके तिष्ठतीति निषेधः इह श्रितादिषु गत्यर्थ
त्वात्कर्त्तरि क्तः धृपरापत्नायापन्नपश्च गतिरेव न फलं अत्यासोऽत्यतिक्रमः सोपि गतिविशे
ष एवेति प्राञ्चः आदिकर्मणि कर्त्तरि क्त इत्यन्ये न नु कष्टं श्रित इत्यस्य कष्टं कर्म कश्रयण क
र्त्तेत्यर्थः स च कष्टं श्रितो येनेति कर्मणि क्तांतेन बहुव्रीहिणापि सुलभः बहुव्रीहौ वि
शेषणविशेष्यभाववैपरीत्यस्यापि संसिद्धत्वेन कर्मणः प्रत्ययार्थत्वे न विशेष्यत्वं स्यादिति
नापादनीयमिति वाच्यं श्रितादिग्रहणमिति चेन्न न बहुव्रीहौ निष्ठां तत्त्वेन श्रितादीनां पूर्व +
निपातप्रसंगात् जातिकालसुखादिभ्यः परा हि निष्ठायाः परनिपात उक्तः ननु पतिते

त्ययुक्तं नियतनिर्दिष्टातिभ्यः स तेनावेदकत्वेन यस्य विभाषेति निषेधात्ययामिति निषेधादिति चेन्न
अत एव निपातनादिदिङ्क्तिः शं च चुरादावदन्तेषु पठितस्य यतगतौ वेत्यस्येदं रूपं न च सोपि
वेद् अचुरादिसाहचर्येण न ह ग्रहणान्न यस्य विभाषेत्यत्रैकाचः इत्यनुवृत्तेश्चेत्यन्ये प्रसिद्धत्वा
त्साहचर्याच्च द्वितीयाश्रिते त्यत्राचुरादेरेव ग्रहणं न्याय्यम् अत एव तनादिकृञ्भ्य उः इत्य
त्र कृञ ग्रहणं गणकार्यमनित्यमिति ज्ञापकमित्याकरोक्तं संगच्छते अत एव पङ्क्तिरिति न सा
ध्विति प्राचामाशयः ग्रामं गमीति गमेरिनिर्भविष्यति भविष्यति गम्यादयः इत्युक्तेः अके
नोरिति कृद्योगलक्षणषष्ठीनिषेधात्कर्मण्युद्धिमीयं प्रयोगत्वादिति स्वयमित्यस्यात्मनेति कर्तृ
प्राधान्यार्थत्वादिति भावः स्वयंकृतमिति असमासे कर्तरीति स्यादिति भावः एकत्र स्व
यमपि समासफलं बोध्यं जाल्मः इति व्रतानि च समाप्य समावृत्तेन स्वद्वारोढरूपा ब्रह्मचर्य एव
भूशयनादिर्हेयपि स्वदारानारोहन्निसह जाल्मः अससमीक्ष्यकारीत्यर्थः अनेन केवलन्दारोपयामिति ।
धनयतीतेन दारानारोहन्निनवा सर्वोपि निषिद्धानुष्ठानपर एव मुच्यते एतेन प्रकरणादिसहकृ
न वाक्येन निंदा प्रतीतीति संभवात्तद्धि वाक्ये निंदेति मलमयुक्तमित्यपास्तं योगरूढे तत्संभवेपि केव
लरूढे तदभावात् नहि निंदेत्यस्य च विवक्षितत्वानिंदेत्यर्थः इत्याहुः सामीत्यर्धपर्यायः कालाः इति का
लवाचिन इत्यर्थः वक्तव्यवचनं स्वरूपग्रहणनिवृत्त्यर्थम् क्रान्ताक्रान्तसाधारणोत्र इत्यस्त्वेषामिति
योगविभागोत्र्यर्थो न त्वाह नन्वनेनेति तदाह मासंपरिकेत्तु भित्ति ननु संबंधीत्यर्थः आरब्धवा

निति आदिकर्मणि क्तः कर्तरि च क्तः मुहूर्त्तमिति कालाध्वनोरिति द्वितीयान्तृतीया तत्कृतेति तत्कृ दे
न तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते तेन कृत इति समासः तत्कृतान्योन्यत्रिमतृगुणवचनेन पा
वृत्तेनार्थः तेन शास्त्रप्रवृत्तिर्विपटुरित्यादिसिद्धिः इदं सूत्रं कृतद्वारएव सामर्थ्ये प्रवर्तते न साक्षा
त्परस्परान्वयेऽपूर्णस्त्रेणति पुणस्यलक्षणभ्यां समासविधानात् तद्योगे हि नोत्तृतीया इदमेवाभि
प्रेत्य भाष्ये वचनसामर्थ्यात् शङ्कुलया कृतः खण्डः इत्यत्र करोतिद्वारकसामर्थ्ये इदं दध्ना भुंक्ते पटुरि
त्यादौ भोजनक्रियाद्वारकसामर्थ्येऽपि समासः वारणाय करोतिद्वारकसामर्थ्ये एव यथा स्या
दित्यर्थं तत्कृतग्रहणं कर्त्रैवामित्युक्तं नैवं तदर्थमिमभाष्यं विकथ्यते तत्रानार्थस्तत्कृतग्रहणे
न भवति हि शङ्कुलायाः खण्डः इत्यत्र सामर्थ्ये असामर्थ्याद्वा तत्र दध्ना भुंक्ते पटुरित्युक्तमिति वाच्यं
सर्वथा त्वनुसृतात्वतिरिक्तकल्पनान्तरं गत्वा कृतयोगे चारितार्थ्यान्नान्ययोगे सामर्थ्यादप्रवृत्ति
रिति तदाशयात् नचैवमपि श्रवणाकारणमिति व्यावर्तस्य सत्त्वेन नार्थं इत्यस्यासंगतिरिति वाच्यं खण्ड
इत्यत्र सत्यशङ्कादिग्रहणेन साक्षात्परस्परान्वये एतत्सूत्रस्याभावेनाश्रवणाकारणं इत्यादिसिद्धिरिति तदा
शयात् एतत्सकलं लक्ष्ये शाम सहमानेन सूत्रकृता तत्कृतग्रहणमेव कृतं तत्र साक्षादन्वये त्वापका
दपरत्वानुपस्थिततत्कृतद्वारक एव प्रवर्तते न चैवं तत्कृतेति किं श्रवणाकारणमूलमसंगतं कृतद्वारकए
व प्रवृत्त्यर्थं तदा वपकत्वादिति वाच्यं अन्यार्थे कृतेन तद्वारेणोपलक्षितेः एतेन खण्डिभेदेन इति धा
नार्थोतिति निष्पन्न खण्ड शाङ्कु योगे करणतृतीयान्तेन समासः इत्यपास्तम् तत्करणे कृते नान्येन नैव मत्र

सिद्धेश्च खंड शब्दस्य शकले वृत्तेश्च तदर्थेहेतुकत्वं च गुणवचनस्यार्थद्वारकं विशेषणं ननु गुण
स्य पदार्थैकदेशत्वादित्याहुः वचनग्रहणं च गुणेन सह जनेन द्रव्यवचनेनैव समासो यथा स्यादिति
तेन पाठान्तरं कुसुंभेन रक्तं रूपमित्यादौ न गुणशब्देनात्र जातिसंज्ञा रूढं तन्न द्विमतां न समासा
वेनाम संख्या शब्दमित्र शब्दवाक्यार्थे: नेन घृतेन पाठवमित्यादौ न तद्धितान्तत्वाच्च चतुर्पाद् शब्द
नां जाति शब्दत्वं स्वाकृतिग्रहणाज्जातिरिन्ये नञ्च लक्षणलाघवमायाज्जातेरेव न तत्र ग्रहणादिति स्पष्टमा
कारस्य तेभाष्यइतिनिरूपितं वा नइतिसूत्रे इत्यतं घृतेन पाटवमित्यादौ न खंड इति रूढः श्लोकलेश
र्थे शब्दोत्र रूढो धनपर्यायः अर्थे रै विभवा अपीत्यमरात् धान्येनेति हेतौ न तृतीया पञ्चम्यर्थे तत्पुरुषः र्था
प्रयोजनं अर्थेन मर्थ अचित्लाघवाद्वा धान्येनेति करणे तृतीयेति तत्र कर्तृकरणे तृतीधिकृतत्वे
व सिद्धत्वात् इति दिक् पूर्वसदृशः अत्र सूत्र लक्षणानि पुनयोगे हेतो तृतीया पूर्वेनार्थे कलहमिश्र
योगेः तएव वचनात् वकत्यादित्वाद्वा हेतु तृतीयात्वे तद्योगे न संभवतीति मन्तव्या यानि रूपितं
न तएवाव धार्यं केचित्तु समदृशयोगे तुल्यार्थैरिति हेतौ च केचित्तु एतद्योगे हेतु तृतीयान्तेन न
समासः लक्षण प्रतिपदोक्त परिभाषया तुल्यार्थैरिति विहित तृतीयाया एव ग्रहणात् इत्याहुः
तन्न भोजनेन सदृश इत्यादौ हेतु तृतीयान्तेन समासस्य सदृश प्रतिरूपयोरिति सूत्रे भाष्ये गी
कृतत्वात् समोन सर्वार्थैः सदृशा सहचर्यात् सर्वनाम पूर्वं पाठ संनिधाव पाठाच्च अत्र सदृश
हणं व्यर्थं षष्ठीसमासेन सिद्धेः न च पूर्वपद प्रकृतिस्वरार्थं सदृशप्रतिरूपयोः सादृश्य इत्ति सिद्धेः

४००

सदृश

पू॰ प्र॰ नत्र हि दास्याः सदृश इत्यादौ षष्ठीसमासे षष्ठ्या अलुकि पूर्वपदप्रकृतिस्वरार्थं सदृशग्रहणमावश्यकं नचे
दृमषिमनसः संज्ञायामित्यलुकि मनसा इति सिध्यर्थमावश्यकमिति वाच्यं अनभिधानेन तत्र समासस्यैवा
भावात् एतादृशसंज्ञायां मानाभावाच्च इदमेवाभिप्रेत्याचोक्तं भाष्ये तृतीयासमासे सदृशवचनानं।
र्थक्यमिति पाठांतरं । निसदृशशब्दनिरूपयोरिति निवृत्त्यै भाष्ये तु जोत्र न हेतुकसादृश्यवानित्यर्थे भो
ज्ञनसदृश इति तृतीयासमासार्थमत्र सादृश्यग्रहणमित्युक्तं न चात्रापि हेतोः शेषत्वविवक्षायां षष्ठी
समासेन सिद्धिः पूर्वपदप्रकृतिस्वरसिद्धेः नच सदृशस्वरूपयोरित्यनेन न सिद्धिः तस्य सादृश्यग्रहण
सामर्थ्येन प्रतियोगिवाचपूर्वपदकएव प्रवृत्तेर्हेतुत्वत्र कारकबोधे समासार्थमावश्यकत्वाच्चेति तदा।
प्राय: इत्यंतं तीत्याहुः ऊनार्थेति पूर्वस्त्रेर्थशब्दे न समासस्य साधितत्वादिहार्थग्रहणमभिधे
यपरं अत एवोर्थोन्युत्तरपदानि कलहशब्दश्च तृतीयायांतात्परा एव नोदात्तानीत्यर्थकमूनार्थक
लहं तृतीयायाः इति सूत्रं संगच्छते न चाहिशब्दनिपदोक्तत्वादस्यैवग्रहणं अत एव वाचारुलनाकलहः इत्य।
र्थे तृतीतत्कृतेति समासेनांतोदात्तत्वं एतेनार्थशब्दस्य पूर्वसूत्रोक्त्यभाष्यप्रत्याख्यानाद्वनार्थेति माव
विकल्पः इत्युदाहरणं चापयुक्तमित्यपास्तं अर्थशब्देन समासोर्थेन कार्यमिति तत्त्वतास्पर्थस्यैकेपदेनोक्त।
त्वात् यद्यपि नच स्वरविधायके र्थशब्दस्तत्स्वरूपपरः अन्नेनएवं धान्यार्थ इत्यंतोदात्तत्व पाठांतरं सिद्धि
स्तत्याविप्या ख्यानादत्रोनर्थग्रहणमिति वृत्तिकृतावप्याख्यानादद्दोष इत्यभिमानः नचार्थग्रहणं
पूर्वादिरिति नसंबध्यते व्याख्यानात्समासः सदृशयोः पृथग्गुपादानाच्चेति दिक् इत्यंतं मित्याकरे स्पष्ट

सा

मिति वाच्यं प्रतिपदोक्तकपरिभाषयैव तृतीयासमासलाभसिद्धेस्तृतीयाइति योगविभागेन तत्सिद्धेः अ
त एव तत्र तृतीया इति चरितार्थे अत एवार्थपदं स्वरूपपरमिति वदन् वृत्तिकारोपि व्याख्यानादनार्थग्रहण
मित्यादि किं चार्थशब्दस्य स्वरूपपरत्वे स्पष्टप्रतिपत्तये लाघवाय चार्थेनेत्येव वदेत् एतच्चार्थग्रहणे
न शङ्कुलादिभिः संबन्धनेत्व्याख्यानात् समसदृशयोः पृथगुपादानाच्चेति दिक्। पाठान्तरं परे तु पूर्वसदृशस्त्रो
न भाष्य एतत्सूत्रव्याख्यानात् समर्थसूत्रे भाष्ये तृतीया तत्कृतेत्युपन्यासोपादानविकलत्वादुदाहरणाच्च
प्रकृतसूत्रेर्थग्रहणं चिन्त्यप्रयोजनमेव उपादानेन तत्कृतो विकलत्वमेव विग्रहः स्वरविधायकेपि व्याख्याना
दर्थग्रहणेन कश्चिद्विशेषानुग्रहः माषविकलत्यादावेतोदात्तत्वप्रवृत्तौ च न दृष्टतरं मानं तृतीयायामित्यत्रा
स्वरविधायके प्रतिपदोक्तपरिभाषाप्रवृत्त्यभावज्ञापनेन धान्यार्थकलः कृत इत्यर्थेन केवाकलशब्दे
तादृशार्थे माषोनशब्देन चान्तोदात्तत्वं भवत्येवेत्याहुः इत्यलं मिश्रं चेति यत्र एवं धनैकार्थ्यं संधि तत्र गम्य
मानायां मिश्रइत्युत्तरपदमनुपसर्गे तृतीयान्तात्परं मन्तोदात्तमित्यर्थः अवरस्येति न चोनार्थेन सिद्धिः त्वा
ह्यूनवरार्थादित्यादौ व्याख्यानार्थेनैव प्रसिद्धमेवेति वाच्यं पूर्वपरावरेतिसूत्रप्रसिद्ध्याव स्थाविध।
यावरशब्दे चारितार्थ्यात् कर्तृकरणे चेति सूत्रे समाहारद्वन्द्वात्सप्तम्येकवचनमिति भावः अत्र
माहिवचनं कर्तृकरणबोधके तृतीयान्ते इत्यर्थ इत्यन्ये तृतीयेति तदन्तमित्यर्थः कृतग्रहणे
इति अस्याश्च कर्मणि क्तान्ते उत्तरपदे नं नरोगति प्रकृतिस्वर इत्यर्थे धागतिरनन्तर इति सूत्रेनं नत
रग्रहणं ज्ञापकं न व्यभ्युद्धृतमित्यादावतिव्याप्तिवारणार्थं प्रत्ययग्रहणपरिभाषयोहृतस्या

४२

श० श०

क्रान्तत्वाभावादेवाप्राप्तेर्न च घट्टं सदस्यादिनापकं न चाभ्युद्धृतमित्यादौ परत्वाद्गतिर्गतावित्यने
नाभिनिर्घातेनासिद्धमिति वाच्यं पदादिस्थत्वे पदान्तरत्वाभावे च तदप्राप्तेः अनन्तरग्रहणाच्चने
नुतत्सामर्थ्यान्नुगत्वादित्यन्यथानुनिर्घातमेवानेनेयं गृह्यते इति न दोषः पाठान्तरं अस्यार्थ
स्तु यत्र गतिकारकसमभिव्याहारस्तं कृदन्तेन तत्र कारकग्रहणेन न हि पिष्टस्यैव ग्रहणमपि शब्दा
त्तदंतसमभिव्याहृतस्य केवलस्यापीति अन्यथा नयाकृत ग्रहणेऽपरत्वात्तस्य ग्रहणापरिभाषया:
बाध एव स्यादित्यपि गृहणं अत एव सांकूटनमित्यत्र गतिकारकोपपदानामिति कृद्ग्रहणे इति व
परिभाषाभ्यां सिध्यतीति तु योगविभागेन सूत्रस्थभाष्योक्तेः सङ्गच्छते अन्यथा तत्र केवलकूटि नित्ये तु।
स्यापीति तु क्रान्तत्वान्न त्वोपि पाक्षिको दोषो दुर्वार एव स्यात् स्पष्टं चेदं सर्वं समासेन सूत्रे इति सूत्रे भाष्य
केयटयोः गतिरनंतरसूत्रे गतेः पूर्वपदस्य क्रान्ते उत्तरपदे कार्यविधानात्तत्समवधाने पिके केवलस
क्रान्तत्वेन ग्रहणं बोध्यम्। इत्थं तु इयं च परिभाषा कृत्विशेषाच ग्रहणे कृत्सामान्यग्रहणे पित्र व
र्तते तेन परतित्सूत्रे न कूलं सि न प्रादुस्य कारकपूर्वत्वान्ते नेन निमित्तम् इति उदाहरणाद्वेति वोध्य व
कूलग्रहणात्क्वान च शान्तत्क्ववन् प्रभृतिषु न हस्ते न भुंजमानः कुर्वन् कृतवान्वेति क्वचित्कारकवि
भक्त्यं समपि समस्यते पादाभ्यां ह्रियते पादहारक गले चोप्यते गलेचोपकः उभयत्रापि वाहुलकात्क
र्मणि एवुल् उत्तरत्राम्रूर्धमस्तकादित्यलुक् अत एवात्र सूत्रे कृते नेति व कव्यमिति वार्त्तिकं संग
च्छते एतेनात्र सूत्रे कृते नेति व कव्यमिति वार्त्तिकोक्तेः क्रान्तमित्तेन नायं समास इति मंदोक्तमपास्त

मवहुलवचनं माश्रित्य भाष्य एव नन्वाम्नाय्योनात्त्वकृताकिमितिनित्यपेन्यधिकारेणनिङ्. तेनाप्र
सं गात्कर्तृकरणाभ्यामालिङ्गनक्रियायां कृत्ये व भविष्यतीति प्रश्नः निङ् त प्रकृतिकृत् नाडितां
नेति प्रसंगः इत्याह काष्टैरिति करणे: अर्थवादः आरोपितोऽर्थः काकध्वयेति आकृत्यार्थे कृत्य:
शूलांभस्त्वेन स्तुति रूपांभस्त्वेन निंदा वा एवं वाते त्वत्रापि कोमलत्वदुर्बलत्वाभ्यां स्तुतिनिंदे+
बोध्ये अपि कार्थ वचनं ज्ञापकं लक्षणे पर्यं घनघात्यमित्यादिदर्शनात् एवं च वाहुलकेऽपि वा
यप्रपंचः एवं च कृत्यग्रहणे यन्नपपतो ग्रहणं काके: पात्रद्ये मा दोभूत् इति च ग्रुक्तं यदि पा
माणिकं न हि तदपि बहुलग्रहणेनैव सिद्धं इहां न रूढ़े निमित्तं विनादध्य: संस्कार्यत्वेन प्रतीतात्र सं
स्कारकत्वानुपपत्तेरिति भावः इहात्र ग्रहणं संस्कार्यमात्रोपलक्षणमित्येके भक्ष्येणाकठिणवि
विक्षावयवं अभ्यवहार्यं भक्ष्यं पानीयं तत्र खरं जंतस्य च भक्षयते न मनेव प्रयोगात् मिश्रणेति
तां विना मिश्रीकरणत्वायोगादिति भावः अत्रापि भक्ष्यपदं मिश्रणीयद्रव्योपलक्षणमित्येके चतुर्थीत
कहैन चतुर्थ्यां तत्रामर्शिनात्र दर्थाल त्पनरस्यात्राये नाह चतुर्थ्यं तार्थ्योयेति नादर्थ्ये एषा चतुर्थी बलि
रक्षित ग्रहणा ज्ञापित नयोगे हितादर्थ्ये चतुर्थी हितसूत्र ग्रहणं नु तज्ज्ञापकं तयोर तादर्थ्ये चतुर्थ्यो
समासाप्येचारितार्थ्यात् स्पष्टं चेदं भाष्यं तद्योगे चतुर्थीत्यस्मादेव ज्ञापकात् होध्याहितयोगे तस्मै हि
तमिति निदेशात्त्वकारकेचेदं त्र्भ्यादितं स्वयोगेन चतुर्थीचाशिषीति सूत्रविहित चतुर्थ्यात्
तसमासः वृत्तावुद्देशभावेनान्वयादाशीरर्थं प्रतीयात तस्याप्रधानत्वात्ः तदर्थ्यं चतुर्थीत्वेन तत्पो

शा॰ प्रे॰

णेव क्रमेवाशक्यानां हि सुखं हितं वा न्यमुपकारं जनयति यत्तु गोरक्षितमित्यत्र संप्रदाने चतुर्थीति
काशिकोक्तं तदत्रस्य भाष्यविरोधादुपेक्ष्यं संप्रदानत्वेपि तादर्थ्यविवक्षायां तादर्थ्ये चतुर्थ्या समासः सि
द्धः संप्रदानचतुर्थ्या तु वाक्यमेव भविष्यतीति ज्ञापकं तु स्थमेवत्यन्ये षष्ठीसमासा इति एतत्तु हैव
भाष्ये स्पष्टं ननु चतुर्थीसमासएवास्तु रंधनाय स्थालीत्यत्र षष्ठीसमासस्येष्टत्वेन प्रवृत्तिविरु
त्तिभावएवेत्यस्य निष्फलत्वात् न च चतुर्थी तदर्थे इति पूर्वपदप्रकृतिस्वरप्रसंगः प्रकृतिविकाभा
वएव तत्प्रवृत्तेः अन्यथा गोरक्षितमित्यत्राप्यनेनैव स्वरसिद्धौ क्ते चेति व्यर्थं स्यात् न च हितार्थे हिते
चेति वक्तव्योक्ते चेति सामान्यवचनस्य ज्ञापकत्वात् अत एव गोवलिरित्यान पूर्वपदप्रकृतिस्वरत्वं
न च रंधनाय स्थालीत्यादौ षष्ठीसमासो नभिधानान्नेति वाच्यं चतुर्थीसमासस्यैव तदर्थेनभिधान
मस्तु किमनेन विशेषेण एवं च बलिरक्षितग्रहणमपि न कार्यमित्यपरं लाघवमिति चेन्न रंधना
यस्थालीत्यादावभिधानस्वाभाव्यात्तादर्थ्यत्वे नैव तत्स्य भानं ननु संबंधत्वेनेति षष्ठ्याभावादेव।
नक्षग्राहेः चतुर्थ्याः सत्वेन चतुर्थीसमासवारणाय तत्स्यावश्यकत्वादिति भाष्याशयः उपकार
कत्वेन बोधे वाक्यमेव संबंधत्वेन बोधे समासोपीति व्यवस्थाया इष्यमाणत्वेन तत्साफल्यादि
ति भाष्याशयात् न चाश्वघासयमश्वार्थः सचासौ घासश्चेति मध्यमपदलोपिसमासे उपकारकत्वेना
पि बोधसंभव इति वाच्यं बलिरक्षितग्रहणेन शाकपार्थिवादिसमासानित्यत्वस्य ज्ञापनात् इत्या
हुः अर्थेन नित्यसमास इत्यादि पाठांतरं न च रंधनार्था स्थालीति मध्यमपदलोपिसमासे उपकार

कत्वेनापि विरोधस्य समासतः संभवत्तस्य सर्वत्रांगीकारे मानाभावात् शाकपार्थिवादीनामित्यादि
शब्दः प्रकारे प्रकारः सादृश्यं तत्त्वोत्तरपदार्थगर्भतया दृष्टप्रयोगत्वमन्यस्यासंभवादन्ये इत्यतं
यत्तु सर्वलिंगतामात्रविधायकमिदं नित्यत्वं तु न्यायसिद्धं चतुर्थ्यैव तादर्थ्यस्योक्तत्वात् दर्थे शाद्वेन
विग्रहस्याप्रसक्तेरिति तच्चोद्योघटोत्पातिर्लुर्निति इत्यादावुक्तार्थानामपि प्रयोगदर्शनात् इदमा
पि क्वचिद्रकार्थ्य प्रयोगे ज्ञापकमित्यन्ये इति तन्न अर्थशब्दस्य नित्यपुंस्त्वात् परवल्लिंगतां बाधि
त्वे विशेषलिंगता नोक्तिः चतुर्थी संप्रदान इति सूत्रस्यैव प्रकृत सूत्रस्यैव गुरोरिदं गुर्वर्थमिति +
भाष्यात्क्त षष्ठीसमासे तु विशेष्यनिघ्नतालोकाश्रयत्वाद्बोध्या तादर्थ्यस्य संबन्धत्वेन विवक्षा
याः षष्ठीन त्र मासन्नित्यत्वमपि भाष्यप्रामाण्यादेव पंचमी भयभीतिनिर्गतजुगुप्सुभ्यामित्यपि
वक्तव्यं स्पष्टं चेदमत्रैव भाष्ये योगविभागात् समासे भोगोपरतग्रामनिर्गतवन्येतरादयः साधव
इति तु मूलाशयः सूत्रं तु शेषप्रकृत्यर्थमावश्यकं भयेत्यस्य ग्रहणं तु न स्वकात्रासइत्यादो समा
सापत्तेः अल्पं पंचम्यंतत्र्थीन मिति कानिचिदेव पंचम्यंतानि समस्यंत इत्यर्थः अल्पशब्दस्य समादे
व निपातनात्क सवध्धत्यार्थीनामंगलामंगलवचनमिति वचनमाणान्त्वात् तस्य प्रपिकत्वाद्धाति
वे द्रुकारकत्वं तु समसनत्क्रियां प्रत्यस्त्र्पत्वाद्धुः स्तोकान्तिकअर्थे ग्रहणेपि स्तोकार्थाल्पशब्दौ
एवं न लेशादयः करणे च निपंचमीत्रिधोतस्यैव ग्रहणान्नेभ्यस्तेन पंचम्यभावात् एतदप्राप्तेः

४२

पा॰ श्रो॰

403

प्रतिपदोक्तपरिभाषया च न द्विहितनपंचमध्ये नैनेवायं समासः स्यादुक्तः अंतिकदूरार्थयोस्तु दूरांति
कार्थेभ्यः इत्यनेन यान्नपूरुष इति अंतर्वर्तिविभक्त्यापदत्वान्न लोपः याजकादि याजकपूजक
परिचारकपरिषेचकस्नातक अध्यापकउत्सादक होतृपोतृभर्तृकर्तृ गोसर रथगणक पत्ति
गणकस्त्वन्ये केचियान्तगतिमा स्थापत्ये के ख्यातिभूयागताः ये कां ताः याचद्यास्ते दृष्टकाय्या
याजकादिषु इति गणे रत्नकृतः गुणात्तरेणेति देवचनं सर्वगुणकात्स्न्ये इत्यत्र पठितं तथापि
समासादिसंज्ञासंबंधार्थमत्रोक्तं भाष्ये पूरणगुणेत्यपवादत्वोक्तेः षष्ठीपदानुवृत्तेश्च षष्ठीसमा
स एवानेन न कर्मधारयादिः नापि तत्र तत्र लोपः इदं वचनं सर्वशब्द एव प्रवर्तते सर्वपदानुवृ
त्तेः इदमेव ध्वनयितुं सूत्रविधाविदं पठितं भाष्ये तत एवायमपि पूर्वकाले कैकेत्यत्र तिपदोक्तए
वेति बोध्यं गुणात्तरवचनाद्द्विहितोपसर्जनादनेन स्ववंतस्य सर्वशब्दस्य समास इति वाच्योर्थः गु
णद्विहितनरवंतं च गुणवाच्येव भवतीत्याशयेनाह तरवंतं यद्गुणवाचीति गुणमनतीति
गुणादिस्त्वर्थेन सम्यगेव न निर्धारणे इति ननु यतो निर्द्धार्यते यश्च निर्द्धार्यते यश्च निर्धारण
हेतुरेतत्त्रितयसंनिधान एवायं निषेधः इत्यर्थः स्यात् तत्रैव निर्धारणे षष्ठ्याः प्रवृत्तत्वात्तत्रयवि
धायकसूत्रे केयटादिभिरुक्तत्वाच्चानाम्रपाश्च्यः सर्वेषां श्वेततर इत्यादौ नमः वापत्तिश्चेत्यत्र केचेदाह
पूरणगुणेतीनेकेचित् सर्वेषां श्वेततर इति दृश्यान्तराधाय श्चेत्यापेक्षया सर्वेषां पदानामधिको
यं श्वेतो गुणः इत्यर्थः अत्र पूरणेत्यस्य प्राप्तिः कथं गावेति षष्ठीति सूत्रेण समस्यते वा

धेमानाभावादिति भावः नन्विदमपूर्वमित्याहुः नृणामिति नृपदेन समभिव्याहृतात् द्विजेतरनरा
त्तद्रूपं तेव्यावर्तनत्वं विभक्त्यर्थः तेन द्विजेतरनरव्यावर्तनश्रेष्ठत्ववतो द्विजा इति बोध इति मते श्रेष्ठपदेन
समासः प्राप्तः द्विजत्वस्येन निर्धारणहेतुत्वेन तु द्विजपदेन प्राप्तिः तदाहितदर्वेदा षष्ठी श्रेष्ठत्वेन तु द्वि
जेतरमनुष्येभ्य इत्यर्थो नागम्यते तेषां सामान्यशब्देनोपस्थितत्वात् अनुपस्थितकल्पनायां गुरुत्वापत्त्या।
त्वात् केचित्तु नृसमुदायावयवा द्विजाः श्रेष्ठा इति बोधः श्रेष्ठत्वं तु उक्तन्यायेनैवाक्षेप्यमित्याहुः त
न्मतेपि द्विजपदेनैव समासप्राप्तिर्बोध्या यावदेवं च दत्तेऽ इत्यप्युदाहरणं पुरुषोत्तम इत्यादौ तु
निर्धारणसप्तम्याः संज्ञायामिति समासः न चैवं हलदंतादित्यत्रापि वहुलमित्यपि करुष्यते लुक् स्यादिति
तेन कचिल्लुगभावेन प्रसिद्धेः करनास्तीत्यादि तु तस्यैव प्रपंचः ध्वनितं चेदं तन्मूलकत्वेकत्वीति वाच्यं हलदं
सूत्रे भाष्ये रघुनाथादिशाब्दे तु श्रादित्यासमत्वाभाव न चैवं नानिर्धारण इति व्यर्थे स्वरेण। तादित्य १
दात् सप्तमीसमासे पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वंतोदात्तं स्यात् अत्र संज्ञार्थे चारितार्थ्या
च्च पत्रपुरुषेभ्यः इति पंचमीविभक्तीति सूत्रविहितपंचम्यं तेन समास इति तत्र निर्धार्य
माणत्वेदृ एवतत्त्वन्मनस्य पुरुषत्वानाप तेस्वित्तपसन्निधानाभावान्नात्र निर्धारणविभक्तिः
किंतु संबंधसामान्ये षष्ठीति समासो भवत्येव गुणेन निषेधस्तु अनित्य इति तरप्सूत्रे वै
यट इतिटिक प्रतिपदेति थान्तुकारकविशेषोपादानेन तत्तोविदर्थे स्यात्यादि सप्तम्यास्त्या वि
धीयमानेत्यर्थः तेषु शेषग्रहणानुवृत्त्या तेषां समासनिवृत्त्यर्थत्वादिति भावः पूरणगु

शा॰ शे॰ ण पूरणाद्यर्थैरिति स्मादिना गुणसुहितयोः संग्रहस्तत्र पूरणार्थः प्रत्यय एव गृह्यते नो
भनादिशब्दाः प्रत्यासन्नत्वात् लोपश्चेत्यादपूरणमित्यादिनिर्देशात्तेन कुंभपूरणभवरत्यादि
404 सिद्धं तात्स्थ्यं क्व षष्ठ्यां किं नेत्युक्तेः षष्ठी इति सप्तमीति योगविभागात् समासो बोध्यः तृजकाभ्यां कर
षष्ठ्यां इति वाच्यं तत्र पूरणार्थत्वेन पूरणान्तार्थे नीपादनित्याद्यं नस्यापि ग्रहणमिति द्वितीयन्त
तीयेति सूत्रे भाष्ये कैयटयोः स्पष्टं गित्वा द्वितीयमित्यादावन्यतरस्यां ग्रहणसामर्थ्यात् समास
मासः इति हि तत्रोक्तं एतेनोक्तषष्ठ्यात्र षष्ठीशब्दस्य षष्ठ्याः समाभ्यां त्रवैति भागार्थेकान्त ।
त्यर्थानित्यापूरणाधिकारविहितत्वाभावात्तन्निषेधः इत्यपास्तं गुणशब्देन केवलगुणवाची
गुणोपसर्जनद्रव्यवाची च गृह्यते इत्याद्यन्तं नचैवं ब्राह्मणस्य शुक्ला इत्युदाहरणासंगतिः अत एव नादेःसं
ग्रहणेऽग्रार्थेग्रहणात्रेत्याह काकस्येत्यादि तदेदमिति अन्यथा काकस्य कार्ष्ण्यं इदं तास्ते शुक्ला
इत्यर्थे शुक्लपदेनासामर्थ्यात् समासप्राप्तिरेव समासेनेति भावः इदानीं तु शुक्लपटशब्द एव विशे
ष्यसमर्पक इति तात्पर्यं अनित्योयमिति तेन चंदनगंधो घटरूपमित्यादि सिद्धं अत एव षष्ठीति सू
त्रे भाष्ये तत्स्थैश्च गुणैः समासो वक्तव्य इति अस्य प्रत्युत्तरं स्ववचनमार्तुं तात्स्थ्यावहूणवाचकैः
समासः इत्यर्थः तात्स्थ्यं च गुणिसमानाधिकरणत्वस्य वाचकशब्दाभाववत्त्वं तत्स्थैरित्यस्य उ
क्तस्थत्वेनैव प्रतीयमानैर्नेतु भेदेन प्रतीयमानैरित्यर्थोन्त नहि गंधरूपगुणवाचकः कोपि शब्दो
गुणिसमानाधिकरणः शब्दशक्तिस्वभावात् । पिनष्टि गंधामित्यादौ गंधशब्दो न गुणशब्दः ।

किंतु चंदनत्वादिजातिनिमित्तकोन्य एव मालतीकुसुमादावदर्शनात् शैत्यादेस्तु न तारतम्यं
तद्बोधकशुक्लादिशब्दस्य गुणसमानाधिकरणत्वात् न च घटः शुक्लतरत्वादौ गुणवचनेभ्यो मतु
पो लुकः सत्त्वेन गुणवत्त्वेनैव बोध इति कथं गुणसामानाधिकरण्यं गुणस्याभिधानार्थं अभेदाध्यव
सायेन तथा प्रयोगसत्त्वेनाहतेः इदमेवाभिप्रेत्य तत्र तत्र भाष्ये उच्यते गुणवचनानामाश्रयतो लिं
गवचनानीति वार्त्तिकं न तु घटस्य शुक्लतरत्वाभेदविवक्षायामपि सत्त्वेन परत्वे मतुपोऽश्रवणार्थं प
तेनावार्त्तिकेन मतेऽभेदाध्यवसायो नास्तीति चेत्तत्र किंचैवं गंधादिभ्यो मतुपो लुगभावार्थं मन
भिधानमाश्रयणीयं मन्मते तु वचनग्रहणेनाभेदाध्यवसाययोग्यानामेव ग्रहणेन न गंधादिष्व
तिप्रसंगः गुणातिशयज्ञातेः परं परासंबंधेन प्रवृत्तिनिमित्तत्वे गुणस्य परत्वे यदा सा तारतम्यवृत्तिनि
मित्तत्वं तदा गुणपरत्वमिति मते तु समानानुपूर्वीक गुणबोधशब्दात् प्रतिपाद्यत्वमेव तारतम्यत्वं वा
ध्यं अयं च प्रतिप्रसवः प्रतिपदोक्तत्वेनानन्तरत्वेन च गुणस्यानेनेति निषेधस्यैव न समानाधिकरण
त्वप्रयुक्तस्यानेन गुणस्य गंधस्येत्यादौ निषेध एव गुणवाचकशुक्लादिभ्यो जातो भावप्रत्यये तु गु
णवाचकत्वाभावात् समासो भवत्येव न चैवं प्रकरणादिना यदा तीव्रादिशब्दात् तीव्रत्वादिविशि
ष्टगंधपरता तदा चंदनस्य तीव्रत्वादौ समासापत्तिः पूर्वोक्तरीत्या तेषामपि तारतम्यादेतत्वादितिवा
च्यं तीव्रं घ्राणं मन्दं चंदनमित्यादिदर्शनेन तारतम्यत्वाभावात् तरत्वाद्युः अनिरूपत्वादेव च संख्यावा।

ग्र·शे चकशब्देन निषेधः क्वाप्यनयोस्तन शालयोरित्यादिनिर्देशान्नेति दिक् सुहितेति सूत्रे भावे क्तः तेन
फलानां तर्पणमित्यादावपि निषेधः स्यादत आह तदाह तृप्त्यर्था इति फलानामिति करणस्य शेषत्वविव-
क्षायां षष्ठी तृतीयेति तत्र तत्र हि करणत्वेन भाने षष्ठीसमासे तु संबंधत्वेनेति न निषेधवैयर्थ्यं श्रुति-
कृतविशेषमप्याह स्वरे विशेष इति तृतीयासमासेन तु रूपतुल्यार्थेति बाधित्वा थाथघञ्क्तादिस्वरेणान्तो-
दात्तत्वे शब्दे तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वंतोदात्तः स्यान्नृपि तृप्तन तार्थत्वादिति भट्टि-
प्रयोगदर्शनेन तृपेः सकर्मकत्वात्कर्मणि क्तः एतेन सुहितार्थग्रहणसामर्थ्यात्त्र योगे करणस्य शेषत्वावि-
वक्षेति निरस्तं फलेनोनाविधैश्चित्रैः स्वादुशीतैश्च वारिभिः तत्प्रास्तांश्चान्नपुमतीपप्रकुः कस्य तृप्तीयमिति
भट्टिप्रयोगविरोधाच्चेत्याह द्विजस्येति कुर्वन्नित्यपेक्षया न कर्मणि षष्ठी न लोकेति निषेधात् तु
नापि घटाद्यपेक्षया असामर्थ्यात्समासानापत्तेः किंतु क्रियापेक्षा शेषत्वादिति किंकरः इत्यर्थः इति बा-
लमनस्य कृत्वेति तादर्थ्यरूपसंबंधस्य संबंधत्वेन विवक्षायां षष्ठी ब्राह्मणसंबंधिक्रियानंतरमित्यर्थः
रहितेति पाठांतरं भाष्यसंमतं चैतदेव तत्र स्वकृदपमे कृष्टे तादिभिः सामर्थ्येन समासमनुक्त्वा कृ-
दव्ययमेवोदाहृतं तेनान्याव्ययैः सति सामर्थ्ये समासः स्यादेवेति गम्यते अत्र बदंति भाष्ये द्विजस्य कुर्वन्
न कुर्वाणः कृत्वेत्येवंजातीयके कर्तृकर्मणोरिति षष्ठ्यां न लोकेति निषेधात् कथयाद्यपेक्षायां षष्ठ्यां तु
सामर्थ्यात्समासप्राप्तिरेव नेत्याशंकाच्छिन्नस्य द्विषन् । तु शास्त्रसर्वस्य हिनोरित्याद्युदाहृतं सदव्यय

विषयद्विषः शातुर्वचनं नोत्सकसनोरयनिषेधः इत्युक्तेः सत्त्वकारकषष्ठी भवत्येवेत्युक्तं ननोत्स्था
पनेर्इहशेषविषये कारकस्य शेषत्वविवक्षानादर्शनादेः संबंधत्वविवक्षावनास्ति संबंधमात्रनिरपे
क्षक्रियायांषष्ठ्यां तान्त्वयस्य नास्ति ऋषिलिनात्यर्थेच ऋषिणिवाक्ये नैव निर्लेपं पाणिनिनात्यर्थे निर्ले
पार्थमेव भाष्यकृतात्र प्रदर्शितमिति इत्यंत स्त्रीत्रास्यचित्त्व्यापे किमुदाहरणं चवक्षस्योरितिप्रकृतिसू
त्रस्य भाष्यविरोधश्च सामर्थ्येन समासाप्राप्तावुक्तिलमित्यन्यदेतत् एतेन चौरस्य द्विषन् सूर्यस्योदेतो
रित्यवोदाहृतत्वात्कारकषष्ठ्यैवायं निषेधः नत्वहिद्विषः शातुर्वचनं नोत्सृष्टकसनोरयनिषेधः इति कार
कषष्ठीश्च नः शेषषष्ठ्या समासो भवत्येवेत्यपास्तं उपक्रमस्य भाष्यविरोधात् नोत्सृष्टकसनोश्छा
दसत्वात् शानविधिकारकषष्ठ्याश्च संभवेन सत्त्वग्रहणमेव पर्थ्यां पत्रे शश्च नेमन्यपदार्थे इति
सूत्रस्थ सर्वपश्चादित्यभाष्यप्रयोगादनित्योऽयं निषेध इति केचित् तन्न ततः पश्चात् स्त्रे स्यत इति भाष्यप्रयो
गेऽपि पश्चाद्योगे पंचम्या श्रुपि सत्वेन सर्वस्मात्पश्चादिति स्तु षष्ठ्येति समासेनापि न इयतन्त्रे
रिति स्राहुः स्वकर्तव्यमिति कर्तृषष्ठ्या समासः स्वरे भेद इति द्वितीयानिर्कुद्भुत्तरपदप्रकृतिस्वरेण
न स्यादिति नवेनतत्समासे मध्योदात्तत्वस्यात्तशेषषष्ठ्यां यद्यपि न स्वरभेदस्तथापि कारकषष्ठ्या
मस्त्येव समासनिषेधश्चाविशेषादुभयोरपीति भावः न त्वकस्येति परिनिष्ठितविभक्त्या समास
इति पक्षे इदं नन्वेवं कटोऽपि कर्मभीष्मादयोपीति पक्षेऽद्वयोरपि षष्ठ्येत पावि षप्रभृतिनान्वयो
न परस्परमित्यसामर्थ्यात्कथं समासप्राप्तिरिति चेन्न कट एवकर्मभीष्मादयों उत्त्स्तुतत्सामा

५६

ग्रा·शे

नाधिकरण्यमात्रात्तद्विभक्तिं लभन्त इति पक्षेऽदोषात्तथाप्यैकान्त्यमादाय तत्त्वेऽपि सामर्थ्य
स्य सत्वाच्चात्र यनिबध एवायं ज्ञापकमित्याहुः न च समानाधिकरणसमसमर्थवादित्व सामर्थ्येन।
स्य सत्त्वेऽसिद्धिरिति विषयत्वमात्रविषयकत्वात् अत एव समर्थसूत्रे प्रयोजनविचारावसरे सर्पिःका
लकमित्यत्र प्रकरणान्तरस्थं षत्वमेवोदाहृतं अत एव समानाधिकरणप्रकरणे पठितं समान।
मध्यमवीराश्चेत्यादीनां सार्थकं न च धातुसहचरितप्रत्ययेन यत्र कर्माद्यभिधीयते तत्र समाना
धिकरणमपि नासमर्थमित्यर्थका धातुनाभिहितमितिवचनेन वीरः पचतीत्यादौ सामर्थ्यसत्वात्तत्र
तेषां चारितार्थ्यं अनभिधानेन न च समानादिभिः पचतीत्यादेः समासस्यैवाभावात् इति सूत्राश
यः यदि तु तेन ज्ञापकेन समानाधिकरणपद पुरस्कारनिहित समासविषयत्वमात्रं तस्य ज्ञाप
ते तद्द्वारे च यत्नतः पीयमानस्येत्येवोदाहरणं अथानभिहितमिति सामर्थ्यसत्वादिति यक्तव्यस्व
भाष्यप्रौढिवादपरमेव अत एव समर्थसूत्रे समानाधिकरणमसमर्थवद्भवतीत्यस्य किं प्रयोजनमिति
प्रश्ने सर्पिः कालमित्यत्र प्रकरणान्तरस्थं षत्वमेवोपन्यस्तम् न तु प्रकृतेऽपि समासाभावः किंच वी
रः पुरुषः इत्यादौ च सामर्थ्यात्समासाभावमाशंक्य समानमध्येत्यादिवचनाद्भविष्यतीति तत्रैव भा
ष्ये उक्तं तद्यदि तत्सूत्रमात्रपरं न हि संज्ञकुवृ इत्यादौ विशेषणसमानापत्तिः स च भृत्यभरणी पा
दौ चरितार्थः स्पष्टं चेदं तत्रैव भाष्ये [illegible]दमवधानयितृ विशेषणमित्यस्य सामर्थ्येनोक्तं पूर्वापरे
त्यादिसूत्रे तु क्रियाशब्देन प्रवर्त्तनेन रतिस्यमेवोक्तं कैयटेन तस्मात्समासे तत्पुरुषत्वो पूर्वेत्यादेर्ज्ञाप

कत्वएव भाष्यं समंजसं किंच सति चोरस्याद्धि बन्नित्येवोदाहरणं मुख्ये तो सुनकस्तु नावेवेति एतन्मत्र।
स्यपूर्वभाष्य रवेद स्यापि प्रौटियद्‌त्वमेवोचितं नत्वत्र विशेषणसमासस्य ड्‌वैरत्वेन नेदं निषेधोदाहरणं
युक्तमतआह विशेषणसमासस्त्विति ननु विशेषणं विशेष्येनुभयोपादानान्नसमस्यमानपदजन्यप्रका
रयोः परस्परं अभिचारित्वएवं समासइतिकथमत्र तस्य प्राप्तिः नहि कल्पस्य सर्पत्वाव्यभिचारादिति चेन्न
वैलासादिर्भावपदार्थः नर्कविषेत्यादिप्रयोगासंगत्यात तैव प्रवृत्तौ मानाभावात शिंशपावृक्ष इति ·
भाष्यध्वनितसमासानावत्रेश्चाशिंशपात्वं च वृक्षत्वव्याप्यमित्र मेव उभयसाधारणैकज्ञातौ माना।
भावात् एवं च व्यभिचारः परस्परं किंचैवं न त्वर्थक्यारितिकोशान्न हि कल्पस्यापि नह्यभिचरितत्वंस्त्वन
एवकैपदे नोभयोपादानं स्यार्थमित्युक्तं रहेति न हि कस्य सर्पस्य त्वत्र वहुलेति न चेष्टापत्तिरेव
समासेष्विति न वाच्यं विशेषणसमासवष्टीसमासयोः फलेऽविशेषात् तस्मादेतन्निषेधविषये विशे
षणसमासाभावएवाभ्युपगन्तव्य एवं च प्रथमान्ते नैव समास इति पक्षे विषक्षं तं तत्प्रयोगाभावएवा
नभिधानाद्वहुलग्रहणाद्वेति वदंति नचैवमन्यपदार्थेरतिसत्त्वप्रयोगासंगतिः अन्यस्यपदस्यार्थे +
इति तदर्थात् एवमेकार्थोह इतिसूत्र एकार्थ इति कर्मधारययोः वहुव्रीहिर्वा स्याद्यपपाचेर्थासिद्धिरिति सा
भाष्यमसंगतं स्यात् त्वदीयाकर्मधारयाशङ्केति चेन्न भाष्यकृतापुदाहृतेषु राज्ञः पाटलिपुत्रक
स्य भृकुमारादिकस्य नहि कस्य सर्पस्येत्यादिष्वेव भाष्यकृत्यादि प्रामाण्येन वहुलग्रहणात्तदभाव
कल्पने नान्यत्रेन्याप्रायात् एवं च नीलोत्पलस्येत्यादि साध्वेवेति वदंति यत्तु राज्ञः पाटलिपुत्रकस्येत्या

प्रा० श्रो

५७

दिष्ठनीकमुपादायकैयटेनोक्तं षष्ठीसमासे पूर्वनिपातानियमः स्यात् विशेषणसमास्यादेवेति तत्र वि
षणविशेष्यभावेकामचाराद्व्यवस्थापां शाब्दप्राधान्यमुपसर्जनमितिन्यार्थतामाश्रित्य द्रव्याश्रित
त्वेन गुणादीनामप्राधान्याद्द्रव्यापेक्षया गुणादीनां विशेषणत्वेनैव नियमव्यवस्थया विशेषणसमासस्व
व षष्ठीसमासेपि तन्नियमसंभवात् न तन्निषेधवैयर्थ्यापत्तेः यत्तु समानाधिकरणेन षष्ठीसमासनिषेध
विषये विशेषणसमासो न निषेधसामर्थ्यादिति तन्न श्रूयमाणस्यावमकन्यायवत्तद्भावे कर्मधारयेनिस्व
रेण गमनस्य श्रेयस्त्वादौ कर्मधारये पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वंतोदात्तत्वमिति स्वरभेदेन तत्सा
र्थक्यात् किंच गोर्धेनोरित्यादौ विभक्त्यंतत्वेन चरितार्थयोष्टाप्ङीत्यादीनां परत्वेन बाधषष्ठीसमासनिषे
धेन चारितार्थ्यात् तत्र हि षष्ठीसमासे गुणप्रवृत्तिनिमित्तकत्वेनाप्राधान्यात्प्रथमानिर्दिष्टत्वाद्द्वयेनापू
र्वनिपातो विशेषणसमासे तु गोरितिभेदात्तदाह गोर्धेनोरिति आदिना भाज्यस्योत्तरस्येत्यादि संग्रहः
एवं द्रष्टव्ये विषये विशेषणसमासोपि नवत्येव त्याहुः केचित्तु प्रथमानिर्दिष्टमिति सूत्रभाष्योक्तरीत्या ष
ष्ठीति सूत्रस्य येन सबंधेन समासस्तदर्थ निरूपितसंबंधार्थकषष्ठ्या एव समासः इत्यर्थः पूत्या सत्या
पमेवार्थ उचितश्च एवं च तादृशान्वयघटितं सामर्थ्यमेव तत्सूत्रप्रवृत्तिनिमित्तं न चेदृशं सामर्थ्यं प्रकृते नेत्यु
क्तं भाष्ये सामर्थ्यादत्र न भविष्यतीति एवं च समानाधिकरणग्रहणं व्यर्थत्वमेवेत्यर्थाद्युक्तं भगवता
कथमसामर्थ्यं मत समानाधिकरणत्वादित्यादि भाष्यं त्वेतदभिप्रायानभिज्ञपूर्वपक्षे सिद्धान्त्येकदे
शिनोक्तिरिति तन्नार्थसाधकं एवं च तत्तत्कस्येत्यादौ विशेषणसमासो नित्य चेदृष्टमानमस्तीति तदभा

वोवाकूलकात् कल्पोनोचेन्मेतिवदेति अयुष्ठावसरन्यायस्यानित्यः यद्यातेनन्यायेन मास्त्वे
वमोपिइतिदिक् एतेनधेनुशब्दो गोरेववाचकइत्यपास्तं योदेति सूत्रे धेनुग्रहणवैयर्थ्यापत्तेः
समानाधिकरणेनेत्यस्य[illegible] धिकारबाधापत्तेश्च धेनुर्नवप्रसूतागोरितिकोशे गोरित्यस्यवपु
त्यानुवादः स्पष्टंचेदं प्रासइदडि-न्यत्रकैयटादौ पूजायामइत्यस्यवक्तिद्धे पूजायामितिनिर्देशा
सूत्रोपलक्षणार्थइत्याह मतिबुद्धीति अत एवकर्मणीइति सूत्रेभाष्ये कर्मणियः कृइत्यर्थे
पूजायांनिषेधानर्थक्यंदूषणमभिहितं अन्यथानियमार्थत्वान्मत्यादिव्यावृत्यावारिता+
र्थेस्पष्टमेवराज्ञामिति क्तस्यचवर्त्तमानइतिषष्ठीयत्नकारकषष्ठ्येवार्यसमासनिषेधः प्रतिप
दोक्तत्वानशेषषष्ठ्यानुसमासः स्यादेवेति तत्रफलेविशेषाभावात् व्याप्याघ्नक्तेतिस
ह मासेति सूत्रभाष्यानुभयथाप्यंतोदात्तत्वस्येवप्राप्तेः तस्मात् शेषषष्ठ्यापिसमासस्यनिषेधो।
यं तद्दूनयत्राह भूतेनेति नन्भूतेक्तोदुर्लभः तत्क्तकौडिन्यन्यायेनमतीत्यादिवर्त्तमानकाले
नभूतकालस्यवाधात् यत्यासीदित्यध्याहारे धातुसंवंधइतिभूतेक्तइतितत्रसुरासुरैः पूजि।
तापनमइत्यादिप्रयोगेधातुसंवंधाभावात् राजपूजितोस्तीत्यादौदोषाच्चइतिचेत्तनेनप्रोक्त
मित्यधिकारेउपज्ञातइति प्रत्ययविधानेनभूतकालस्यमतिबुद्धीतिवर्त्तमानकालोनवाधक
इतिज्ञाप्यते अन्यथावर्त्तमानेक्तप्रत्ययेस्यचवर्त्तमानइतिकर्त्तरिषष्ठ्याद्वर्वारत्वेनलक्ष्यलक्षणयो
संपातात्तप्राप्तयोगेतृतीयांतत्वासंभावान् नचयमर्थांतरेतृतीयापूर्वोत्तरत्रकर्त्तृतृतीयाया।

ये१ योनाप्राप्तिरित्यायेन २

प्रा॰ शे॰

एवं निर्णीतत्वात् न च तज्ज्ञापनार्थ एव तज्ज्ञापकं सूत्रमिति । यः स्वरात्स्वरे इत्यादिप्रयोगानुरोधेन सामान्या।
विषयत्वस्यैव न्याय्यत्वादित्याहुः + परे तु एतस्मादेव ज्ञापकात्तत्र कौण्डिन्यन्यायेन समानविषयः न
चात्र तस्य विषय इति वदन्ति अधिकरणवा अधिकरणे इत्येव सिद्धे वाचिग्रहणं चिंत्यप्रयोजनं इ
408 दमेषामिति क्तोधिकरणे चेति क्तः अधिकरणवाचिनश्चेति कर्तरि षष्ठी किं वृत्तमित्यादौ तु कर्तरि
क्तः किमावृत्तं निष्पन्नमित्यर्थः कर्मणि च क्तः षष्ठ्यो सन्निहितेन तत्र क्तेन न संबंधः सूत्रे आयां प्रतिषे
धानर्थक्यापत्तेः तस्मात् कर्मणीत्यस्य षष्ठ्येव संबंधः तत्र अपां स्रष्टेत्यादावनेनैव सिद्धे तृ
जकाभ्यामित्यस्य वैयर्थ्यापत्तेः वृक्षावृश्चेत्यर्थस्तदाह कर्मणीति स्पष्टं चेदमत्रैव भाष्ये एवं च।
क्तस्यानुवृत्तिरेव तृजकाभ्यां यत्तु कर्तरि च व्यपेक्षाया निवृत्तिरिति तस्यायं भावः भवतः शायि
के त्युदाहरणं ओदनस्य पाचक इत्यादौ कर्तरि निषेधः तत्र हि कर्तरीति तृजकयोर्विशेषण
मिति तत्र तृच उत्तरार्थत्वकल्पनापत्तेः उपात्तस्यैव प्रयोजने संभवति उत्तरार्थत्वमात्रकल्पन
स्यान्याय्यत्वात् श्रुतत्वेन तृजकविशेषणतायां एव न्याय्यत्वाच्चेत्याशयेनाह कर्त्रर्थे तृजका
भ्यामिति अत्र यद्यपि कर्तरीत्यकस्यैव विशेषणं तत्र संभवव्यभिचारयोः सत्वात् तथापि तृज
योरुपरंजकत्वमस्त्येवेति भावः तत्र संभव ओदनस्य पाचक इत्यादौ व्यभिचारस्तु भक्तिके
ति पर्यायार्हर्णोत्पत्तिषु एवुजिति भाव एवुच धात्वर्थनिर्देशे एवुल्वा कर्मणि षष्ठ्याः स
मासः कर्तृः प्रयोगाभावेनोभयप्राप्त्यावित्याप्राप्ते ननु तत्साहचर्यात् कर्त्रर्थकाकस्यैव अ

ननु किं शब्दस्य वृत्तिस्थानमित्य निरात्तमिति प्रयो ग संगतिः कर्तरि क्तः

हणं भविष्यति किं कर्त्तरीत्यनेनेति चेत् अर्थाधिकारात्तु बोधात् भावार्थकस्यैव ग्रहणं स्यादिति पक्षा का
निरासार्थत्वात् पक्षार्थेति अभिव्यक्तपदार्थायेऽनित्यायादिति भावः एतेन वक्तव्यस्य भर्त्रेत्यु।
दाहरणमयुक्तमित्यपास्तं कैयट इति पूर्वोत्तरसाहचर्येण कारकषष्ठ्येव समासनिषेधादिति।
भावः प्रतिपदोक्तत्वेन कृद्योगषष्ठ्या एवात्र ग्रहणादिति भावः गुणोत्तिविशेषकर इति प्रतीकमु
पादाय वहुष्वहुवचनमिति सूत्रे कैयटे स्फुटमेतत् अस्मादेव भाष्यप्रयोगादनित्योयं प्रतिषे
ध इति मतान्तरमपि तत्र तेनोक्तं अत एव तत्प्रयोजकको जनिकर्त्तरि स्यादिति निर्देशाः संगच्छन्ते केचि
त्तु तृजकाभ्यामिति वक्तव्ये तृचः सानुबंधकस्य ग्रहणात्तृ लोके निषष्ठी निषेधो नि
त्यः स्यादाहुः तन्मतेपि गुणोत्तिविशेषकस्यादि सिद्धये कर्त्तरीति रेवशरणं कर्तरि च अत्र द्वयो
रप्यकत्वेपि सामर्थ्यात् कर्त्तरीति षष्ठ्या एव विशेषणं न तृजग्रहणं तत्र न संबध्यते ऽसंभवा
त् भवतः शायिकेति पर्यायोति एवं च तथा अर्थे एवुल्वानित्यं क्रीडाजीविकायामिति निषेधस्य सिद्धत्वा
त् नित्यग्रहणसामर्थ्याच्च विधिरेवायं क्रीडायां तृचोसंभवाद्धि किंत्वाच्च तस्यात्रासंबंधः इति म
त्वाह अकेनेति न चैवमके जीविकार्थे ऽत्यत्राकग्रहणं व्यर्थं प्रतिपदोक्तत्वे नद्धि हि न समास
स्यैव तत्र ग्रहणेन रमणीयकर्त्तृत्वादौ दोषाभावादिति वाच्यं … क्रीडायामिति वत् जीविका
यामित्येव सिद्धेऽर्थग्रहणं व तस्यापि व्यर्थत्वात् अपरे तु प्रतिपदोक्तपरिभाषया कारकषष्ठ्ये
व समासोनित्यः षोषष्ठ्यानु विकल्प एव अके जीविकेति त्वरउभयत्रापि अर्थग्रहणसाम
र्थ्यान्नानालिखिते … जीविकायां तृचः संभवेपि

४-६

409

श्रा॰ शे॰

र्थेन शक्तिपदोक्तपरिभाषाऽप्रवृत्तेः एवं चाकपदमपि रमणीयकर्तृत्वादिव्यापारत्वाच्चरितार्थे अत्र तु नीवि
काग्रहणं च कर्मत्वप्रकारकबोधे वाक्यासाधुत्वायेत्याहुः अन्ये तु तत्र तु रत्रिमपी च कंति भाव एवेति।
ति यद्यपि भावे धात्वर्थनिर्देशः स्त्वेव सिद्धमिति संज्ञायामित्येतदधिकरणार्थमिति क्तदंतेव त्यतेत त्वा +
पि भावेऽपि परत्वादस्यैव प्रवृत्तिर्दुर्वारेत्याशयः उद्दालकः श्लेष्मातकः वस्तुतः संज्ञायामित्यस्य एवु +
त्तित्यत्रान्वयः स चाधिकरण एव भाव इति पक्षांतरमित्याहुः षष्ठीसमासप्रसंगेन तदपवादमेकदेशि
समासमाह पूर्वापरेति ननु कर्मधारयान्मत्वर्थीयो नेष्टः वृत्तिद्वयकल्पनागौरवात् अत एवाश्व
शब्दाद्ब्रह्मपुरुषान्मतुब्नेति रक्तेन इति सूत्रे भाष्ये कैयटयोः स्पष्टं एतेनेदं वचनमेवेत्यपास्तं एवं चै
कदेशिनेत्यनुपपन्नमिति चेन्न कर्मधारयान्मत्वर्थीययोरर्थः प्रतीयते तस्मिन् बहुव्रीहिणालभ्यो हि
लाघवगौरवचिंतापर्याचित्र गुरिति एकदेशशब्दोऽवयवे रूढः न च रूपयोर्बहुव्रीहौ लभ्यः अत एव
गौरवदरणमित्यादिसिद्धिः अत्र हि ज्ञातिविशेषवान् प्रतीयते न तथा प्रतीतिर्बहुव्रीहौ अदंडी अवाग्मी
त्यादौ मत्वर्थीयांतेनैव नञ्समासः न तु नञ्बहुव्रीहिणा गतार्थत्वं दंडसंयोगनिषेधसंपर्कबहुभाषि
त्वनिषेधस्य च ततोऽनवगमात् स एव हेमन्तपूस्त्रे कैयटे संबंधनीत्यादि नञ्व्रीह्याद्येनाठातु सिद्धमित्या
केचित्तु एकगोपूर्वाट्ठञिति ठञ्विधायकेन सत्त्वभाववत इत्यर्थकस्य सुब्भिन्नस्य त्यर्थकस्यासुद्युतोंग
स्येति प्रत्ययस्थात्सूत्रस्थभाष्यप्रयोगे (संगच्छते मत्वर्थ) ण चक्कविद्माघवानादरोत्ताप्यते तेन सर्वध
नीत्यादिसिद्धिः अत एव मत्वर्थिक इति सत्सूत्रस्थभाष्यप्रयोगः संगच्छते मत्वर्थीयो मत्वर्थः।

सोस्यासीति अत इनिठनाविति ठन् अन्यथा पूर्वोक्तरीत्या लाघवेन मत्वर्थीयस्येति बहुव्रीहिमेव कुर्या
दित्याहुः यद्यपीह कर्मापूर्वादिति ठञ् प्राप्तस्तथापि पाठ एव निर्देशादिति बोध्यः अवयवित्वं चावय+
वापेक्षं न ह्यत्र च ह्यत्र च काश्चोपस्थितत्वात् पूर्वादय एवेत्याह पूर्वादय इति समानाधिकरणार्थक एका
धिकरणशब्देन अवयवावयविनोरसंभवात् अतोत्राधिकरणं द्रव्यं एकत्वविशिष्टं प्रतिपादके
नावयववाचकेनेति वाच्योर्थः फलितमाह एकत्वेति षष्ठीसमासेति यद्यपि कायशब्दादेरवयवि
वाचिनोवयवे लक्षणया कर्मधारयेणापि पूर्वकायादिसिद्धिः ऊर्ध्वकायवत् तथापि कायपूर्वादिनिवृ
त्तये सूत्रमिति भावः पूर्वकायस्येति न स्यपरमिति निर्देशात् अवयववाचियोगे पंचमी न किंतु षष्ठी
ति भावः पूर्वं नाभेरिति नाभेरिति दिग्योगलक्षणा पंचमी पंचमी नाभिरत्रावधिर्नावयविनी।
ति न समासः नाभेर्यः पूर्वोभागः स कायस्यावयव इति षष्ठ्यर्थः कायेन तु स्यादेव पूर्वकायो नाभेरि
ति पूर्वशब्दस्य नित्यसापेक्षत्वात् प्राधान्याच्च छात्राणामिति ३ उक्तभूतावयवसमुदायविवक्ष
याबहुवचनं अतएवावयवित्वं समुदायसंमुदायिसंबंधे छात्राणामिति षष्ठी सर्वोपि पूर्वादिभि
न्नोपि ज्ञापकादिति अन्यथान्हस्य सायपूर्वत्वं न स्यात् इति भावः एवंच सूत्रे पूर्वापराधरोत्तरा।
अ मिति वयवमात्रोपलक्षणमिति ज्ञाप्यत इति केचित् मध्याह्न इति राजाह इति टच् अन्होन्ह इस
न्हादेशः कालेनेति दिनमध्य इति तु ज्ञापकसिद्धस्यासार्वत्रिकत्वाद्बोध्यं इत्याहुरिति परवल्लिं
गमिति सूत्रभाष्ये तु एकदेशिसमासः प्रत्याख्यायते तथाहि तत्रशास्त्रादिषु निषेधो न कार्यः

प्र॰ शे॰

परवल्लिंगमिति सूत्रे तत्पुरुषग्रहणं न करिष्यते एकदेशिग्रहणात्सिद्धं हृदैकदेशोनोऽरिति वक्ष्या
मि तदेकदेशिग्रहणं कर्तव्यं न कर्तव्यं एकदेशसमासो नारब्धास्तेकथमर्धपिप्पलीति समानाधि
करणो भविष्यति अर्धं चासौ पिप्पली चेति षष्ठीसमासोऽपि प्राप्नोति इष्यत इति तत एव षष्ठीसमा
सः अपूपार्धमिति उक्तं यत्तु द्वितीयतृतीयेति सूत्रे भाष्यमन्यतरस्यां ग्रहणं विशेषविधिना मु
क्ते सामान्यविधेरप्रवृत्तिज्ञापनार्थं किं प्रयोजनं अर्धपिप्पलीत्येकदेशिसमासेन मुक्ते ष
ष्ठीसमासो माभूदिति तदेकदेशमुक्तिपरं बोध्यं इत एवास्य सा तत्र प्रयोजनं नालक्षोपन्यासः न
चाहुः सर्वैकदेशाह्नो नूनमेतेभ्य इत्येनेषां कर्मधारये प्रवृत्त्यापत्तेः प्रतिपदोक्तैकदेशसमास।
एव च प्रवृत्त्यर्थमावश्यकत्वं त्रिसूत्रीति वाच्यं एतज्ज्ञापकप्रामाण्यादेव लक्षणप्रतिपदोक्त
परिभाषाऽप्रवृत्त्यानन्तरूपमात्रेन तत्प्रवृत्त्यंगीकारात् समप्रविभागादन्यत्रार्धाहारोऽर्धजरतीय
मित्यादौ सूत्रमनेपि कर्मधारये तैव निर्वाहस्यावश्यकत्वाच्च न च पूर्वापरेति सूत्रविषयेऽपि ष
ष्ठीसमासापत्तिरिति वाच्यं भाष्यनयेनाभिधानेन वारणात् षष्ठीसमासनिषेधप्रकरणे एव पू
र्वत्यादि सूत्रं कार्यमिति भाष्याशयात् वस्तुतस्तत्रापि षष्ठीसमासो भवत्येव सूत्रं तु मुख्येऽर्थे पूर्व
कायसिध्यर्थमेव अर्थविशेषानादरेणेत्तु भगवता प्रत्याख्यातमित्याहुः सूत्रे तग्रहणाद्वावि
शेषणसमासस्तत्र वारणीय इत्याहुः अर्धखण्डं वाच्यार्धशब्दस्त्रिशोऽर्धलिंगः अवयववाचीपु
ल्लिंग इत्यभाष्यं तत्पलक्षणमिति सकलखण्डेवापुंस्यर्धोऽर्धं वा समेंऽशके इत्यमरः ... वा पुं
स्त्र

सीति शर्वोत्तरान्वयि न तु शकलखंडे इति स्वरूपभेदात् नपुंसकत्वेन निर्णीतेः वचनात्पुंस्त्वविकल्पः स्त्रिया
मिति फलितं । खंडे इति स्त्रीलिंगत्वेन भिन्नलिंगानां न द्वंद्व इति तेन परिभाषणात् शकलचास्त्री
ति निर्देशेनैव निर्णीतं अर्ध इति स्वरूपभेदात् पुंस्त्वेव गते वा पुंसीत्यनेनाविशेषात्स्त्रीनपुंसके लभ्ये
ते योगविभागादर्धमिति निर्देशेनैव नपुंसकत्वविवक्षायां सिद्धे नपुंसकग्रहणं नित्यनपुंसकत्वा।
र्थम् एतेन नस्पंदमित्यादौ सूत्रे लिंगवचनयोरविवक्षितत्वान्निर्देशेन लिंगलाभो न युक्त इत्यपा।
स्तम् इत्याशयेनाह समांश इति निष्पन्नी वेइति च एतेन निर्देशादेवानपुंसकत्वलब्धे पुनस्तद्ग्रहणं
सूत्रे लिंगाविवक्षायां ज्ञापकमिति केचित् । उक्तं परास्तं पिप्पल्या एकविभक्तौ चोपसर्जनेन त्वाद्ध्रस्व
त्वं स्यात्तत्राह एकविभक्ताविति एवं तर्हि पंचानां खट्वानां समाहार इति विग्रहे पंचखट्वीति
न सिध्येत् अत आह एकदेशीति इदं चापत्यं नपुंसकमिति सूत्रे च खट्वीति भाष्योदाहरणात् ज्ञायते
अर्धमिति सूत्रे अन्यतरस्यां ग्रहणमपकृष्यते तत्सामर्थ्यात्पक्षे षष्ठीसमासोपि पिप्पल्यर्ध
मिति ध्वनितं चेदं परवल्लिंगमिति सूत्रे भाष्ये इत्यनुपदमेवोक्तं पत्र द्वितीयतृतीयेति सूत्रे भा
ष्ये अन्यतरस्यां ग्रहणं विशेषविधिमुक्ते सामान्यविधेरप्रवृत्तिज्ञापनार्थं किं प्रयोजनं अर्ध
पिप्पली एकदेशिसमासेन मुक्ते षष्ठीसमासो मा भूदिति तत्प्रौढिवादपरं अर्धपिप्पली नामि
ति इहार्धपिप्पलीति शास्त्रं परवत्लिंगात्तिदेशोपि वचनात्तिदेशाभावात् विशेषकाद्येति।
भावः अर्धपिप्पल्या इति तु खंडसमुच्चये वा ध्यं अर्धपिप्पली चार्धपिप्पली चेति विग्रहात् ८

षा शे॰ कदेशिनेति किं स्वर्धं पशोर्देवदत्तस्य स्वं देवदत्तः स्वामी न त्ववयवीति न तेन समासः निषेधं वा
पितेति नच भागार्थकान्यन्यपोते षु चरितार्थमिदं तेषामपि स्वार्थिकत्वेन पूरणार्थत्वादिति
स्पष्टं भाष्ये पत्ते षष्ठीसमासः इति शागुरुकृपत्याख्याने तु संख्याप्रमाणत्वादिनिर्दिष्टानां सामा
न्यापेक्षज्ञापकतया पूरणगुणादिनिषेधस्यानित्यत्वेन षष्ठीसमासः साध्यः। यद्वा षष्ठीति सूत्रा
न्तरं द्वितीतृतीयचतुर्थतुर्येति पाठं इति बोध्यं ननु भिन्नापाश्च तुर्थीभक्तिरिति विग्रहा
च्चतुर्थीभिक्षेति स्त्रमते शागुरुकृपत्याख्याने लुपुंवद्भावापत्तिरिति चेन्न लिंगविशिष्टपरिभाषया
स्त्रीनिमित्तेन संज्ञेतनासमासात् भागार्थकान् प्रत्ययात् तस्य स्त्रीत्वमेव नास्तीति विभाषा द्वितीय
तिसूत्रे निरूपितमत्रनस्तत्र द्वापोकादेशस्य पूर्वान्तत्वेन ग्रहणात्तु पीभिक्षेती च्व तद्भूति
त्यादौ समासानापत्तिः तत्र हि सुबंतमेवोपपदं नतु तन्नकृत्तिकस्यैव दन्यार्थे ह्यपदपर
त्वे च नमानं न स्यात्प्रदसुबंतमेव यत्रापि विभावाद्यत्र च्यम्प्रथमा षष्ठी विभक्त्यादौ न सपीत्या
दि सूपते तत्रापि महासंज्ञाबलात् सुबंतस्योपपदत्वे तेषां च तन्नकृत्तिके लक्षणा किं
च स्तंबकर्णयोस्सपदसंज्ञा महासंज्ञाबलात् अन्यकृत्तिकसमुदायस्य सुबंतत्वमि
त्युक्तिमात्रं मतीयमेव नतावतः महासंज्ञायां हि संज्ञेव न ता इत्यर्थमिलभ्यते

योगवत्। किंतु द्वावेव यत्र कर्त्तारौ भिन्नभिन्नरूपेणैव बुद्धिस्थ्यकौ नानां परामर्शकाविति स सर्वासां तन्त्रमु
खत्वप्रतीतिः स्पष्टं चेदं काव्यप्रदीपादाविति न तत्रातिप्रसंगः एवं च यत्र नान्यापि यस्य यस्याश्च।
कार्यमुच्यते नेनं तभज्ञेन रूपत्वज्ञादेर्हितीयस्येति सूत्रस्य भाष्यप्रयोगो व्याख्यात इति वाच्यं क्वचित्स्पष्ट
त्वा यत्र शाब्देपि विवीक्षायां न दोष इत्याशयात् सालेकवेति स्यादेशविधानं तु अन्योन्यं परस्परेत्यादावा
समासे चरितार्थमिति भावः पक्षे न वार्त्तिकेति स्त्रीनपुंसकयोरिति वार्त्तिकेऽन्योन्यामिमे ब्राह्मण्यौ
इतरेतरमिमे कुले इत्यादि च नत्रोदाहृतं स्त्रियामितीति अन्योन्यसहाया इति सर्वस्य हे इति सूत्रस्थ
भाष्यप्रयोगोपि बाधः पुनस्तदेवेति अनुवादके विभक्ते न्याय्यत्वादिति भावः उदाहरणे प्रियसुखश
द्वौ अश्वककुलात्तृणाकौ उपस्पदाने ऽत्र प्रसंभावनामात्रेव तदभावप्रतिपादनं सफलमित्याशयेनाह
अत्यंतप्रियामिति यद्यप्येतित्स्व प्राग्व्यस्थोभयार्थकत्वात् जाति धनवानवीनुनम्र स्वतेम्रनाभिधानात्तद्धे
इति वीप्सायां यथायथं शाब्दस्वार्थत्वेर्हितावाङ्ग्यानदीपिनिनिपात्यत इति भावः लीयत्वं चेतिने न हृस्वसिद्धिः
यथायथमिति सूत्राके एव कृतद्धित स्यात्वपताभावः यत्तु मांतत्वं निपात्यत इति तत्र सर्वत्र तस्यैव प्रयोग
प्रसंगादित्याहुः ज्ञातेति तत्र तमेतत्स्थलएवं न लोकेति निषेधान्न ष्टीन त्वचिंतु यथायथस्य ज्ञातेत्न्ये
प्राह्णत्यर्थः नपुंसकत्वं चेति वेन कृतद्धित्वान्नियतार्ह वचनोन्यत्वभावस्य संग्रहः अतोदात्तत्वं लुक
कर्मधारयवद्भावादेव सिद्धं रहस्यवाच्यमिति द्वंद्वत्रोस्य पूर्वपरेत्वमभिव्याक्तेरथ्येवमित्याहुः प्राच

शा॰ शे॰

न्तरमिति आङ् मर्यादाभिविध्योरित्यव्ययीभावः आरभ्य भूतित्वादचवत्तुः आङ्स्वन्तुर्णां पूरणे वर्त्तते आव
न्तर्थादिति इत्यर्थः अपमाङ् अभिविध्योमिथुनीयंतीत्यनेनान्वयः द्वंद्वं पदद्योत्यात्तु मर्यादा साचेत्य एनाव।
देवपशूनामापुरित्यर्थः मिथुनीयंतीति मिथुनशब्देन तत्कर्म मैथुनं तदिच्छतीत्यर्थे क्यच् प्राये एणमि
थुनायंतरङितिक्यङ् तं पठ्यते तत्रोपमाप्यामृग्यः अभिव्यक्तिशब्देनात्यंतसहचरितो लोकविज्ञातावु
च्यते कर्मव्यतिहारे न दाहचर्ये एते इति ते न इहन द्वौ युधिष्ठिरार्जुनौ द्वौ देवदत्तयज्ञदत्तावि ति द्वंद्वं त्वं वीप्सा
दौ वीप्सायां द्वित्वं अन्यस्वार्थे द्वित्वमिति बोध्यं अन्यत्रापीति द्वंद्वं पु द्वान्यवर्तंतेतिपथ्या अत्र द्वयोर्द्वयो
रित्यर्थात् वीप्सायां द्विर्वचनं यथाच प्रीतोऽस्मि स्ववदुः स्वल्लु ... सा द्वानि साहते स्वार्थे द्वित्वम
त्रैकशेषवत् आह द्वुवचनं अनएव स्वार्थे द्वंद्व इति स्मैत्र प्रयोगः संगच्छते अत्र स्वार्थे द्वित्वं पुस्त्वं लो।
कात् शब्देंदुशेखरे ग्रंथे एवमर्थमपर्युरं प्रीयतां तेन भगवान् शिवया सहितः शिवः शब्देंदुशेखरः
सायंकालिभाष्योक्तिभूषित सतां हृत्कमले वास्तां यावत्फणिफणाधरा इति श्रीकालोपनामकशि
वभट्टसुतसतीगर्भजनागेशभट्टविरचिते सिद्धांतकौमुदीव्याख्याने शब्देंदुशेखराख्ये पूर्वार्धंस
माप्तं शुभमस्तु साधुरामेण संवत् १८२१

ननु भवदुक्तं कारकादिनिस्सूत्रस्याकारग्रंथास्तु चित्याश्च संज्ञासमावेशापत्तेर्नुयमेवासदित्यादि
बोध्यं अत एव महान्तं कुम्भं करोतीत्यत्र समुदायस्योपपदत्वमाशंक्योच्चारितं पदमुपपदं स्या।
च्चात्रोच्चारितं न तत्पदं पञ्चपदं न तदुपोच्चारितमिति भाष्यं न तत्पदमिति पदसमुदायत्वादिति
भावः इति कैयटश्च संगच्छते अन्यथा भवदुक्तरीत्या महासंज्ञाबलेनोपपदसंज्ञकसमुदायस्य
सुबंतघटितत्वमित्यस्यापि वक्तुं शक्यतया तदसंगतिः स्पष्टैवेत्याहुः +उपपदमतिङिति त्वने
न कृदंतस्योपपदेन नित्यैकार्थीभावबोधनात् तत्सामर्थ्येन चोपपदे नैकार्थीभाव एव प्रत्ययो
त्पत्तेः अत एवोपपदनिमित्तकतद्धितविधौ समर्थपरिभाषोपस्थितिरत्रैव सूत्रे भाष्ये उक्ता।
+ उपसमीपोच्चारितं पदं उपपदं सामीप्यं च सप्तम्यन्तपदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थे
सातात् न तदन्वयित्वमात्रेण तत्त्वानुपूर्वीव्यवधानं एवं च तमाभवान्मूदित्यादौ माङुपपदत्वनिबंधनो
लुङ् संगच्छते अत एव कर्मण्यणित्यत्र उपपदग्रहणाय इति भाष्योदाहृतं संगच्छते अनेनानुपसर्गेक
इत्यत्रानुपसर्गग्रहणं चरितार्थं गुरुं नमस्करोति कन्यामलंकरोति इत्यादौ तु हिमवंतंष्ट
णोतीत्यादावपि वाऽनभिधानान्नाण् अभिधानलक्षणाः कृत्तद्धितसमासा इत्यकर्तै
त्रै रिभतिस्सूत्रभाष्योक्तेः महान्तं कुम्भं करोतीत्यत्रापि नाण् सविशेषणत्वेनासामर्थ्यात् वि
शिष्टस्य तु नोपपदसंज्ञा अपदत्वात् अत एव मृदं कुम्भं करोतीत्यत्र मृदमित्युपपदमेव
नाण् प्रधानाप्रधानयोरिति न्यायेन प्रधानकर्मण्युपपदे एव तद्विधानात् मृदस्त्वानदृ।

पृ॰ श॰

रूपत्वात् प्राधान्येन हि मृदं विकरोमीति कश्चिद्व्यवहरति किं तु कुंभं करोमीत्येवं न चोद्देश्य
णायऽग्रामं नाय इति भाष्यप्रयोगासंगतिः ग्राममजा संयुक्तो भवत्विति इच्छया उद्देश्या।
ग्रामः संयुक्तो भवत्विति नीच्छया च प्रवृत्तिदर्शनेनोभयोरपि प्रधानस्यैव तुं शक्यत्वात् तु
कुंभीत्यस्य तु न कर्मत्वं अव्ययत्वेन सत्त्वभावस्य निवर्तनेन निपातानां द्योतकत्वेन तस्य
धात्वर्थे तत्पाचकर्मता यावत्तु मशक्यत्वात् कर्मप्राप्ते न चात्र धात्वर्थभूतकर्मण एव ग्र
हणं अतएव स्तोकं पचतीत्यादौ क्रियाविशेषणे कर्मण्युपपदे न प्रत्ययः प्रकृतिवा।
चकात् कुंभमित्यादि सापेक्षत्वेनासामर्थ्याच्च न च द्योतकस्य तदंशे नित्यसाकांक्षत्वमिति
दोषः किं च प्रकृतिवाचकस्यापि विकृतिरूपधात्वर्थ एवान्वयेन कुंभीत्यस्य सापेक्षत्वं।
दुरूपपादं अकुंभं विकुर्वन् कुंभमुत्पादयतीत्यर्थादिति वाच्यं भाष्येऽस्य समाधानस्योक्तो
वप्रवृत्तत्वेनादोषात् कैयटेनस्य स्पष्टमेवास्य भाष्यस्याप्रौढिवादत्वमुक्तं अकटं कटं करोति
कटीकारः काशानां कटीकार इत्यर्थे काशकटीकार इति तु भाष्यप्रयोग एव साधित्याहुः वाक्यं
त्वसाध्वेव महासंज्ञाकरणादेवं दर्शनानालोचनेनेत्यादौ प्रकृत्यर्थविशेषणानां अकर्तरि।
कारके इत्यादि प्रत्ययार्थानां पश्चाविन्त्यादितं हि विशेषणानां च नोचनोपपदत्वं तदंतरमपि +
वक्तव्येनान्वेवं तत्र गृहणं व्यर्थं न च प्रकृतधात्वधिकार एवोपपदत्वं पंचम्यास्यादितिपक्षे अधि
कारेणैव सिद्धे इतन्त्राह तस्मिंश्चेति एतेनोपपदाभावे व्यत्तलस्यापत्तिरिति तत्र योग उपपद

अतिङिति बहुव्रीहिणा तिङः घटितः समासस्तदर्थः केनैव तद्व्यावृत्तिसिद्धेः पर्युदसनमुप।
पदविशेषणत्वमिति तन्न तस्य नवल्कत्वमर्थयोरिति सूत्रस्थभाष्यविरोधात् तत्र हि किं तु तस्या
नधिकाराद् किं वृत्तन्नग्रहणानवर्थकमित्युक्तोपपदसंज्ञार्थं तर्हीत्याशंक्यातिङिति प्रति
षेधात्संज्ञानर्थमित्युक्तं किं च प्रकृत न सूत्रे भाष्ये तिङिति किमर्थं कारको व्रजति न दाशाय
स्त्वमास्तु मा भूदित्यादौ न समासप्राप्तिः माङ उपपदस्य पदत्वाभावात् पश्चाविन्यादिवत्तुन्नविधौ
माङीत्यादि सप्तम्याः स्वार्थे सत्त्वेन सोत्रप्रथमा सप्तम्याः एवं चोपपदसंज्ञालिंगत्वेनात्र तद
प्राप्तेः तुमुन् विधौ तु क्रियार्थोपपदस्य त्वयमुपपदसंज्ञाव शक्यतीति तदुपादानो समास
स्याप्रिवाप्तिरिति न तदुक्तं न दोषः स्वपक्षेति वन्नेतरतिनतः शंकितं कारको गत इत्यादौ
तिङन्तार्थक्रियावाचकस्तुवंतेन समासप्रतिषेधार्थं तिङन्तार्थार्थाघटितस्य अर्थकं तदि
तिनत्रोतरद्रव्यवाचितदितिनदाशयस्तु गतादद्व्यवाचित्वेन क्रियार्थे क्रियावाचको
पपदत्वाभावेन तुमुन् एवं तुलाविन्यस्यैवाप्राप्तेरनन्वनत्रसिद्धत्वेन समासः तुमुन्वि।
धायके प्राधान्येन क्रियार्थे क्रियावाचकस्यैव क्रियाग्रहणसामर्थ्येन ग्रहणमिति यत्तु
केचिदनत्रसमासवारणायातङ्कं धनोरेव तत्रोपपदत्वं तस्य वक्तादिषु त्वयार्थे नैकार्थी।
भूतनयानिषेधेकार्थीभावस्यैव तन्मशक्यतया न समास इति तन्न अनुपसर्जनादिति
सूत्रभाष्योक्तरीत्या निरपेक्षकार्थाभावाभावेपि शास्त्रप्रवृत्तेरदुर्वारत्वात् उपपदमितिम

पाठांतरं

प्रा॰ श्रो॰

432/1

ह्रासंज्ञाविरोधेन तावन्मात्रस्योपपदताया वक्तुमशक्यत्वाच्च किंचैवसतिकारकोत्र
ङतीत्यत्र तिङ्न्तस्योपपदत्वाभावात् तेन समासप्राप्तिशंकेनास्सङ्गतास्यात् पदित
स्यान्वबोधकत्वे प्राधान्येन क्रियाबोधकत्वाद्धि शिष्टमप्युपपदं न हि एवं च धातोः प्राधान्येन
क्रियाबोधकत्वाभावात् तन्मुनोः प्राप्तिरेव प्रत्ययार्थविशेषणतयैव तत्तत्सङ्कुपस्थि
तेः पदिपश्चात्कथंचित्क्रियाबोधकत्वेनैव तस्यतत्वं तर्हि विप्रिषु स्यापि तत्वं दुर्वारमि
ति वाच्यं कारकोत्र तेन तरामिति तदर्थस्तु वेतप्रतिषेधार्थेतु नातिङिति तस्यानभि
धानादित्याशयेनातिङ् ग्रहणं वैयर्थ्यमाशंक्यैवं तर्हि सिद्धे सति यत्तिङिति प्रतिषेधं
शास्ति तज्ज्ञापयत्यात्वर्थेषु तयोर्योगयोर्निवृत्तं स्यस्पेति तेन गतिकारकोपपदा
नामिति परिभाषा न कर्तव्या भवति केनेदानीं समासो भविष्यति सामर्थ्येनेतिस्मन्नुपारि
त्यस्यायं भावः पूर्वं सूत्रे गतिरिति नीहानि तिङितियोगविभक्त्या भाभ्यां संबंध इति तत्र गतिसूत्रे
गत्यर्थ्योऽतिङितिषयस्य संबंधफलाभावेन समासविशेषणतायाएवावश्यकत्वेनात्रापि
तथैवोचितं नचैवमपिगतिरतिङेतेन समस्यते इत्यर्थो स्तु तृतीयान्तत्वकल्पने सोत्र लुक्
कल्पनेचमानाभावात् किंचैवं मन्वयेकेनेदानीं समास इति प्रश्नस्य सामर्थ्येनेत्युत्तरस्य च।
भाष्यासंगतिः श्र[illegible]तए वप्रपचतितरामित्यादौ न नित्यो गतिसमासः नन्वेवं तन्वत्नद्धारणं
यातिङ्घटितः समास इत्यस्य चारितार्थ्येन कथं तत्र सुप्सुपेत्यस्य संबंधेन तस्य ज्ञापकत्वं

न त्वहि वैकल्पिकः समास इष्यते तेन याह्निगतिकारकोपपदादितिसूत्रे कृद्ग्रहणं प्रपच
तितरामित्यत्र स्वरो न स्यात् तस्मात् कृन्मेयग्रहणं भावप्रकर्षं तत्र याक्रियामात्रार्थकमित्युक्तेन स
मासो लभ्यते तिङ्-चोदात्तवतीति सूत्रे च यदि तिङ्ग्रहणं स्यात् तेन प्रत्ययादि प्रपचतितरामिति भाष्ये
उक्तो नैव समासान्ताभावो लभ्यते ऽन्याय्यानि न समासेकदुत्तरपदप्रकृतिस्वरेशेषनिघातेनैव प्रश
त्वस्य निघातस्य सिद्धेस्तत्संगतिः स्पष्टैवेति चेन्न एतत्संगतं ह्येवा तिङ्ग्रहणेन प्राचीनपठितप
रिभाषानुरोधेन सूत्रद्वयविषये तदसंबंधज्ञापनमिति भाष्याशयस्य नैवानाहतेः एवं च तत्रोदा
त्तवनागतिमतेतिवार्त्तिकेन समासः तत्र तिङ्पदं तिङ्घटितोपलक्षणं उक्तभाष्यप्रामाण्या
त् तस्य च सुप्सुपेत्यत्रापि च पाठात् तत्सुरूपत्व तदभावश्चवैकल्पिकत्वं चेति सर्वभाष्यसामंजस्य
न च यत् क्रियायुक्ताः इति न्यायात् अतः उपसर्गयोः संबंधस्यान्तरंगत्वात् अनुभूयत इत्यादौ वा भेत्ति
त्कारो न्यनोत्पत्तये पूर्वं धातुरुपसर्गेण तस्यैवांगीकाराच्च गतिस्त्वेणधातुना समासः स्या
त्तथा चैकस्मृर्यादिप्रसंगः शाकलप्रतिषेधसंगाच्चेतिवाच्यं एतद्विषये पूर्वं धातुः साधनेन यु
ज्यते इति पक्षस्यांगीकारेण भाष्ये समाधानात् सामान्यतः फलव्यधिकरणव्यापारवाचित्व
मात्रियकर्मप्रत्यये सति किं तत्फलमिति विशेषजिज्ञासायां तन्निरूपणाय पश्चादुपसर्गसंबंधः ।
त्येके तदेव तस्य द्योतकत्वमिति तदाशयः इत्याहुः अत एव तस्यैतिकथ्यमपि तिङ्न्तघटित
इत्यर्थः समास इति तत्संज्ञकः समुदाय इत्यर्थः पाठान्तरं

संज्ञायां समासस्तत्पुरुषत्वायास्तु । एवं चार्थनिरपेक्षत्वात् प्रातिपदिकार्थमात्रे प्रयुक्तोऽपि तत्र सप्तमी
तत्रास्य प्रवृत्तिः । अन्यथा कर्मणि सप्तम्यभावात् तत्र कर्मोपपदसंज्ञकं भवतीत्यर्थे उप
पदाभावे अणः प्राप्तेरेवाभावेन तद्बाधकत्वार्थं न तत्र ग्रहणमित्यर्थः । एवं भाष्यमसंगतं स्या
त् । अनभिव्यक्तेरभावे वृत्ताद्येनाप्यप्रवृत्तिः । तद्धावस्थात्वेनानासिकत्वादिवक्तव्यतानुरोधेन
वनन्त्वेवमप्यप्रयुक्तस्य संज्ञायाः कर्तुमशक्यत्वात् संनियोगशिष्टत्वात् एतेनोपपदप्रयोगात्
भावे ण्वादिकं तेनित्यार्थमेव तत्र ग्रहणमिति चेत्तत्तस्य स्पष्टार्थमेवेत्यनुध्वनितं चेदं भाष्ये इत्य
लं विस्तरेण । उपपदं सुबिति प्रथमान्तमनुवर्तते तेन राजदर्शीत्यादौ न लोपादि सिध्यतीति ।
प्रांचः । अन्ये तु विभक्त्यन्तस्यैवोपपदसंज्ञकत्वेन नायं दोषः । न चैवं धान्याहारकोऽन्नमित्यत्र
समासव्यावृत्तये तत्र अत्र हि कृदन्तमित्युपपदमिति वाच्यं । अतिङिति विशेषणात्तेन समा
साभावे । अनवकाशतामर्थयोरिति सूत्रस्थभाष्यप्रामाण्येन तत्समासविधायकत्वात् न
त्र हि किं ह तत्र स्याऽनधिकारात् किं च तत्र ग्रहणानर्थक्यमित्युक्तोपपदसंज्ञार्थं तर्हि इत्या
शंक्यातिङिति प्रतिषेधात् संज्ञाऽनर्थक्यमिति सिद्धान्तितं । किंच प्रकृतसूत्रभाष्ये पि गति
रुपपदमित्यनयोः समावेशस्य निवृत्तिज्ञापनायातिङ् पदं तेन गतिकारकोपपदाना
मिति परिभाषा न कर्तव्या भवति कतं तर्हि समासः समर्थेनेत्युक्तं अतिङिति सुभयोः शेषो
योगविभागेनेति तत्र भावः तत्र गतिरिति सूत्रे उ अतिङ् इत्यस्य गतिना संबंधे फलाभावात्

धा॰ प्र॰

नविद्यतेनिङस्मिन्निति बहुव्रीहिणा समासविशेषणमेव वाच्यं एवं च तत्साहचर्यादत्रा
पि समासविशेषणत्वमेव एवं च पूर्वपदोत्तरपदयोरुभयोरपि निङन्तभिन्नत्वसिद्धेः पूर्व।
पदे पदैकार्यस्य च विभक्त्यन्तस्यैवोपपदतया सिद्धत्वाच्च प्रथमान्तस्याभवितव्यतावश्यकं +
किं च तन्निरूढत्वावपि परत्वान्तरंगत्वाभ्यांस्य प्रवृत्तेर्दुर्वारः किं च स्वार्थे परिसमाप्तस्यैवान्यत्र वि
शेषणत्वेन विशेष्यत्वेन चान्वयित्वाभिमतमिति सूत्रस्थभाष्यबोधितेन पूर्वपदे सुबुत्पत्तिं विनैका
र्थीभावस्य वक्तुमशक्यः उत्तरपदांशेनुगतिकारकोपपदानामिति प्राचीनवचनस्य ता
त्पर्यग्राहकस्य सत्वेनानिङ्ग्रहणं स्यपत्याधिकारमिव स्त्र्युत्पत्तिमपि बाधितमिति वा
धां प्रथमान्तस्य च ग्रहणं नुश्चानेकमन्यपदार्थे चार्थे द्वंद्वत्यादीनां तिङन्तप्रत्यर्थे
त्याहुः न धुनयत्राह अनिङन्तस्येति पूर्वपदत्वेनोत्तरपदत्वेन वानिङन्तघटितत्वस्यार्थः
कुंभश्रसिति ननु हरिश्रीङीतिवत्कुंभङसित्येव प्रक्रियावाक्यमुचितं अन्तरंगानपीति
न्यायेन लुकारूपसंज्ञालोपयोर्बाधादिति चेन्न रूपसंज्ञालोपबाधाबाधयोः फलविशेषा
भावेनान्तरंगानपीत्यस्याप्रवृत्यारूपसंज्ञालोपयोः समानपात् अत एव वस्तुदृष्ट्या +
साद्रूपत्यादीस्थानवत्वेनासंनत्वाद्दीर्घाद्यापादनं प्रत्ययलक्षणसूत्रस्य नियमार्थत्वं चा
श्रित्य समाधानं च भाष्योक्तं संगच्छते अन्यथा जसो लुकि स्थानिवद्भावेन जस्त्वेपि
अस्त्वाभावाद्दीर्घाप्राप्तेरिन संगतिः साप्येवमलौकिकं प्रक्रियावाक्यमित्यस्य समास

न०

रूपप्रक्रियाप्रवृत्तियोग्यंपलोकेप्रयोगार्हमित्यर्थः हरिङीत्यत्रापित्र्यनरंगत्वान्तर्हलंसंज्ञालोपयोः
कृतयोरेवसमासादिप्रवृत्तिः लोकप्रयोगानर्हत्वस्योभयत्रापिसत्वेनविशेषादकृतेनसंज्ञालो
पमेवोच्चारितमित्यलंस्पष्टाचेयंरीतिरुपसर्गादसमासेपीतिरत्वकेयरेकघोगलत्तणाच्चात्रष
ष्ठीनचांतरंगत्वाद्वितीयाप्रत्यग्रत्यत्रे: पूर्वंषष्ठ्यास्प्राप्तिश्च्युतिवाच्यंउपपत्तिनिष्पद्यमाणोप्ययं
वादरहितन्यायेनपूर्वंद्वितीयायाःप्राप्तेवस्तुतःकृत्यरुतपष्ठीकमेतयापूर्वंषष्ठीप्राप्तेस्सुधनितं।
वेदंप्रकृतस्तुत्रेषष्ठीसमासात्उपपदसमासोविप्रतिषेधेनस्यादितिभाष्यकारमतभवानितिसमा
सेसतिच्युवहितप्रयोगोनस्यादितिसूचयितुंभवानितिसस्योल्लेखः ननुसुपेत्यधिकारात्तिङंतेन
भविष्यतीत्यतआह सुपेत्यनतन्त्रेहेतिप्रयुज्यमानस्यानुवृत्तावपिच्चतत्यभावात्तदनुल्लेखः पृथक्
कृत्येतिकुप्रादयः सुवंताः सुवंतेनसमस्यंतेगतिः सुवंतोऽतिङंतेनसमस्यतइतिव्याख्येयमि
त्यर्थः अत्रमानमतिङ्ग्रहणमेवअन्यथोपपदंदकदित्येवब्रूयात्तुनत्फलंतुप्रपचतितरामप्र
पचतिदेशीयंप्रपाचतिरूपमित्यादौसमासासिद्धिः अतिएवगतिकारकोपपदात्कृदितिसूत्रे
कृत्रिमकृद्ग्रहणेऽत्रस्वरोनस्यादितिभाष्योक्तंसंगच्छतेतस्मात्तत्रकृद्ग्रहणाभावपित्रिंवेतनयात्रि
यामात्रार्थकंतद्वाचकपदेलाक्षणिकेस्वष्टार्थमुपात्तमितितत्वंप्रकृतुतिङ्ंतोत्तरपदकेस्वरा
न नेष्यतेतत्रवाहुकाक्षरणीयःनत्रुकृत्वाभावाद्वाअतएवोदात्तवत्वेत्यस्यात्रसुपूत्तपेत्यत्रचभा
ष्यपाठइत्याहुः पत्तनतिङिचोदात्तवतीसूत्रेयदितिङ्ग्रहणंक्रियतेअत्रामंतेनप्राप्तोतिप्रपचति

४३२

पु॰ प्रौ॰

433

नरामिति भाष्योक्तं विरुध्येत नित्यसमासेनयाऽकृदन्तं परं प्रकृतिस्वरं प्रोषनिघाने नैव प्रथा
कृनिघातस्य सिद्धेरिति परास्तं तन्न रूपत्वाभावे सुप्सुपेति समासस्य वैकल्पिकत्वेनासमास
पक्षे नन्तत्वान्न न चैवं माभवान्भूदिति नरामित्यादौ समासः स्यात् लुङन्तं प्रत्युपपदत्वेनाधिकारा
हतेमानाभावात् गतित्वं च क्रियायोगे प्रति नह्याचक्रं निङ्.तेमासतंचेति स्पष्टं ननु समासे प्रप
तिनरामिति इलेभेनाति समासस्य सुपः पूर्वं प्रवृत्यानाह्निनस्य च सुवंताद्युत्पत्त्यांतरं मन्वादाम:
पूर्वेतरवेनेन समासेन नः स्वाद्युत्पत्त्यावपि घातप्रकृति सुवंताभावेनामो इलेभत्वान स्याम्
विपि सुसमासे चरितार्थे चेत्र प्रामोत्यंनके स्वार्थिकनया सुवुत्पत्तेः पूर्वमेव प्रवृत्तेर्द्योप्रपस्तेत्रेड
कत्वात् इदमपि भाष्यं नत्र मानं एवं च भिन्नपदसापेक्षत्वबहिरंगसमासात्प्रागामेव न च पतित्क्रि
यापुत्र इति न्यायाद्धातूपसर्गयोः संबंधः स्यात् रंगत्वात्स्व अनुभूयत इत्यादौ कर्मणोलकारो
न्मत्र पे पूर्वं धातुरुपसर्गेणेत्यस्यैवांगीकाराच्च प्रकत्वाद्गतिरिति सूत्रेण धातुनासमासः स्या
दिति वाच्यं केवलधातोः प्रयोगानर्हत्वेन लोके घांबाधकत्वेन चासमर्थत्वात् न चक्रद्वितमपि
न तथा किंतु सुवंतमेवेति वाच्यं वचनात्तु वंशाबाधेप्यन्यबाधमानाभावादित्याहुः नन्वेवम +
पि पन्नं गतइत्यर्थे के पाचको गत इति प्रयोगे समासापत्तिः न चेष्टापत्तिः पतन्नवैपमपस्य।
भाष्यविरोधात इति चेत्र क्रियार्थोपपदक्रियायामित्युक्तेरनुभवलाद्वतत्रापि हेषणविधेयभावेनान्व
येनैकार्थीभावस्य वक्तुमशक्यत्वात्सामर्थ्याभावात् अत एवतत्र कद्विधावपि समर्थपरिभा

णायां प्रवृत्तिरित्याहुः गतिकारकोपपदानामिति कारकांशो कर्तृकरणे कृतेति सूत्रस्थं ब
हुलग्रहणं मानं बोध्यं बहुलग्रहणादेव च क्वचित्सुबुत्पत्त्यनन्तरमपि समासः यथाह्नितस्व
धनक्रीतेत्यादौ इति कैयटः एतत्तु तत्सूत्रस्थं कृद्ग्रहणं मानमिति तत्त्वकाष्टेः पचतितरा
मित्यादिव्यावर्त्यमाचारितार्थ्यात् एवं च कर्तृकरणे कृतेति सूत्रांशार्थानुवादकमत्र त्वंकार
कग्रहणमिति बोध्यं प्राक्सुबुत्पत्तेरुत्तरत्रापदेऽन्त्यर्थः पूर्वपदं तु सुबन्तमेवेति बोध्यं अ
त्र कृदितिच गत्यंशे एकदेशानुवाद इति बोध्यं परिभाषायाः फलं दर्शनं गतिमुदाह
रति व्याघ्रीतित्यादिः घ्रतीत्यर्थ आङोघ्रशब्देन गतिरिति समासे कृते पुनर्विश्राघ्रशा
ब्दे योग इति समासः न चात्र श्चोपसर्गैरन्योऽराङ उपपदत्वेन पदत्वादाङोपपद
प समासोचितः फलाभावेन तत्रोपपदसंज्ञाया अप्रवृत्तेः समासस्य स्वरस्य च गतिन्या
देव सिद्धेः अत एव कर्माण्यणि इति सूत्रे भाष्ये तूपपदत्वे नायं व्यवहृतः अस्तु वाङोपप
दसमासः विनात्र गतिसमास एव तत्र सुबन्तेन समासे बहिर्भूतसंख्यानिमित्तस्व
पत्ययान्तरंगत्वात्लिंगनिमित्तेश्चन्यपि टापि अर्थं तत्त्वाभावाज्ज्ञातिलक्षणो ङीष्न स्या
त्पूर्वं तु न ङीष्प्रध्रमाघ्रयोर्जातिवाचित्वाभावादिति भावः अश्वक्रीतीति अश्वेन क्रीते
ति कृता समासः क्रीतात्करणपूर्वादिति ङीषु सुबन्तेन समासे पूर्वं टाप्पदं तत्त्वाभावा
त्स्न स्यादित्यर्थः ककपीति कर्केन पिबतीति हेतुस्तृतीयान्तेनाधिकरणल्याघविव

पू॰ श्रो॰

434

तत्र्यांश्चाय प्रुंसनेन वोपपदसमासः तृपीति योगविभागात्कः एतेन कच्छपीत्यत्र कारक
त्सिद्धमित्यपास्तं । कृदकन्ये ष्पुपपदत्वस्याहात्यापरत्वादुपपदसमासस्यैव प्राप्नोत्यु ए
वं च षष्ठ्याः स्तनु त्यते रित्यत्र पुत्यानुवादः लिंगबोधकत्वयोत्यत्वेः प्राप्तिस्यविबोधं स्तुवि
त्यस्या संवेधनतो विपागेन तं गत्वात्समासप्रवृत्तेरितिदिक् । मिति द्विक अमैवाव्य
येणासिद्धं नियमार्थमेतत् तत्र तद्व्यतीतं देवेति सोत्रस्तेव शब्दः उपपदविशेषणत्वे स्तद
ह अमैवेति तुल्यविधानमित्यध्याहार्यं तेन यत्र तुल्यविधानत्वमाश्रित्य तत्सं तत्के
न तुल्यविधानत्वमुक्तं यस्मिन्नुपपदे येन वाक्येनाममेव विहितं तदेवोपपदमव्ययेन ।
समस्यत इत्यर्थ न फलितं तमम् अत्रामिति णमुलन्व मुन्नोः सामान्यग्रहणे तेन चोरं कार ।
मित्युपर्युदाहरणे तादृगुपपदमव्ययेनैवेति विपरीतनियमस्तु नाशंक्यः व्याख्यानात्
अव्ययेनेति किं कुंभकारः अमन्तिनस्मिन्न अमैव यत्तुल्यविधानं तदेव समस्यते पूर्वेद्यु
त्रारंभसामर्थ्यादव्ययविषय एव नियम इति चेन्न हि अमं न विषय एव किं न स्यात् अमैते
न यः समासः सोमैव तुल्यविधानस्येति एवं चाग्रेभोजमित्यत्र माभूत् अग्रे भुक्त्वा कालो
भोक्तुमित्यत्र तु स्यादेवेति भावः परं तु अमैव तुल्यविधानं यदुपपदं तदव्ययेन समस्यते
नान्येन तुल्यविधानमित्यर्थः पुनस्तदेवेति व्यर्थं फलाभावात् कालादेरमैव तुल्य
विधानत्वाभावान्नन्त्याद्धु तनीषु भउभयत्र विभाषेयं अमैव तुल्यविधानस्य प्राप्नोय ।

प्राप्ते उक्ते न्कारमा च पैर इति उदाहरणं अव्ययपदस्या मित्यनेनेति न्कारणमलोप्यत्र समासे कृदुत्तर।
पदप्रकृतिस्वरेणोत्तरपदमाद्युदात्तं तद्धितलिनीत्यनेनान्यतस्याद्दिर्णमुल्पतरस्यामित्यनेनरद
वाप्य स्नानामित्यनेनन्तरत्रिरितिमतेत्यत्र मतेष्प्रकृतिस्वरत्वस्य हरदन्तेन एवमानमित्याहुः अव्ययसमासे
नञ्ज्ञ इति प्रातिपदिकस्वरेणान्तोदात्तं + अतएव स्वरादिपाठ सनुतदादयो नान्तोदात्ता इति च
निरुक्तेनान्तयत्र स्वरादिपाठादन्तोदात्तत्वमिति तद्धितत्वं + नचनिपातत्वादाद्युदात्तं स्वरादिष्वे
तिपाठेनानत्वात् अमंतेनेति अमेत्यनुवर्त्तते इतिभावः तेनेह न पर्यायाज्ञाभाक्तु पर्याप्ति वच
नेष्वलमर्थेष्विति तुमुन् वेति पाठांतरं कृत्विमित्येकार्थीभाव स्तु प्रकृतित्वस्य योरवनाप
पदनापितस्य प्रत्ययविधौ सामान्यात्तद्ग्रहणत्वाभावादितिभावः इत्यंतं अतएव कृदंतत्वनि।
मित्तैकार्थीभावेपि समासविकल्पः अतएव यहदन्तस्य मूलकस्योपदंशानं स्पर्शनं चकृत्वा
भुंक्ते देवदत्त इति वद्यहदन्तस्य मूलकेनोपदंशं भुंक्ते स्पर्शनं च कृत्वेति प्रयोगो न उपदंश।
स्तृतीयायामित्यादौ पदगंधस्य प्रविष्टत्वेन सामर्थ्यपरिभाषायाः ...रत्वाच्च नच नित्याधि।
कारनिकारनिवृत्त्यर्थस्तः व्याख्यानादपि सिद्धेः अत्र मूलकादेरुपदंशनक्रियायां प्रयसो
दनं भुंक्ते इत्यत्रेण पसरुवकरणत्वेनान्वयात् सामर्थ्यमित्यादि कृदंतेनेति रूपयिष्यामः क्त्वा
च क्ते ति तृतीयान्तं तदाह क्त्वांतेनेति अलंकृत्वेति अलंखल्वोरिति सूत्रस्योपदंशस्तृतीयाया
मित्यलःपूर्वं पठितत्वादितिभावः अथ तत्पुरुषासाधारणसमासानाह तत्पुरुषस्यांगुलेः

त·बो·

435

ननु कथमस्यापि समासान्तापेक्षया अवयवषष्ठी द्व्यंगुलमिति तद्धितार्थेति समासः ऊर्ध्वावस्थित
शंक्वादिपरिच्छेदकत्वे द्विगोर्नित्यमिति द्व्यसचो लुक् तिर्यक्स्थितवस्तुपरिच्छेदकत्वे तु मा
त्रचो लुक् अत्र च शतिपदोऽनन्त्यात्खत्वादि दृगुरव तेन द्व्यगोरंगुलिं द्व्यंगुलिरित्यादौ नातिनिके
चित् द्वन्द्वात्पर्यमिति स्पष्टं चेदं भाष्ये अत एव द्विमंतव्यिमावहोरात्रेच छेदसीत्यादौ द्वंद्वे समासां
तनिर्देशः संगच्छते ननु कथमस्या संभवात्तु अत्वनर्थ्यगौणत्वे न संभवेति मुख्ये लाभे गौण
ग्रहणमयुक्तमित्याहुः अहोरात्र इति जातिर प्राणिनामित्येकवत्त्वे सनपुंसकमिति वा धित्वा पर
त्वादहाह्णा इति पुंस्त्वं सर्वरात्र इति पूर्वकालैकेति समासः पुंवत्कर्मधारयेति पुंवत् द्विरात्रमि
ति संख्यापूर्वं रात्रं क्लीबमिति वक्तव्यं अतिराजीति अत्र यथाङीपूर्वयाद्विदन्तिसूत्रे उक्तं च सम
सत्वरइति समासान्तानामनुत्तरपदत्वपव्वस्यानित्यत्वाद्दन उक्तं दिने निवोध्यं नान्यत्रेति न त्वहि
द्वितइत्येव सिद्धे नियमार्थमिदमिति भावः एवकारो विपरीतनियमशंकावारणाय नियमफल
त्वाह्निकमिति अद्भ्यानिर्वृत्तमिति कालाद्वित्यधिकारे तेन निर्वृत्तमिति ठञ् घ्याहीन इति समा
सांतविधेरनित्यत्वात्तु टच्च न च नांतस्य खेटिलोपविधानसामर्थ्यात्तु टच् अहीन इत्यत्र स
स्तुसावकाशत्वात् केचित्त्वत्र समासान्तेऽपि न टिलोपः यस्येति लोपसंभवात् खस्योदाहरण
त्वहीनरत्वेवेति तन्न समासान्ते ह्यहन् शब्दान्ताद्विगोरभावेन खस्यानापत्तेः अनित्यत्वादिति
अत्र च ज्ञापकं शक्तिलांगलेत्यत्र घटघटीग्रहणम् अत एव समासान्तप्रकरणे लिंगविशिष्टपरि।

भाष्ये नेनिङ्ग्रहणस्य सूत्रे भाष्योक्तं इदानीं नि टश्चिभस्यादि इति सूत्रे वन्वे टिलोपे मद्रराज्ञीति स्या
दिति भावः अत्रोक्तग्रहः सर्वैकदेशेति सूत्रे गृहीतानामेतदापरामर्शीयग्रहः शब्दग्रहण
गृह्यते नतः परत्वास्याहन्‌ शब्दे संभवात्‌ तथा ह्येकशेषेणवाधाद्वंद्वासंभव एव तन्तुग्रह
णाधिकाराच्च अत एव बहुव्रीहिणोन ननु अत्र लक्षणोक्तावयवीभूतं मानुषमहत्‌ इत्यर्थे षष्ठी
समासे संभवतीति चेन्न पाठान्तरं अनभिधानात्‌ अत एव पूर्वसूत्रे द्वंद्वाव्ययमहर्गणमिति ह
भाष्योक्तिः संगच्छते इत्याशयेनाह इत्यंतं नैहि कार्यानिमित्तत्वे नाश्रीयते इति न्यायेना
हः शास्त्रातिरिक्तानामेव ग्रहणादित्याशयेनाह सर्वादिभ्य इति समासांते षष्ठी परइति
समासांताः इत्यनुवृत्तं सत्तम्या विपरिणम्यते इति भावः नन्वेवं मूर्धसंतो नडित्यादिवत्स
मासांत एवास्तु एवं च विभक्तिविपरिणामो न कार्य इति लाघवं न च प्रत्ययत्वाद्याप्तिः ।
आदेशानां प्रत्ययत्वाभावस्य प्रत्यय इति सूत्रे निरूपितत्वादिति चेन्न टजपवादत्वाय ता
वन्मात्र इत्यादावेतो दात्तत्वानापत्तेः अव्ययपूर्वे पदे प्रकृतिस्वरेणाद्युदात्ततापत्तेः टचि तु चि
त्व सामर्थ्यात्तदंतोदात्तत्वं न चेष्टमत एवैतेभ्यः परा हत शब्दात्‌ टजपवादमच मात्रित्वान्न ह
त्वोरेवेति नियमाट्टिलोपाभावश्चेष्टस्य लोपो न इत्यल्लोपे इत्यन्हादि सिद्धिमाश्रित्याहादेशस्त्र
त्या एव्यानं भाष्योक्तं संगच्छते यथा चात्र टजेचो ङीप्टाप्टकर्तोन विशेषः स्यात्‌ अहिद्रगणेति
स्त्रबंस्यादित्रे सर्वादीनामनुवृत्तेषु सिद्धे एतेभ्य इति वचनं चानुकर्षणार्थं नेति सूत्रे तिल्लापना ।

 ष्ठेमित्याहुः पाठांतरं परेत्तु भाष्यप्रामाण्यात् समासांता इत्यनुवृत्तस्य विभक्तिविपरिणामेन मा+
नाभावाच्च सूत्रमतेप्यनेनाबाह्वादेशस्य च विधानमिति निस्तत्वमतेत्यपि ङीपः प्राप्तिरदन्तत्वा
दिति निवमात्तारणमूलकसूत्रमित्यसाभयोरप्यवश्यकत्वाद्वयमेव च भाष्याशयः कैय
टादयस्तु चिन्त्यमेवेत्याहुः सर्वादीनामनुवृत्तेवमिद्धपतेप्य इति स्पष्टार्थे इत्यन्तं अद्द्यौ
७० दंतोत् अत इत्येव पूर्वपदविशेषणं तया समासानाकारणनात्वये ऽदंतः पूर्वपदे त्यर्थेनोप
पत्राविते तयह एणमात्र प्रकरणे वर्णग्रहणेपि तदंतविधप्रभावत्तावत्तार्थं अत एव रघाभ्यां
नत्तदंतविधिः अत एव चन पुरगेत्यादि संगकत्तेइत्ति हृदन्तः रेफादित्तिषादित्यपि बोध्यं
तेन लत्तासह सिद्धिः अन्त इति नोतानुकरणेनत्व श्रीकालात्कृज्जित्ति विशेषविहितत्वेन
वृत्पुक्काणंबाधित्वा स्पैवैचित्यादित्ति भावः टावित्ति नचठंजेतत्वङीबुचितः तस्यलुप्ता
त्वात् ठञो योऽकार इति व्याख्यानेन वर्णग्रहणे पत्तया प्रत्ययलक्षणविरहात् अत एव द्विति
घेत्यादौ ङीनार्थे प्राग्वतीयस्य ठकोलुकि टावेवाकारे उदात्तः ठञो लुकीतिन्तु चिन्त्यं त्र
परिमाणादित्ति ठक एव प्राप्तेः नच टन्तनिमित्तः स्वादुर्वारः तदर्थस्य तद्धितार्थे प्रत्युपसर्ज
नत्वात् भाष्यमते चाटचोवाधनाद्धनापि द्विगोरितिङी प्रत्ययपरिमाणेनेति निषेधात् अत ए
व द्विवर्षेत्यादि सिद्धिः ननु टावपि दुर्लभः रात्रान्हाहतित्पुंस्त्वेन स्त्रीत्वाभावात् अत एव
रात्रान्हेति वचनात्तु स्त्रियां चत्वभावादजचोर्नास्ति विशेषः इत्यन्हो न्हइति सूत्रे कैय

राद्यश्चाकृतिरिति चेन्न सर्वादिषट्कपूर्वादन्हः ह्रस्वपर्यादेश्च तत्र संख्यापूर्वस्य तद्धितार्थे द्वि
गोर्विशेष्यनिघ्नत्वेन स्त्रीत्वसंभवेपि तद्धितार्थे प्रति उपसर्जनत्वाद्विदितिङीपः प्राप्तिरेव
नेति तत्र टच्चायं विशेषः स्यात् एवं पुल्लिङ्गमित्यत्रान्तमेकार्थं चेति निषेधाद्धि शेषाभावए
व सर्वाचानिषेधान्न्हादेशस्यैवेति मन्तव्यं भेदेन व्यवस्थितं + एवंच सर्वत्र टच् एवं तत्र सत्वात्तद्वि
शेषः + पुण्यसुदिनाभ्यामन्हः स्त्रीत्वमेव सर्वैकदेश संख्यानाव्ययपूर्वस्यत्तु रात्रान्हा
हात्पुंसीति वचनान्न स्त्रीत्वमेव नास्तीति कैयटाद्याशयस्त्वेनादोषान्न वद्ध्यान्हेन्यत्रापि रात्रा
न्हाहाः पुंसि तिद्वंद्वे रात्रान्हशब्दघटित समासमात्रनिमित्तलिंगस्यान्तरंगस्य सार्वत्रिकस्य
च बाधनोपपन्नौ वहिर्भूत तद्धितार्थनिमित्तलिंगबाधकत्वे मानाभावात् इति दिक् तद्धि । द्वे
तार्थे द्विगो विशेष्यनिघ्नत्वे प्रमाणं तु पुंस्त्वाधिकारे न्हाहान्ताः । बौद्धमेदा त्रान्ताः प्राग
संख्यैकाद्र्युत्वेन्त दन्तं तत्र त्र्यर्थान्ताः प्रायलशब्दान्याय त्र पूर्वापराणगाः तद्धितार्थे द्विगुः संख्या ।
सर्वनामनंदेनकार्त्यमरोक्तिरेव तत्रान्हाहान्ताः त्वेनन पुंस्त्वं प्राप्तं तद्धितार्थे द्विगुरिति
परोपगत्वे न परत्वादेव बाधात् परंविशेष्यशेषतु न्यपंशिष्टप्रयोगत इति तदुक्तेः । किंच भवा ।
द्यर्थे तद्धितान्तं परोपगमिति निर्विवादं तद्धितलोपे तु विशेष्यमाणं तु प्रमानार्थाभिधायीति
न्यायेन भवाद्यर्थे वत् स्त्रीत्वादेरप्यभिधानं न्याय्यमेव प्रकृतेर्लिंगानुशासनस्य तु न्नप्रत्यये प्र
वृत्तेः । अत एव त्वतुपिपुत्रवदिति लिंगानि दिशेषादि नार्थाः अत एव लवणः स्यपः इत्यादौ नक्ती

शा॰ शा॰ वत्वं कुमारीवाचरन्ब्राह्मणः कुमारीत्यादौ च विशेष्यनिघ्नत्वादिति दिक् + अन्ये तु एवं स।
ति सूत्रोपस्थितरात्राह्नादिशब्दार्थविशेष्यत्वशास्त्रैस्यापीत्यत्रांतरंगत्वाद्यापशास्त्रिरि
631 तिकैयटाशयः अमरस्तु व्याकरणसिद्धलिंगस्यानुवादको न त्वातंत्र्येण बोधकः न हि रोधेत्रा
तवत्पन हि तादृशे द्विगुरित्यस्य रात्राह्नाहातिरिक्तविषयत्वे त्वे वाचितमित्याहुः + ननु वह्वा
दिगणे ह्नशब्दपाठसामर्थ्यादुपसर्जनेपि तत्पुत्रोऽङीष् अत एव दीर्घाह्नीत्यादिसि
द्धिः एवं चात्रापि ङीष् दुर्वार इति चेन्न समासांते कृते ह्नशब्दांतत्वाभावात् उत्तरपदाव।
भाष्यसंमतत्वात् यवत्वस्यासार्वत्रिकत्वात् अत एव रात्राह्नाहाः पुंसि सूत्रे ह्नाहाग्रहणं चरितार्थं अन्यथा रात्राह्नी +
पुंसीत्यह्नशब्दग्रहणेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव न चाकृतसमासांते हंहेपि पुंस्त्वापत्तिः रा
त्रसाहचर्येणाकृतसमासांत एव प्रवृत्तेः तुभ्रादीनि यद्यपि भाष्यादौ पुत्वादिषु पाठ इत्युक्तं तथा
पि तस्य तु भाष्याकृतगणागतत्वमेवेति भावः ननु रूपातिरिक्तोह्नशब्दांतः समासः सर्वोपि ह्न
आदिरिति बोध्यं तथा च नयत्राह इत्यदेनानुकरणेन शकरण इति णत्वविधायकेन्हादेशविधायके च
निशेषः शेषः तत्र णत्वविधायकेषष्ठ्याः स्थानेव्यत्ययेन प्रथमा न च समासांतानामुत्तरपदा
वयवत्वपक्षे पूर्वपदात्संज्ञायामुत्तरपदत्वस्याह्नशब्देऽभावात्सात्वानायत्याद्यत न सिद्ध्येत् स चेशङ्क्य
निवाच्यं तस्यासार्वत्रिकत्वात् न चादेशस्यानानत्वेन स्पत्वं त्वनापत्तौ सामर्थ्यादाद्यकदात्रापत्तिरिति
वाच्यं उच्चारणार्थेनाप्युपदेशान्यत्वविधानेन णोगमीत्यादावि विवक्षितस्तां याप वाद्रात्तिरिति दि

लिंगस्यैवेदं वाध
कं स्यात् ननु व
हिर्भूसमाहार
विशेष्यत्वशा
त्र२

कू स्पर्शार्द्धमिति समाहारे नपुंसकत्वं त्वभावादित्याहुः एकाढकइति तद्धितार्थे द्विगुः उपर्यान्तस्यापी
ति अत एवोत्तमग्रहणं चरितार्थं पूर्वेति पात्राभ्यर्हितत्वादित्याहुः एकाढ उत्तमश्चोत्तमश्चे
ति समाहारद्वंद्वविषये कृतैकशेषेण द्वंद्वे द्विवचनं साधु अत्र यास्त्यात्र शाख्यायां किं देवदत्तस्यो। अग्र्याग्रमुख्याः
तो देवदत्तयोः उपानसमिति प्रादिसमासः अतिश्व इति तदधिकवेगवत्वादित्यर्थः सेवेति
नीचेत्यर्थः आकर्ष इति पंचांगुलो धान्यादिकर्षकः काष्ठविशेषः इत्यर्थः उपमानात्किं श्वनो
नि क्लान्तो निः श्वापल्लकसक्थमिति तत्र नटच् समः नावो मंडूकप्लुत्यानद्धितलुकीत्यनुवर्त्ततइत्या
ह नट् स्त्रीति ननु परवल्लिङ्गतया स्त्रीत्वमुचितमत आह क्लीबत्वमिति तद्धितो लिति खारीशतान्ता
द्विगोरित्यर्थः अत्राप्यनद्धितलुकीत्येव तेन द्वाभ्यां खारीभ्यां क्रीतो द्विखारी विरिति सिद्धं अर्धखार
मिति क्लीबत्वं प्राग्वत् अर्धखारीइति एकविभक्तावषष्ठ्यन्ते तिवचनादुपसर्जनत्वनिषेधे न न ह्रस्वः
ह्रस्वपाठे तु लोकात्पुंसकत्वं बोध्यं द्व्यञ्जलिमिति समाहारे द्विगुः अंजलिभ्यामिति अत्र द्वि पर्यमितधा
न्यादिनेत्यर्थः अस्य परिमाणत्वात् ठञोद्धार्थ पूर्वेति लुक् व्यवस्थितविभाषात्वात् द्वन्द्वपदद्विगो
न द्व्यंजलिप्रिय इत्यादौ तु न ब्रह्मणो जनपदे भवो ब्राह्मणपदः भावप्रधानो निर्देशः तेन ब्रह्म स
मासेनेत्यादि पुत्यासन्निलभ्यमेनत् कस्येत्याकांक्षायां सन्निधानाद्ब्रह्मण इति लभ्यते ब्रह्म
ब्रह्मसइति अधिकरणे सप्तशाब्दत्वविवक्षायां षष्ठीसमासः सप्तमीति योगविभागात्समा

४३८

शा० से

सः कश्चिन्न ज्ञानपदेति किमदेवब्रह्मानाद्रदः क्ववब्रह्मशनिर्वस्तण पर्यायो ब्रह्मण शब्दः महन्नद।
न्युत्तरपदाहितिन्न पूर्वपदस्य विशेषणं तेन नन्दंतस्य प्याप्त्वेग्रहणवत्तेति निषेधस्य प्रत्ययविधिविषय
त्वत् तेन परम महाबाहुरितिसिद्धमित्याहुः परममहत् परिमाणमिति परममहतो द्रव्यस्य प
रिमाणमिति षष्ठीतत्पुरुषो बाधः यदीष्यतइति एवं च समानाधिकरण ग्रहणं व्यर्थमिति
भावः महाबाहुरिति बहुव्रीहिः अत्र त्वभाष्यं तु प्रोचेमि भाष्य वदीपातेनिवृत्ति नत्रु
नत्रुत्युत्तरसूत्रेहृयपारेव ग्रहणादेकादशेन त्वचाल्वं न स्यादतआह ग्याहितीति ध्रुवकर्मधार
येति यद्यपि तसिलादित्वान्पुंवत्त्वं सिद्धं तथापि परत्वादेतस्थचन्निवेधादिताकतत इति आत्म
हत इति सूत्रविषये लिंगविशिष्ट परिभाषाभावस्पष्ट्या सूत्रे भाष्ये उक्तत्वादिति भावः तेन
परत्वात्पुंवत्त्वं श्रे बाधित्वात्वं स्यादिति न शंक्यं एतेन पदस्मिन् महतीभक्तिर्भाताविति श्रीहर्ष
प्रयोगो व्याख्यातः भक्ति शब्दस्य प्रियादिषु पाठेनापुंवद्भावात् अमहान्महान् भवति महन्त
भूतस्वंद्रमा इत्यादौ गणत्वादात्वं नेति स्पष्टं भाष्ये यस्यानुपचरितं महत्त्वं स मुख्योऽर्थः अत्रेते
न च पूर्वावस्थ उपचरितो नत्राव स्थाऽर्थात्माभिधीयते इति महत्त्व ममहत्त्वमुपचरितमितिगौ।
णार्थाभिधायी महच्छब्द इति केयटः पाठांतरं यद्यपि यत स्थनिपातत्वा घोनकत्वं तथापि द्यो
त्यर्थमादायैव सामानाधिकरण्यं बोध्यं अतएव महद्भूतां ब्राह्मणीत्यत्र पुंवत्त्व गोमती त्यत्रेत
त्वं न तु घत्व यन्त लक्षण सूत्रस्य प्रयोगादेव न पुंयत्त इति बोध्यं इत्यत्र महतो महत्त्वावति

श्री

पुंवद्भावश्चेति चकारोन्वाचयइति भावः केचित्तु समुच्चये च शब्दः तेन पुंवद्भावसंनियोगेनैवान
मतएव भाष्ये स्त्रियामेवोदाहृतमित्याहुः अष्टन इति कपालेऽन्तरपदे हविषि वाच्ये ष्टन आत्वं
वक्तव्यमित्यर्थः अष्टाकपाल इति संस्कृतं भक्षा इत्यणो द्विगोरिति लुक् हविषीति किं अ
ष्टाकपालं समाहारे द्विगुः पात्रादित्वाद स्त्रीत्वं तत्पुरुषस्य च संभवेनान्यसमासे समासांता
प्रसक्ते राह बहुव्रीहाव पीति अपीत्यस्य प्रकृत्यंतराद् इत्यादिः एतेनास्य साधारणत्वाद् बहु
व्रीहाव पीति चिंत्यपास्तं तत्पुरुषएव टच् समासांतः सुलभ इति न एतेन बहुव्रीहावप्यच्
समासांतः सुलभ इत्यपास्तं समाहार इति अत्र पक्षे गो[illegible]रतद्धितेति टजिति भावः द्वंदश्चेति
न च द्वंद्वे चत्र पक्षे विद्वंद्वे किमिति नोदाहृतं प्रथमोपस्थितत्वादिति चेन्न अत्राभिधाने नैका
दिनवंतानां परस्परं द्वंद्वे तत्पुरुषसमासाभावात् ध्वनितं चेदं चार्थे द्वंद्व इति सूत्रे शेषभाष्ये द्वंद्वेक
योरित्यत्र तु समोत्तत्वान्न दोषः द्वाविंशतिरित्यादौ इतरेतरयोगद्वंद्वे तु न अनभिधानात् इत्य
पि न चैवं ध्वनितं समाहारद्वंद्वे तु त्वं तु लोकादिति बोध्यं द्व्यधिकादशेति अत एव संख्यायास्तत्पुरु
षस्य डच् उपसंख्यानमन्यत्राधिकलोपात् त्रिंशाद्यर्थमिति वार्त्तिके एकाधिका विंशतिरिति भाष्या
र्थं संगच्छते एकाधिके नि बहुव्रीहिः एकाभिन्नअधिकसंबंधिनीति वार्थः संख्यासंख्येय
वान्यपदार्थे तस्य चांतरपदार्थविंशत्यादावभेदान्वयः न चैकाधिकपदेनैकविंशतित्वा
तदभेदश्च विंशातो बाधितइति वाच्यं एकाभिन्नाधिकसंबंधिनीत्येवन्मात्रबोधेनातत्वेतः एकाद

पा° प्रो°

439

यश्च वर्त्तिविषये संख्यापरत्वमपि स्यादित्याह न: संख्या संख्येय इति कोऽर्थः स्वसमस्तपरः प्रधानपर्या।
श्च प्रयोगाद्दृश्यं अन्तरेण एकविंशतिर्गाव इत्युभयमपि सिद्धं एवं च द्वे पूर्वपदप्रकृतिस्वरत्वे सं
ख्यात्वेनेन तत्पुरुषत्वं नोदात्तत्वमिति समासभेदेन स्वरभेदो बाध्य इत्याहुः अत्र चान्त्ययः संधि।
वेलादिषु त्रयोदशीप्रभृतिषूपायनसो नोयमादेश इति ध्वनयन्नाह त्रयस्त्र्यादिति विभाषा चत्वा
रिंशादिति सूत्रे भाष्ये स्पष्टमेतत् तस्मुजर्थे इति संख्याव्ययासन्नेति समासः स्वज्ञर्थे स्वच्छनावं
तर्भावात्तन्न प्रयोगः विभाषाप्यवहितं न च ष्टन्सं वंधाय सर्वेषामित्युक्तिः एकादिश्चैकस्य चादुक्।
जिति केदः अकारोच्चारणसामर्थ्यात्तद्रूपं न अत्र चैकशब्दः संख्यावाचक एव प्रसिद्धत्वात्
गृहीत इत्याहुः धासूत्रेति नानाधिकरणवाचिनः संख्याया विधार्थे धा अधिकरणविचा
ले च तस्यैव ग्रहणमिति बोधयितुं बहुवचनं तेनेह न षट्टूद धातीति षड्धा अतानानुपसर्गे
कः स्त्रियां टापू नपदांतादिति ष्टुत्वेन अन्यथोत्तरपदाधिकारात् प्रत्यया प्रत्यययोरित्यादिप
रिभाषां बाधित्वा तस्यैव ग्रहणं स्यात् अनेनोक्तस्यैव विकल्पः तेन ष्टुत्वं नित्यमेव अत एव भाष्ये।
धासु वा उत्तरपदादेष्टुत्वं चेति वचनरूपं पठितं अत्र पदशब्दो बोधकपरः तेन पदे ष्टुत्वं वेति के
परः पक्षे उत्त्व पक्षे नित्यं ष्टुत्वमिति हरदत्तेनोक्तं तत्र संनिपातपरिभाषान्यायेन वसिद्धत्वमवच
नारंभे वर्णितम्यत्वेः मूले षड्धेति क्वचित्कोपपाठः संनिपातपरिभाषान्यायसिद्धार्थकथन
मेव तद्वचनमिति वा हरदत्ताशयः षोडनिति षड्दंता अस्यांतिवहुव्रीहि हि वयसि दंत इति

पा

द्वन्द्वादेशाः दर्दं च एषोदरादिसूत्रे भाष्ये स्पष्टं परवल्लिंगं द्वंद्वपद मितरेतरयोगविषयं समाहारे
सनपुंसकमित्यपवादस्यावकाशमात्रत्वात् तत्र पदावयवार्थव्यतिरिक्तः उक्तावयवभेदः समु
दायो द्वंद्वार्थः स चावयववल्लिंगेन लिंगवानिति मतं अवयवार्थाविवक्षापेक्षितत्परस्यैव द्वंद्वार्थत्व
निबामनं उभयथापि लिंगानियमे प्राप्ते नियमार्थमिदं तत्रोत्यकेवलाकेवलावस्थाभेदाश्रये
णाभेदमाश्रित्य वत्तेरुपपत्तिः आद्येनाश्रयभेदाल्लिंगभेदाश्रयो वस्तितिनियामकं तत्पुरुषे तत्पु
रुषपदार्थप्रधानेऽर्थेपि पत्यादौ परवल्लिंगाप्राप्तेर्विध्यर्थमेव द्वंद्वतत्पुरुषयोरिति षष्ठीनस
प्तमी तथा हि सति द्वंद्वे तत्पुरुषे च यत्परपदं तत्सदृशलिंगं भवतीति परपदात्पूर्वपदस्ये
व स्यात् तथा च मयूरीकुक्कुटाविमौ अत्र पूर्वपदे ङीषु श्रवणं न स्यात् तदर्थं परं अतएवा
वे नुप्रयोगे तल्लिंगसिद्धिरित्याशयेनाह परपदस्येति परपदार्थस्येवेत्यर्थः उपमेये षष्ठीदृष्टा
नापि द्वंद्वितिरपि नदंतादेवेतिभावः द्विगुप्राप्तापन्नेति यद्यपि अत्र भाष्ये द्विगुग्रहणं न दृश्यते
तथापि द्विगुरेकवचनमिति सूत्रे पंचकपालीपंचकपालानीतिभाष्यप्रयोगादेन द्वार्तिकप्र
त्याख्यानपरभाष्यप्रामाण्याच्च एकविभक्तीतिसूत्रस्थकैयटप्रामाण्याच्च तस्यापि ग्रहणं व
स्तुतो द्विगुग्रहणं व्यर्थम् परवल्लिंगमित्यस्यान्तरंगत्वेन निपातोपस्थितिकत्वेन च द्वंद्वतत्
पुरुषसंज्ञकशब्दमात्रनिमित्तकलिंगबाधकतापाएवमुक्तत्वादिति बोध्यं किंच परपदोप
स्थितपूर्वपदस्य युक्तलिंगस्यैवेदं बाधकं अत एव भाष्ये तत्पुरुषश्चापि कः प्रयोजनमिति प्रश्ने

द्वंद्वतत्पुरुषयो
रितिचार्थपरं प्रा
धान्यर्थयोरभेदा
च्च तथा निर्देशः

प्रा॰ शे॰ ५५०

पूर्वपदार्थप्रधान एकदेशिसमासस्तत्पुरुषत्वरिं तत्तत्पुरुषपदस्थाने एकदेशिग्रहणं कृत्वा निषेधः
वार्त्तिकं प्रत्याख्यातं चेति दिक् अत एव ज्ञापकादिति कुस्तुभे आदिग्रहणस्य प्रकारार्थत्वं व्याख्या
य समासः कार्य इति भावः न च तस्य नित्यसमासत्वात् वाक्यानुपपत्तिः अत्र शाब्दप्रयोगे च चतुर्थीवि
धानसामर्थ्येन तस्याप्युपपत्तेः एतेनैव विभक्तिश्चेति सूत्रे लंकुमारिरिति भाष्यं पर्यादयो ग्लाना
र्थे इति समास इति कैयटस्य व्याख्यातः पुनः कुग्रादिग्रहणाद्बलात् तिप्रसंगः तेनास्य क्वाचित्क
त्वकल्पनात् केचित्तु अत एवापूर्वपदस्य समासोऽप्यस्तीत्याहुः गतिसमासपदं च गतेः समासो
यस्मिन्निति बहुव्रीहिणा कुगतीति सूत्रपरं तत्रान्यत्र फलाभावात् प्रादि परमेवेत्याशयेनोदा
हृ इति नि कौशांबिरिति अत्र तंत्रमिति नियमेन एव पूर्ववद्ग्रहणं चरितार्थं अन्यथा निपातनादेव
सिद्धे किं तेनेति ननु समुदायस्य पूर्ववल्लिंगत्वेपि स्वाश्रयस्त्रीत्वानिवर्तनात् वडवा शब्दे टापः अ
वणप्रसंगः अतिदेशास्तु शासितत्वप्रवृत्त्यानुप्रयोगे विशेषणे च चरितार्थ इति चेन्न इहैव वा
निपातनादश्ववडव पूर्वापराधरोत्तराणामिति निर्देशाच्च न त्रिवृत्तेः अत एवाहाश्ववडवावि
ति निर्देशः संगच्छते अन्यथास्यानुपसर्जनस्त्रीप्रत्ययेनतदादिनियमाभावेनाश्ववडवेति
स्यादित्याहुः सत्रान्हाह्ने तत्पुरुषग्रहणानुवृत्तिमभिप्रेत्याह एतदंतावितिदं सूत्रं
शास्त्रायत्रालं प्रादिसमासेप्यपि प्रवर्तेते अत एव परवल्लिंगमिति सूत्रे एकदेशिग्रहणं कृ
ताद्विगुप्राप्तेत्यादि प्रत्याख्यानं भाष्योक्तं संगच्छते न च तत्पुरुषस्यैकदेशिसमास

राम॰ ५५॰

मात्रविषयकत्वेनेति वाच्यं अहरहः एवैवं पर्य्यापत्तेः पुण्यसुदिनाभ्यामित्यस्यैव पर्य्यायत्वे अस्य सर्वो
ऽह्नः शान्तस्तु नस्यासिद्धापत्तेरस्य च एतेन यत्र द्विगुप्राप्तेत्यादिना परवल्लिंगं द्वंद्वेन तत्पुरुषयोरिति
लगोर्निषिद्धं तत्र नदपवादरात्राह्नाहाः पुंसि इत्यादेरप्रवृत्तिरिति माधवोक्तमपास्तं तद्धितार्थे द्वि
गोरनुपपत्त्यास्य न प्रवृत्तिस्तत्रोक्तेः यत्तु रात्रादीनामेवानेन पुंस्त्वं न द्वंद्वस्यानुपारवल्लिंगमित्येव
सिद्धमिति तन्न द्व्यहः त्र्यहः स्त्रीत्वं तु त्रिंशदहोरात्रो मासेन स्यादहोरात्रः इत्यादौ समाहारे नपुंस
कत्वापत्तेः तस्य परवल्लिंगतापवादत्वात् [illegible] अह इति अकारान्तो नरपदे इत्यस्यापवादत्वं नपुंसकमि
ति सूत्रे भाष्ये पठितत्वेनेतरः परत्वेऽपि तेनास्य बाधः लघुत्वरात्राह्नाहः शब्दस्य परनिपाते
न परबाधकत्वस्यापि विलापनादित्याहुः सर्व्वापूर्वमिति अपरपुरायाहोनपुंसकं संख्या
पूर्वा रात्रिरिति लिंगानुशासनमूलकोपमर्थोनित्तवान्निकुभ्रमितव्यं गणपाठमिति समाहारे तत्पु
रुषः न च भविष्यति मर्य्यादावचनेवरस्मिन् इति सूत्रस्य त्रिंशद्रात्रः पंचदशरात्र इति भाष्यप्रयो
गो विरुध्यत इति वाच्यं त्रिंशद्रात्रयः संत्यस्मिन्निति बहुव्रीहिसत्वेनादोषात् अचप्रत्ययान्त्व वे
ति योगविभागात्समासान्तः अत एवावरशब्दादि सामानाधिकरण्येऽपि द्वंद्वेन तत्पुरुष एव तद्धि
पठि कारे लिंगानुशासनेषु तत्त्वात् एवं च द्विरात्रं त्रिरात्रमिति अस्यापवादत्वे पुंस्त्वं प्रामादिकमेव तद्धि
व धेयं तत्रापि प्रतिप्रसवविधिलाघवानुरोधात् समाहारद्विगावेव प्रवृत्तेरित्यत्र तत्पुरुष
इत्येवेति अन्हाह्नसोऽहः चर्य्यादिति भावः तत्पुरुषग्रहणात्तु अहरित्येतद्विकृतित्वादेकदेशत्वा
नाऽऽदेशं द्वादशमवादिति

तु नपुंसकत्वे [illegible] अका
रान्तोऽनरपदत्वा
भावात्

प्रा॰ शे॰ त्रकृत्याख्यानपरभाष्यविरोधाच्चायुक्तमिति बोध्यं । अप्रत्यास्त्रिय प्रोक्तिभावेति समासांतविधेः अर्थ
र्थोवहुवचनाद्याद्यर्थोवगम्यते । आकृतिगणोयं । इह केषांचिदर्थभेदेन व्यवस्थामकरंदस्य मध्यस्य
माक्षिकस्यापि वाचकः । अर्धर्चादिगणे पाठसंसुं नपुंसकयोर्मधु रिति शाश्वतात् । माध्वीके मधुनद्युपारि न्य
मराच्च । नन्वर्धनाव मर्धरवारमित्यादौ लोको । अपत्याल्लिंगस्य स्त्रियः सावशेषकत्वेनालिंगप्रकरणेऽर्थे
मितिचात् । जात्याख्यायामित्यादि सूत्रत्रयमूहवदित्युपपन्नः । इदमेव ध्वनयितुं प्रकृतानुपयुक्तान्या
पितानि व्याचष्टे । जात्याख्यायामित्यादि । प्राधान्येनाख्यायामित्यर्थः । जातिरेव पदार्थः । वाक्यदेहाघन्न
योपि व्यक्तिघटितं परंपरया ज्ञातावेव तदा ज्ञातेरेकत्वात् व्यक्तिघटितपरंपरयासंख्यान्वयमा र
नाभावान्नेदैकवचनमेव प्राप्नोतीत्ययमारंभः । अत्र पक्षे जात्याख्यायामित्युपादानसामर्थ्यात्
भिन्नपिंडविषया जातिर्गृह्यते न त्वेवस्याभेदानुगता एकव्यक्तिविषया डित्थत्वादि जातिरिति केचि
रः । यदापि स्वाश्रयसमवेतत्वेन द्वित्वादिकमपि ज्ञातौ स्वीकृत्याद्विवचनाद्युपपत्तिरिति मतं तदा
पि तथैकत्वविवक्षायामेकवचनादीति द्विवचनाद्यपवादोयं जाति निष्ठतोरभेदाध्यवसायात्तद्गत
लिंगसंख्याभ्यां योग इति मते पि द्वितीयपक्षोक्तमेव सूत्रस्य प्रयोजनं बोध्यं यदापि व्यक्तेरादेया पृ
त्तिरिति मतं तथापि तथैकत्वविवक्षायां बहुवचनार्थमिदमारब्धव्यं पूर्वमतेपि द्वयेकयोरित्यादेरप्र
मर्थः । ज्ञाने रेकायाश्चयसंबंधविवक्षायो जातिसूचनायावाबोध इति यदापि जातिविशिष्टव्यक्तौ राम
शक्तिर्व्यक्तिविशिष्टजातौ वा व्यक्तिजात्योरुभयोः शक्तिः विशेषणविशेष्यभावे कामचार इति वा ४५२

मतं तदापि ज्ञातो संख्यान्यविवक्षायामित्यर्थः केवलव्यक्तावेव शक्तिः जातेरुपलक्षणत्वेनयाश्र
श्रयणात् तावकेदकत्वान्न जातिप्रसंग इति मतेपि सूत्रमावश्यकं यस्मिन्वने एक एवाम्रवृक्षस्तत्र न ल
क्षणया जातिपरत्वे आम्राः सन्तीति प्रयोगसाधुत्वार्थं सर्वं चैतत्पक्षाः सन्तु एव तत्र भाष्ये स्पष्टास्तन्मह
शां एतद्धि द्विर्न बहुवचनस्यैवैकत्वमेवार्थः एकस्मिन्नर्थे वर्तमानः शब्दो बहुवत्प्रतिपादकः शब्दो
भवतीति व्याख्यानादतिदेशोयं न स्फलितमाह एकोप्यर्थ इत्यादि अत्राप्येकत्वेर्थे बहुत्वप्रयु
क्तं कार्यमतिदिश्यते इत्ययमपि कार्यातिदेश एव यत्वर्थातिदेशोयमिति मतं तत्र अतिदेशवाक्येव
तिप्रकृतिवाच्यार्थनिष्ठधर्माणामतिदेशस्य बालस्य तावत् त्वमिव पद्य इति लोके स्थानिवदादेश इति
शास्त्रे दृष्टत्वेनार्थातिदेशस्योक्तिसंभवाभावात् स्थानिवत्सूत्रस्य स्थप्रकृतसूत्रस्य चार्थातिदे
शास्तिद्धमिति भाष्यस्यार्थप्रयुक्तकार्यातिदेशास्तिद्धमित्यर्थे इतिनन्तद्धि रोधः अतिदेशपक्षेत
र्थीबहुवचन चतुर्थ्येकवचनादौ स्थानिवद्भावेन एकवचनप्रयुक्तकार्यापत्तिः सप्तमीनिर्देशेन तस्याप्तिसंभवा
भावाच्च न चैकस्मिन्नर्थे एकवचनापवादतया बहुवचनविधानमस्त्विति वाच्यं तर्हि शोभनापि बहु
वचनसाधुत्वायातिदेशे गौरवमित्याहुः यद्यपि अत्र भाष्ये गार्ग्यो गार्ग्यत्वमेकत्वमित्युक्तं य
द्यपि गर्गापत्यत्वेनैकं सर्वेषु तदपत्येषु तथापि गर्गापत्यत्वहेतुत्वमखंडोपाधिरूपमेकमिति तदा
शयः सविशेषणस्येति अनुवादरूपविशेषणसहितस्येत्यर्थः तेन त्वं राजा वयमप्युपास्तित
गुरुत्वज्ञानाभिमानो न नारूपतिसिद्धं अत्रोत्तत्वस्य विधेयत्वादिति हरदत्तः अस्मत्कर्तृस्योच्चारणे त्वसद

शा॰ ष्टो॰ ५५२

शालङ्गायिकन्या दहूत्वं साधु एतेनास्माकं त्वमनोरथो परविनन्द्र्यसाद वापीतटक्रीडाकाननकेलि।
कौतुकं तुषामित्याद्यपि व्याख्यातम् अवार्त्तिकं तु मुख्यार्थबहुवचनस्यासाधुत्वायेत्यपरे अन्ये नैवाहु
देवदत्तो ब्रवीति अहं गार्ग्यो ब्रवीमीत्यादाव पिनिषेधः अत्रोत्तमपुरुषानुरोधात् अहमित्यस्यैव वि
शेष्यं कोर्थ्यं फल्गुनी हस्ते नक्षत्र इति पञ्चम्यामाह्निवचनं नक्षत्रे यद्यभिधीयेत इत्यर्थः चेनद्वयोरि
त्यनुकृष्य ते तदाह द्वित्वे तदाह इत्यादि फल्गुन्यो माणविक इति फल्गुन्योर्जात इत्यर्थः फल्गु
न्यषाढाभ्यां टानाविति टित्वान्ङीपूर्वकस्यां तु तारायां नेमौ अष्टौ षु पुंस्येते उद्गताव यव भेदसमु
दायएव इत्यादित्याह तिष्यपुनर्वस्वोः पूर्वत्र चानुकृष्टत्वाचकंदसीति नसंबध्यते तिष्यएकः
पुनर्वसू द्वौ अत एव कंदसि पुनर्वस्वोरेकवचनमिति संगच्छते एतेन पुनर्वसू शब्दस्य तारा
वत्तु रूपवाचकत्वमित्यपास्तं एकत्रपि मा प्रेन ताराद्वय एव नक्षत्रत्वांगीकारात् तदाह तिष्य
श्च पुनर्वसू चेति नक्षत्रद्वन्द्वे वर्त्तमाने नक्षत्रद्वन्द्वे इत्युक्तिः पर्यायद्वन्द्वार्थो तेन सिध्य पुनर्वसू इत्यपि
तिष्यपुनर्वस्वोः शब्दयोरभेदे यन्न सचेव वर्त्तमानो योन नक्षत्रशब्दानां द्वन्द्व इति व्याख्यानात् विष्णावे
ति विष्णावोश्चानुराधाश्चेति द्वन्द्वः माणवकाः इतिन नक्षत्रेण पुंक्काः इत्यणोनुवविष्णावइतिलुपि
ज्ञातार्थे संधि वेलेत्यणितस्यश्च विष्टाफल्गुन्यनुराधेत्यादिनालुक् माणवक इति रूपं नक्षत्र
वृत्तिः ननु नक्षत्र समासे इति वक्तव्ये द्वन्द्व इति विशेषनिर्देशोव्यर्थः बहुव्रणमानिर्दिष्टमित्य राम
तो मंडूकप्लुत्यानुवर्त्तनीयमिति चेत्र पास्तिष्यश्चलो पुनर्वसू यषामिति तिष्यपुनर्वसवः

त्तिष्ठादयो वयवभूताविग्रहार्थाः तेषामेव विपर्यासबुद्धिविषयाणामुद्भूतावयवभेदः समु
दायः समासार्थः भाष्यस्थोन्मुग्धारत्यस्यापि विपर्यासविषयार्थत्वेवार्थः अन्यथा पुरु
षाणामन्यपदार्थत्वेन तत्र समासाभावेनाधाम्याऽऽसंगतत्वापत्तिः बहुवचनस्यकिमु
दं तिष्यपुनर्वसू समाहारद्वंद्वः इदमेवज्ञापयति सर्वो द्वंद्वो विभाषयैकवदिति अत एव समा
हारश्चेत्यादिर्नपुंसकानामेवेति द्वंद्वश्चेत्यादीनां नार्थ इत्याहुः एतत्सूत्रं च तत्त्वमपि व्याख्यार्थमु
क्तातो संख्यान्वये एकवचनस्य व्यक्तौ च तदनयेव्याक्तिगतपरंपरया ज्ञातो वाच्यत्वान्वये न च
बहुवचनस्यासिद्धत्वात् अग्निमारुतपि विग्रहार्थानिश्चयापोः कथं पतेति पूर्वं गुरवइत्यादौ शक्तिग
तपकृत्यारोपे तो वा वयव व बहुत्वारोपेणैव चैतन्निष्ठ पूर्वारोपे तो वसिद्धेः मुख्यार्थे पा
घटंगावयंवृषमइति त्वनभिधानान्नेति बोध्यं स्पष्टप्रतिपत्यर्थमिति चेल्लिंगानुशासनमपि
तथेति भावः केचित्तु कालोपसर्जने च तुल्यमित्यत्र एषापि तुल्यपदानुवृत्त्या सूत्रकृतैवप्र
त्याख्यातमेतत् प्रधानप्रत्ययार्थवचनेनेदमपि तुल्यमित्यर्थात् अत एव छंदयोगिता त्वैवं
प्रकरणेन कृतं एकशेषप्रकरणे प्यनुवृत्त्या तत्प्रत्याख्यानमपि सूत्रसंमतमित्याहुः परंतु
भाष्यानुक्तमिदं सत नपुंसकत्वेनाविशेषात् समाहारे द्विगुर्द्वंद्वश्च परामृश्यते अत एव द्विगु
रेकवचनमिति सूत्रं सार्थकं तदाह समाहारे इत्यादि आकारांतेति अत्रापि द्विगुः समाहारद्वि
गुरेव सनपुंसकमित्यपवादत्वात् इदमेव ध्वनयितुं मयपथमित्यत्र भाष्ये पठितान्यपीमानि

प्रा॰ प्रो
443

मूलकत्वात्र पठितानीति बोध्यं पात्रादीति आकृतिगणोयं स्त्रीत्वमिति शेषः अत्र सूत्र भाष्ये प
ठ्यते इति बहुव्रीहेश्च सूत्रस्थ कैयटस्वरसः त्रिसूत्रीत्यादिप्रयोगदर्शनात्स्त्रीत्वमिदमित्यन्ये
भाष्ये तु पात्रादिभ्यः प्रतिषेध इति पठितं तादर्थ्ये चतुर्थ्ये षा या चतुर्थी तादिप्रयोगसिद्ध्य इति त
दर्थः तदा त्रिसूत्रीत्यादौ न दोषः बहुसूत्र शब्दे सैव तत्र पाठान्तु इत्यप्रयोगात् प्रशस्तास्त्वि।
त्यर्थः देवत्वेत्यादि रात्राह्नाह इति पुंस्त्वापवादः सुदिनाहमिति सुदिन शब्दः प्रशस्तवाची
सुदिनास्त्र समासकार्यमन्तदिति प्रयोगात् प्रशस्तास्त्वित्यर्थः पथः संख्याकृतसमासांता
इति अपथमिति सूत्रे भाष्ये पठितत्वेन रात्राह्नाह इत्यादि साहचर्येण यथा इति प्रथमा निर्देशेन
चेदं लभ्यते रहा वायमाहचर्यात् संख्यां पूर्वपि प्रति पदोक्तं भाषा न प्रवर्तते न घ्नन पत्राह्न व प॰रि
पालौ पंथ्याकक्ष्यूविति समासांत पाठांतरं चेदनलिंगस्य लोकाश्रयत्वात् यत्तु परवल्लिंगता
पवादत्वादिदं तन्न तु रूप एव तेन विपथ्येति बहुव्रीहौ नपुंसके निपथ्येत्यादौ च न हि गुणप्रत्यादिना पा
। परवल्लिंगताबाधीः प्रतिषेधादिनिमापवस्तत्रैव अपवादत्वान्न तु रूप एव प्रवृत्तिरेव प्रवृत्तिस्तत्रैव
प्रवृत्तौ चापवादत्वमित्यन्योन्याश्रयात् भाष्योक्तरीत्या परवल्लिंगत्वप्रत्याख्यानेन तदपवादत्वा
संभवाच्च इत्यंतं इदमप्यपथमिति सूत्रवत् नतु रूप एव तेन विपथ्यानगरीत्यादौ न तत्ता
दृचपोडुत्तरपदार्थप्रधान एव तेन पथ्यानमतिक्रीतानतिपथ्येति एव एवं चावश्यकत्वादनेनै।
वसिद्धेः पथंनपुंसकमिति सूत्रं न कार्यं वाटः पथपथ मार्गः स्यादिति कोशप्रामाण्यादकारा राम

नोपि प्रयोगानाविन्यतः परस्मैपदिनः मतांतरेऽप्यात्मनेपदिनो वा निष्पन्नः पच्यपचाह्नः पाच्यपर्यो
यः तेन समासे विपर्यासोऽपि पचः काप्यपच इत्यादिषु स्त्वमेव कर्मपर्यायः वदर्थे चेति कादेशः कृत्वा ।
यांत्वर्थेतः पर्यवसानबोध्यमित्याहुः सामान्येन नपुंसकमिति इदं च दोडिनापनेति सूत्रे
भाष्ये स्पष्टं तत्र हि लिंगसर्वनाम नपुंसकमित्युक्तं अनियतलिंगविषयमेतत् तेनादिं
पचतिस्त्रादिः पचतीत्येवमाद्य पाकानुकूला क्रियेत्याद्यस्यार्थः आद्या पाकानुकूला क्रि ।
येति चान्वयार्थः फलविशेषणत्वे द्वितीयाप्राप्तावपि व्यापारविशेषणत्वेन तदप्राप्तेः विशेष्यवि
ष्यसंनिधाने लिंगसर्वनाम्नो नपुंसकस्यान्याय्यत्वात् न्यायसिद्धमेतत् अनेनैव क्रियाविशे
षणानां क्लीबत्वसिद्धेः क्रिविशेषणानां द्वितीयांतत्वं नपुंसकत्वं चेति परिभाषासु पठ्यमानं
पूर्वमुभाष्यादावपठितत्वाच्च द्वितीयांतत्वमित्यंशोऽपि न्यायसिद्धः धात्वर्थभागानां प्रति फलां
शस्य कर्मत्वात्तत्सामानाधिकरण्येन क्रियाविशेषणाद्वितीयासिद्धेः अत एव पक्कत्वावित्यादौ
कारकपूर्वत्वाद्यणपचनविक्लित्यादेः करणत्वेनान्वयस्तत्र तद्विशेषणेऽपि तृतीयैव यथौद ।
नं स्तोकेन पचतीति स्तोकविक्लित्योदनं निष्पादयतीत्यर्थः द्वितीयांतत्वस्य वाचनिकत्वे तु तृती
याद्युर्लभैव स्यात् तत्रिकामः स्तोकेनौदनं पचतीत्यादौ तु तत्स्मादेश्यकः स्तोकविक्लित्तिकरण
कओदनकर्मकः पाक इति बोधः अत्र तु स्यादेकदेशपतया भावनाविशेषणत्वेऽपि धात्वर्थान्त ।
फलतत्वप्रागालित्वान्यतरत्वाभावात् न द्वितीयात्वत्र प्रयोजकं कर्मत्वं तेन न कदाचिदपि तृ

पा॰प्रा॰ पिं पचतीति प्रयोगः कामप्राद्दूश्चोदेश्यत्वेनान्वये नान्यर्थग्राहकः अत एवेदृशानां कामप्रा
दीनां नैवोक्त द्विकर्मकधातुयोगश्च संगच्छते केषांचिदेषु कर्मत्वव्यवहारस्तु उद्देश्यत्वसा
५५५ मान्यात् अन्ये तु तत्तद्विषयकामनावत्कर्मकः पाककृत्येव बोधः तस्य च कामनावत्तया
अप्रतीतसंबंधेनान्वयेन न हूनीकायोग्प्रयोजकत्वलाभे उद्देश्यकोत्वसंबंधोपादानमित्याहुः
ज्योतिष्टोमेन भक्ति पूर्वं यजेतेत्यादौ तु भावनाविशेषणत्वेन न तुर्यसकत्वं प्रथमांतत्वं च भ।
क्तिपूर्वमित्यस्य संदर्शनप्रार्थनादिमिद्योप्यमानात्वान्नक्रियायाः कृत्रिमकर्मत्वविवक्षायां तु न हि।
प्राघएत्यादिनीयान्तत्वमिति बोध्यं यत्रेदं बोध्यं भावे चाकर्मकेभ्य इत्यादौ कर्त्रादिसाहचर्येण कर्म
णोपि धात्वर्थभेदेनान्वयिनस्तंडुलादेरेव ग्रहणमतो न तस्मिन् कर्मणि लादयो नापि लोके पा
कइत्यादौ कर्त्रादिसाहचर्येण कर्मणोपि धात्वर्थभेदेनान्वयिनस्तंडुलादेरेव ग्रहणमतो न तस्मिन्
लादयो नापि लोके पाक इत्यापि षष्ठीत्यादीति यत्र तु पाकं पचतीत्यादौ पचिना यत्न रूपेणाप्रती
तिः स्वेनैव रूपेण शाब्दान्वयांत प्रतीतस्य कर्मणा कर्मणः सामान्यविशेषभावेन धात्वर्थकर्मणा
दान्व भेदेन पैलत्वे तस्मिन् कर्मणि लकारो भवत्येव पाकः पच्यते इत्यादौ ध्वनितं चेदं कवत्कर्मणेति
सूत्रभाष्य इति स्पष्टमस्मिन् सूत्रभाष्यप्रदीपयोरनेन तत्पुरुषोनस्समासकर्मधारयमिनस्तत्तु
रूपेवक्ष्यमाणतत्कार्यभागिति सूत्रार्थः एवं च लिंगमिति यावत् पदमधिकारः संज्ञया अनादि राम॰
रिह संज्ञा साचोपशीनरेभु तत्पुरुषमित्रान नस्समासनूपाकर्मधारयनित्राचन संभवतीति ना

त्राधिकारप्रयोजनम् इदं प्रकरणं परवल्लिंगतायाविशेषो ऽनित्यतायाश्चापवादः उपज्ञोपक्रमास्तेनेहशस्त्रे
विवक्षैव शास्त्रस्य त्वन्नैव नियामिका न वस्तुस्थितिरिति बोध्यते तेन नन्दोपक्रमं मानमित्याद्यपि सिध्यति इह च
षष्ठीतत्पुरुषं विनात दादित्वासंभवत्यपात्राधिकारफलम् उपज्ञापनं इत्युपज्ञाकर्मणेपे उ· यत्तु भावेउ· लक्षण
यासामानाधिकरण्यमिति तन्न पाणिन्युपज्ञं व्याकरणमित्यस्यापत्तेः किंच प्रातिपदिकस्य लक्षणं यात्र
भिधानं च कृत्त्वेद्धितसमासैरिति परिगणने वार्त्तिककारमते षष्ठीउ योगाप्रत्ययस्यैव लक्षणायात्र कर्मस्यैवाउ
चितः पाणिनेरुपज्ञेति कर्त्तरि षष्ठ्याः समासः उपक्रमे कर्मणि घञ् पाणिनिसंबंधाद्यापज्ञाविषय इति बोधः
छायाया बाहुल्ये सति याछाया न ह्यचीयप्रछायांतस्तत्पुरुषस्यार्थः नत्र कस्य बाहुल्यमित्यपेक्षायामाव
रकद्रव्यनिमित्तत्वाच्छायायास्तद्बाहुल्यमिति गम्यते तच्च पूर्वपदार्थभूतमेवेत्याशयेनाह पूर्वपदार्थेतिस्त्र
न एवात्रापि नाधिकारफलम् पूर्वपदार्थबाहुल्यस्य षष्ठीतत्पुरुष एव संभवात् पर्यायस्यैवेति पर्यायव
चनस्येति वक्तव्ये पर्यस्येत्युक्तिः सत्यासत्यभामेति वत्नामैकदेशग्रहणमित्याहुः स्वरूपं चेदं स्वं रूपमिति स्त
त्रभाष्ये एवकारेण स्वरूपस्य विशेषणं च व्यावृत्तिः नृपतिसभामगमन्नवेपमाने नितुगत्र यतिवत्प्रतेया
न्नविशेषवत्वात्साध्विति रहितानान्नुष्यास्तत्र इति पर्युदासवृत्त्येत्यपि केचित् तेन हूनकाष्ठसभा ऽत्रापि नाधि
कारेण योगासंभवात् सभाशब्दः शालावाची संघातवाची च तत्राद्यप्रतिषेधात्पालितमाह संघा
तेति पूर्वेत्र तु शालावाचिन एव ग्रहणं अत्राप्यन्यासंभवादेव नाधिकारोपयोगः प्रथमार्थे षष्ठीत्या
शयेनाह एतदंत इति श्वानिशामिति कस्य च तु दं ष्णीत्यर्थः तस्यां हि केचित् श्वान उपवसंति श्वन।
श्वतु देष्णाम् उपवसतः पष्णाम इति शाबरभाष्यात् इह दे समाहारे तत्र योगाभ्यां तत्पृह्ययस्य उनिर्वारत्वे

शा॰ सो॰ नच कश्चिन्नित्येकवद्भावसत्वेन च बहुव्रीहिश्च त्यदाह यत्तिहृद से न इति ॰ इति नन्वत्र ः द्वितीयाश्रितेत्यादिनेति श्रु
तपदस्य प्रथमान्तत्वेन प्रथमान्तपदोपात्तार्थस्यैव शेषाविवक्षितेन इति भावः तेन प्राद्यो गतार्थं प्रथमेत्या। ये
445 दिना प्रथमया समासोऽप्युक्त इति नाशंक्यं न स एतत्र तृतीयान्तत्वात्तदाह प्रथमान्तमिति एतदर्थमेव शेषग्र
हणमिति बोध्यं उन्मत्तगंगमित्यादौ तु न बहुव्रीहिरेकसंज्ञाधिकारात् न च का प्राप्तत्वेनाव्ययीभावस्यैव ग्रह
णेरित्याहुः शेषाधिकारस्य बहुव्रीहेरेव शेषाद्विभाषेति कपूनान्यस्मादित्यपि शेषग्रहणफलं बोध्यं कामदे
कालइत्यादौ सप्तमीति ज्ञापकात्समासो बोध्यः अन्यस्येति अन्यत्वं चोपस्थित प्रत्यासत्त्या समस्यमानप्रथमा
न्तापेक्षं नञ्य स्य यस्मिन्नित्यादि तदाह अप्रथमेति नन्वन्यपदार्थे इति सत्रे सुपे तं च पदमेवं च तदर्थे समासः
न तु विभक्त्यर्थे न हि विभक्तिः पदमिति चेन्न पदं न हि प्रकृत्यर्थोपसर्जनप्रत्ययार्थस्याभिधानात्प्राधान्येन
तस्यैव ग्रहणात् नन्वेवं चित्रगुरित्यादौ संबंधादिबोधानापत्तिः सामानाधिकरण्यानुपपत्तिः द्वितीयाद्य
र्थशक्तीनां लिंगसंख्याकारकाणामनन्वयित्वेन तदर्थकसमासे पि तदनापत्तिश्चेत्त न अन्यपदे इत्युक्तैवय
स्यत्यागकृत्वा रितपदे समभिव्याहृत पदान्तरस्य तत्स्वभावात् तदर्थलाभे सिद्धे अर्थग्रहणं लिंगसंख्याका
रकविशिष्टपदार्थसंग्रहार्थमिति न दोषः अर्थपदेन यस्योपस्थितिर्लिंगादिविशिष्टस्य तादृशस्यैवार्थ
ग्रहणेन ग्रहणात् एवं च यस्येत्यादौ षष्ठ्यर्थस्य प्राधान्येपि अर्थग्रहणसामर्थ्यात् दंडी देवदत्तः चित्र
गुर्देवदत्त इत्यादौ निर्विचिकित्सप्रतीयमानसामानाधिकरण्यानुरोधाच्च प्रत्ययार्थविशिष्टप्रकृत्यर्थ ए राम॰
व बहुव्रीहिघटकपदानामेकार्थीभावः कल्पतरु इति बोध्यं मूले ऽप्रथमेत्यादेस्तदेतदर्थे इत्यर्थो बोध्यः वि
विभक्तीनां यमि शक्तिमते तु यथाश्रुतमेव सम्यक् पाठे यदा पंचकं प्राप्ति पदकार्थ इति सत्त्रसंमतेपते

लिंगसंख्यावत्कारकमपि तद्धिशेषणं क्रियान्वयेऽपि चाकांक्षावशात्तस्यैव संसर्गत्वमिति पक्षस्तदापि तद्धितार्थे इ
त्यवार्थः यद्यपि बहुव्रीहौ समासान्तर्भावे साम्येकार्थीभाव इति अनभिहित इति सूत्रे कैयटस्तथापि सशेटिवादः
मत्वर्थे बहुव्रीहेर्विधानेपि ग्रहणस्य थान्तर्भावेणनास्य शक्तिरिति मनुपूर्वविध्ययके भाष्ये स्पष्टमुक्तत्वात् नचैवमप्य
न्यार्थे इति वक्तव्ये पदग्रहणं व्यर्थं अन्यार्थे इत्यत्र कर्मधारयापत्तेरोऽनानात्मकं स्वसेत्यादौ समासानापत्तेः
मित्रार्थत्वाभावात् पदग्रहणेतु न दोषः अन्यपदार्थत्वासत्वादित्याहुः याहवनीनदीन्यादौ मस्त्वाहि
इतिवाक्यार्थे वर्त्तमानपदसमुदायस्य माभूदित्यर्थे षष्ठीनत्नु रूपपक्षेपि तत्सार्थकमिति भाष्ये स्पष्टं अ
न्यत्वादि किं बहुव्रीहि तन्नु रूपयोर्विषयविभागार्थे स्वपदार्थे हि सावकाशं तन्नु रूपं परत्वादन्यपदार्थेव
हुव्रीहिर्बाधते अस्ति तस्मिन्नु बहूनां समुदाये सावकाशं बहुव्रीहिं स्वपदार्थे इवान्यपदार्थेपि नीलो(
त्पलं सर इत्यादौ समानाधिकरणेनु तन्नु रूपो बाधेनेति भाष्यरतः त्रिपदबहुव्रीहेः स्वपदार्थेपि प्रसं
गात्तु तदर्थान्तर्भावे लोकार्थीभावार्थे च तदित्याहुः अनेकं किम् बहूनामपि यथा स्यात् ननु कपिंजला
धिकरणन्यायेन त्रयाणामेव स्यात् न चतुरादीनामिति वाच्यं बहुलस्य संस्कारानुरोधेनात्र न्यायाप्रव
त्तेः अत एव निजां त्रयाणामित्यस्यात्र त्रयाणामिति चरितार्थे सर्वेषां प्रथमानिर्दिष्टत्वे नोपसर्जनत्वा
र्थमस्यावश्यकता एकविभक्तित्वेनेत्यनेन नन्नु न सिद्धिः विग्रहीयपदान्तरापेक्षया निष्कौशाम्ब्यादावि
व चित्रगवादावेकविभक्तित्वाभावात् इति सूत्राशयः सुपेति तृतीयान्तेनेहलोसैवध्यते द्वयोः समासा क
नापत्तेः समानाधीति शेषग्रहणं लब्धोमर्थः प्राप्तमुदकमिति यत्कर्मप्राप्तिकर्तृदकं विग्रहार्थः उ
दककर्तृकप्राप्तिकर्मेति समासार्थविग्रहे सर इति प्रयोगेनुन स्याद्व्ययमेवार्थः प्राप्तयदेवत्रोपकृति प्र

शा॰शो॰

446

न्यायार्थयोर्विशेषणविशेष्यभावमन्यासानुअन्यथाकारकाणामनाकांक्षतया परस्परमनन्वयेनान्यपदा
र्थस्य विशेष्यत्वानापत्तिरित्याद्यन्यत्र विस्तरः प्रथमार्थेन तु नेति चेद्देवदत्तयोरप्राधान्यादिति भावः अत एव
वद्वैदेवौ गतं पश्यत्यादावपि न दोषः तत्र अन्यपदार्थबोधः समुदायशक्तिसाध्यः उपस्थितपदार्थानां वि
शेषणविशेष्यभावव्यत्ययोपि तत्साध्य एव अपेक्षावादिनां तु अत्र अन्यपदार्थेकर्तुर्धात्वर्थं प्रति विशेष्यत्वेन व-
स्यात् प्रत्ययार्थः प्रधानमित्युत्सर्गात् न च वक्तावुत्सर्गस्यागोभिन्नव्युत्पत्तिस्वीकारादिति वाच्यं एवं हि कर्तृ
विशिष्टप्राप्तेः पदार्थत्वेन तस्यैव नामार्थतयोद्देश्यतद्भेदो वाच्यः नामजन्यप्रतीतिविशेष्ययोरभेदा।
न्वयांगीकारात् स च बाधितः न हि कर्तृविशिष्टप्राप्तिरुदकमिति संभवति न चेयमपि व्युत्पत्तिः समा।
सातिरिक्तविषया एकार्थीभावस्वीकारस्यैवौचित्यात् यद्यपि पचतिकल्पं देवदत्तः इत्यत्र नियमहृदयस्या
पित्यागः स्वरूपस्त्यापि व्यस्ते समीनमुदकमिति वस्समस्तेपि तद्विशेषणप्रयोगः प्राप्तस्तदर्थे च तस्य
विशेषणयोग्यतेति वचनारंभे गौरवं एवं राजपुरुषोश्व इत्यत्र वारणाय इत्यत्र सजातीयविशेष्यान्तर
योगेनेत्यपि वचनं कार्यं एवं राजपुरुषो भार्यायाश्चेत्यत्र वारणाय सजातीयविशेषणान्तरयोगेने-
त्यपि वचनं कार्यं हंहे चकाराप्रयोगाय च वचनं कार्यं विभाषाधिकारादिष्टकार्यं इत्यति गौरवं न चोदप
देन विशिष्टो ग्रामो लक्ष्यते प्राप्तपदं च तात्पर्यग्राहकमिति वाच्यं घटादिपदे द्वयपि चरमवर्णस्यैव शक्तत्वा
पत्तेः तात्पर्यग्राहकत्वेपि बोधकरणतायाः स्वाव्यापकत्वेन तस्यैव शक्तित्वात् वीराः पुरुषा यस्मिन्नित्या
दौ अन्यपदार्थस्याधिकरणकारकत्वे पत्वेपि बहुव्रीहिणानुक्तत्वात् शक्तिकवस्तुमात्रबोधात् क्रिया
भिन्नेनाप्यन्वयः अत एवाधिकरणादिस्वरूपेतानां बहुव्रीहिणान्वयः संगच्छते क्रियान्वये च तादृशानुबलो

पक्षिघ्नानि रवनियामिकेति स्पष्टं चेदमनभिहितं न सूत्रे कैयटेन चैवं समुदायस्यान्यपदार्थवृत्तित्वेपि शक्ते
कपदानां न हानिरित्युक्तं भमित्यनेकं स्पष्टं न मन्यपदार्थवृत्तेमानमित्युक्तं गतमिति वाच्यं समुदायस्य शक्ते
कानतिरिक्तत्वात् नन्नूघटकत्वाच्च प्रथमान्तानां समासे तु प्रथमार्थो संभवत्येवेत्याहुः व्यधिकरणत्वा
मिति शेषग्रहणसिद्ध एवायमर्थः प्रथमान्तानां विशिष्य समासानुज्ञानात्स्यैव शेषत्वं नत्र वचनवैयधि
करण्यं नाप्यन्यपदं प्रथमान्तमिति भावः अंभोभिगमोस्या अंभोभिगमेन इति बहुव्रीहेरनभिधानान्नेतिक
र्मण्येवेति सूत्रे भाष्ये स्पष्टं प्रादिभ्य इति प्रादिभ्यः परं यद्धातुजं तदन्तस्य पदान्तरेण बहुव्रीहिर्व्याख्या
यत्रत्यं शेषानुवादः वाचेत्यादि वाचनिकं पूर्वपदान्तर्गतस्योत्तरपदस्य धातुजस्य वा लोपो वाच्य इत्य।
र्थः नञोस्त्यर्थानामिति नञः परं पदं यस्य अस्त्यर्थवाचपदेन स्य पदान्तरेण बहुव्रीहिरस्त्यर्थवाचिना
वा लोप इत्यर्थः एतच्च प्रादीनामेवविशिष्टार्थवृत्तिनामाश्रित्य सूत्रन्यजं एवं सप्तम्युपमान पूर्वप
दस्योत्तरपदलोपश्च सप्तम्यन्तमुपमानवाचि च पूर्वपदं यस्य तस्य पदान्तरेण समासः पूर्वपदान्त।
र्गतोत्तरपदलोपश्च कंठेस्थकालो यस्येति कंठेकालः उष्ट्रमिव मुखं यस्य स उष्ट्रमुखः अवयवध
र्मस्य समुदाये आरोपादुष्ट्रस्योपमानत्वमित्यादि वचनान्यपि चिंत्यप्रयोजनानि उष्ट्रादिपदानामु
ष्ट्रादिमुखे लक्षणयोपपत्तेः कंठेस्थकाल इत्यादिस्त्वनभिधानान्नेत्याहुः उक्तेर्मुख इत्यादावुक्तेरित्य
स्याधिकरणशक्तिप्रधानत्वेनवैयधिकरण्येपि समासोत्पादकात् वृत्त्याधेयप्रधानतया सामाना
धिकरण्यमप्यस्त्येवेत्यन्ये अस्तीत्यस्य तिङन्तत्वेन सुवित्यनुवृत्तेः समासो न स्यादत आह वि
भक्तीति अस्तिक्षीरेति विद्यमानक्षीरेत्यर्थः अर्धस्तनीया द्रोणा इत्यत्राधं स्तनी योपेक्षामिति

४४५०

प्रा·प्रो·

447

विग्रहः उद्भूतावयवभेदः समुदायः समासार्थ इति बहुवचनं स च द्वौ द्रोणावर्धद्रोणश्च द्रोणपादश्च द्रोणयोरर्धद्रो।
णौ च लक्षणया वर्तन्ते इति सामानाधिकरण्यं अर्धं चान्यपदार्थश्च तत्समभिव्याहृतद्रोणस्यैव यद्यपि समुदायोऽन्यपदा
र्थस्तथापि व्युत्पत्तिवैचित्र्यादर्धसमुदायिनो द्रोणस्यैव एवमनुद्भूतावयवभेदसमुदायविवक्षायामर्धतृतीयो
द्रोण इत्यपि संकर्षणं द्वितीयस्येत्यादौ अनुद्भूतावयवभेद एव समूहः समासार्थ इति बोध्यं पंचभक्तावन्तोस्येत्यर्थे
न बहुव्रीहिरनभिधानादिति स्पष्टमनेकमिति सूत्रे भाष्ये अतिशयेन सूक्ष्माणि वस्त्राणि यस्येत्यर्थे पूर्वप्रकर्ष+
विवक्षायां सूक्ष्मतरवस्त्र इति अन्यपदार्थसंबंधोत्तरं प्रकर्षविवक्षायां तु सूक्ष्मवस्त्रतरक इति च भवति बहुवीति
शयेनाढ्या यस्मिन्नित्यर्थे पूर्वमातिशायिकं कृत्वैव बहुव्रीहिः कार्यः तेन बह्वाढ्यतरक इत्येव न तु बह्वाढ्यकतर इति+
स्पष्टं वर्णो विवर्णेनेति सूत्रे भाष्ये बह्वाढ्यकतर इत्युक्तौ बहुत्वगतः प्रकर्षस्तु नाढ्यत्वगत इति संदिह्यते ननु के सब्रह्म
चारिणोऽस्येत्यर्थे का किं स ब्रह्मचारी भवानिति प्रश्ने अहं कठ इत्युत्तरं न स्यात् कठा इति च स्यादिति चेन्न तेषां कठत्वं।
विनाऽस्य कठत्वासंभवात् अनेनैव तेषां तत्त्वाहते पाद अहं कठ इत्यस्योत्तरत्वोपपत्तेः कठा इति तु नोत्तरं वर्णिपदार्थ
स्यापि सर्जनत्वादन्यपदार्थस्य प्राधान्यात्तदनुरोधेनैदृशो विषयेनादृशार्थोत्तरस्यैवौचित्यादिति कैयटादयः
ङोऽभाव इति अत एवैडविडोऽपत्यं जनपदशब्दादित्यत्र ऐडविडः तस्य स्त्रियामतश्चेति लुक ऐडविट् चासौ वृंदा+
रिका चैडविड्वृंदारिकेति सिध्यति पर्युदासे ह्रिदावाधेन एवमप्रवृत्त्यापत्तौ तदसिद्धिः स्पष्टं चैव यदि तु प्रत्ययत्वे।
नैव साहचर्यं तु ङ्याप्प्रत्ययलक्षणेन स्यादिति बाधकेन वा प्रत्ययपर इत्युच्यते तदा तु पर्युदासोऽपि ध्वनितं चेदं भाष्ये नचै
डविडेत्यादौ जाते श्चेति निषेधः पुंवत्कर्मधारये त्यस्य निषेधाविषय एव प्रवृत्तेः अत एव बहुव्रीहौ न प्रत्युदाहृतं
एवं चार्थाधिकारानुरोधादिहापि नाशास्त्रीयत्वोचित इति भावः अस्य शास्त्रीयगोत्रत्वाभावादप्रवराध्यायप्रसि

स

द्रुत्वाद्वन जायते त्वमिति न तत्त्वं एतेन स्त्रिया इति स्त्रीप्रत्ययपरं अनूङः स्त्रीप्रत्ययस्य पुंसीव निवृत्तिरित्यर्थः मरुभूवद
त्र ग्रामे जनमिति वदिन्य पास्तं किं चात्र पक्षे गार्ग्यायणी इयं दारिकेत्यर्थे गार्ग्य इयं दारिका न सिध्यति योत्र भाषितपुंस्कात्प
रः ष्फुः स नोत्तरपदपरः ङीप् च न तस्मात्परः इति निपातनादिति इदं श्वो नरान्वयि अत एव वैयधिकरण्येपि बहुव्रीहिः
कृतसमुदाये नावयवानामनुमानं निपातनं अलुगिति इदं प्राचामनुरोधेन भाषितपुंस्कमततीति भाषितपुंस्कात्
अनेः किं पूर्व एवं च समानाधिकरण एव बहुव्रीहिः अलुगर्थश्च यत्नो मास्त्विति न व्याः भाषितः पुमान् यो यस्मिन्नर्थे श
ब्देन तदर्थेस्त्व रूपं भाषितपुंस्कं स्त्रीप्रमुभयवत्यर्थः प्रवृत्तिनिमित्तरूपमाधारत्वविवक्षया सप्तम्या निर्दिष्टः अत ग्रहण
संविज्ञानस्यायं पुमर्थविशिष्टस्य स्त्रीलिंगशब्दवाच्यत्वाभावात् शब्दस्यात्रार्थकृतवैलक्षण्यातिरेकेण स्त्रीवाचक
समानानुपूर्वीकः समानार्थश्च गृह्यते प्रत्यासत्तेः अन्यपदार्थे गतेकत्वस्य विवक्षणाच्च तदर्थरूपं च प्रवृत्तिनिमित्तभूत
मेव ततश्च स्रोशब्दजित्याशयेनाह तुल्ये प्रवृत्तिनिमित्ते इति प्रवृत्तिनिमित्तत्वं च शब्दजन्योपस्थितौ विशेषणतावच्छेद
कत्वं अत एव लक्षणया स्त्रियां वृत्तावपि भाषितपुंस्कत्वनिर्वाहः भाषितः पुमान्येनेति नु नोक्तं कुटीजीविक इत्यादाव।
तिप्रसंगापत्तेः कुटशब्दो यदि पुमान् गेहे स्त्री गर्भिभार्यः प्रसूतभार्यः प्रजातभार्य इत्यत्र तु गर्भसंबंधापत्यापत्त्यास्संबं
धमात्रमात्रं प्रवृत्तिनिमित्तमिति भाषितं पुंस्कत्वात् अति: गर्भशब्देनांतर्देशस्तनस्थं वस्तु बोध्यते यद्वा गर्भिणीदारादि
त्यादिप्रयोगात्पुंस्त्वविशिष्टस्यापि बोधनेन भाषितपुंस्कत्वमस्त्येव यथा वैतन्न्याय्या एकशेषप्रकरणे वक्ष्यते इदमेव
युक्तं आद्यपक्षे हि पुंयोगादिति सूत्रे पुमाख्यत्यस्य प्रस्तृत्येत्यादेः प्रत्युदाहरणत्वानुपपत्तिरिति बोध्यं पुंवाचक
स्येति प्रत्यासत्त्या पुंवत्भाजः स्त्रीशब्दस्य प्रयोगांतरे पुमांसमाचक्षाणस्य यद्रूपं तदेवातिदिश्यते तेन नञ्जरतीशब्दे
नविग्रहे वृद्धगुरिति न अत्र च रूपातिदेशः नत्वर्थातिदेशः अर्थस्योत्तरपदपरत्वाभावात् किंच स्त्र्यार्थस्य पुम।

शा॰ प्र॰

५५४

र्थातिदेशाद्बहुव्रीहौ ह्रस्वयोर्विप्रतिषेधानुपपत्तिः कार्यभेदात् अन्यतरप्रवृत्तावुत्तरमन्यतरप्रवृत्तियोग्यतासत्त्वेना
संभवाभावाच्चेति दिक्‌ चित्रा अस्ति अनरंगानपीति न्यासान्तर्वनसवर्णदीर्घस्यान्यथा एकदेशस्य परादिवच्चे
नस्यापोलुकि चित्रगुरित्यत्राकारो न लभ्येतेति भावः ननु इत्त्वावभेदकत्वसंख्यापाउत्सर्गिकत्वेनालौकिके एक
वचनप्रवेश एव युक्ता इति चेत्‌ सति तात्पर्यग्राहके बहुवचनोतेवियद्ध्रस्वाप्यंगीकारात्‌ अत एव गोषु चरित्यादि
सिद्धिः अत एव स्त्रीकार्याणामुक्तः इत्यादावनभिधानात्‌ समासः स्त्याकरः संगच्छते हेतिप्रत्रैवस्त्रेपट्वी मृद्वी भा।
र्ययस्येति द्वंद्वगर्भबहुव्रीहौ पट्वीमृदुभार्य इति भाष्योदाहरणात्‌ तत्र ह्रियः पूर्वपदं द्वंद्वो न समाषितपुंस्कः अ
त एव पट्वीशब्दोत्तरङीपो ननिवृत्तिः मृद्वीशब्दस्य केवलस्य भाषितपुंस्कत्वेपि न पूर्वपदत्वमिति तदाह्लपनेनत्तसिद्ध्य
दिति भावः आनङिति अत एव समर्थसूत्रभाष्योद्योतपोत्तनेष्टोद्गातारइत्यत्र च तृणोंद्वंद्वेत्तृतीयस्यानङ् दाहृतः
नेष्टृत द्वंद्वे द्वंद्वकृच्योद्गातृशब्देन द्वंद्वस्तु नात्र भाष्योपक्रमविरोधात्‌ अत एव पूर्वपदानात्वपादेवभाष्यमिति पट्वी
मृदुभार्य इति भाष्येणेदं ध्वनितमिति भावः जरद्गवेति लिंगविशिष्टपरिभाषया पूर्वकालैकेति समासः जरद्गवी
त्यत्र गोरतद्धितेति टचिदित्वान्ङीप्‌ तदंतेन बहुव्रीहौ न ह्रस्वत्वेति कप्रत्ययो नेति संहितशाकेत्यत्र कल्या।
णाइति षष्ठीतत्पुरुषे पूर्वपदस्य संबंधिनि लक्षणेति मतेपि न दोषः वृत्तौ वक्तेः प्राक्सामानाधिकरण्यस्याववि
वक्षितत्वात्‌ धानमिति भावल्युडंतं नित्यनपुंसकं अपूरणीनचापः पित्वव्यर्थं पूर्वपदप्रकृतिस्वरेणानुदात्त
त्वस्य सिद्धत्वादिति वाच्यं स्तु पंचमाइत्यादौ नञ्स्तुमित्यंतोदात्तबाधनार्थत्वात्‌ स्त्रीलिंगनिर्देशाच्छोभनः पंचमो
येषामित्यादाव प्रतेन तत्रांतोदात्तत्वमेवस्यादुः रात्रय इति उङ्जूनावयवभेदो रात्रिसमुदायोन्यपदार्थः प्रमा
माणीति करणे ल्युट्‌ विशेष्यलिंगतया ङीप्‌ प्रमाणीयो स्त्रनाविति तु प्रमाणशब्दाद्दाचारक्विवंतात्त्वाद्य

चिदापि बोध्यं यत्तु स्वरूपं प्रमाणमयते पातीति विग्रहे क्विवंतादयतेः प्रमाणेति स्वमिति तत्रस्य प्रत्ययादीनां
क्विपि चरत इत्यादि माथवा घ्रदाहृतं इत्वात्रापि नुगापत्तेः न च वृद्धलिलोपस्य प्रत्ययाश्रयत्वया बहिरंगत्वेनासिद्ध्या
त्वेन न तत्कृताप्तिः न कोपि प्रत्ययापेक्षत्वेन समत्वात् प्रत्ययविशेषापेक्षत्वेन तस्यैव बहिरंगत्वात् गोधरइत्यायसिध्या
तस्य प्रत्ययनिमित्तत्वाभावाच्च आगमशास्त्रमनित्यमिति त्वगतिकगतिः इह तु गत्यंतरमुक्तमेव किंच न तु तत्र वित्र हेतु
पपदसमासे पूर्वपदस्थस्य स्वल्पकं तरंगत्वात्सवर्णदीर्घटापद्व्लोपः प्रधानपूरणीमेवति पुंवद्भावविधेयवार्त्तिकमिदं प्रथा
नेकार्थे संप्रत्ययात्सा प्रसिद्धं समासांतोपि तत्रैव त्वत्र प्रमाणं तु पुंवद्भावसूत्रे कल्याणीपंचमीकाः पक्षा इति भाष्योदाह
रणमेव वाच्यं चेति अन्यपदार्थे चटकतया समासवाच्ये चेत्यर्थः उक्तं च यव रात्रीणां प्रधानत्वेन यथा प्रथमा द्या
रात्रयः समासाभिधेयाः एवं पंचमप्यपीति वार्त्तिक पदार्थेस्यान्यपदार्थे तु प्रवेशात् प्राधान्यमिति भावः नद्युत्तरपदा
दिति नद्यंतप्रकृतिकस्वंतोत्तरपदकं इत्यर्थः अन्यथा वहुधीवरीत्यादौ कपापत्तिः वहवो धीवानो यस्यामिति वि
ग्रहः एतदर्थमेव नद्यंतादिति नोक्तं इदं हि लिंगविशिष्टपरिभाषया नद्युत्तरपदकं नद्यंतं च भवति तस्यां विहित
त्वांशनिवेशाभावात् प्रातिपदिकत्वव्याप्यधर्माणां लिंगप्रत्ययसमभिव्याहारे तद्विशिष्टेपि प्रवृत्तिबोधनात्
न च समासांतविधौ समासादिपदानां तदर्थालौकिकविग्रहवाक्यलक्षकतया कपमिदानीं तत्प्राप्तिः समासप्र
देनगोणस्यापि ग्रहणमिति तादर्थ्यात्तावकस्य मिति भाष्यतात्पर्यसत्त्वेन मुख्याग्रहणे मानाभावात् अतए
व बहुव्रीहिरूपसइति सूत्रे कुंडोध्नीत्यत्रैनं कपमाशंक्य नद्यंतानां समास इत्येवं तद्दिति परिहृतं अलौकिक
विग्रहवाक्य एव समासांतप्रवृत्तिरित्येव सिद्धांतारापइत्यन्ये ऋदिति तपरत्वं कृशब्देन समासे तद्भावायेत्या
हुः पुंवदिति पूरण्याः प्रधानत्वादिति भावः केणः अत्र तद्धित एव कोगृह्यते नेन कपीति साहचर्यात् नाकाधाके

शा·प्र·

एपादोनह्रस्वः प्रियेत्यादि प्रियाकांतामनोज्ञास्वाकल्याणीभक्तिदुर्भगा सचिवामनाह्लांताच पलानिचितासमा
सुभगादुहितावामा स्वसाच ततयातपेति गणकृत्तृ दृटंभक्तिविति आदादौनिवृत्तिमात्रपरत्वेनात्र दृट शब्दप्रयो
गान्त्रलिंगविशेषविवक्षेतिभावः तद्विवक्षायांन्तु दृटाभक्तिरित्यादिसिद्धये प्रियादिषुभक्ति शब्दपाठः यत्तु
कर्मसाधनभक्तिशब्दस्यैवप्रियादिषु पाठस्तेनान्यस्मिन्पुंवदेवेति तत्रमानाभावात् यस्य सत्रुति अन्यपदा।
र्थप्राधान्यंसूचयितुंविग्रहेतच्छब्दप्रयोगः तसिलादिष्वाभ्रमिथिथावाड्-अव्याप्यतीनिवकतिरजप्या।
वदुप्राद्वत्त्वाव्याप्तिः तसिलादिकृत्वसुजंतेषुतिलूप्यन् पाशांबाठाभावात् यद्वीदंप्रत्यादावतिव्या
प्तिस्तत्रेदंप्रपादेः पाठादितिभावः तरवमयाविति युवतितरेत्यत्रङ्याप्सूत्रस्थभाष्यप्रयोगात्पुंवत्वाभा
वः तद्भाष्यपर्यालोचनात् युवतिशब्दस्यनप्रवृत्तिरित्यन्ये पुंवत्त्वस्यवैकल्पिकत्वातितायाभाष्यसमेतत्वात्
जातेश्चेतिनिषेधेन तत्सिद्धिरित्यपरे चरट् जातीयरावितिन्नन्वत्रजातीयदेशीयग्रहणंव्यर्थं दर्शनीय
जातीयेत्यादौ चरितार्थेन पुंवत्कर्मधारयेत्यनेन परत्वात्कोपधायाइतिनिषेधंबाधित्वा पाचकजातीया
दावपिपुंवत्त्वसिद्धेरिति चेत्रक्रमेणोदाहृतिस्तत्रैभाष्यकृदुक्तेन निषेधाश्चबलीयांसोभवंतीतिन्यायेनत
द्विषये परत्वापवृत्तेः पुनर्ग्रहणेतुसामर्थ्यान्निषेधविषयेपिप्रवृत्तिः अस्यास्त्विदमेवज्ञापकमित्याहुः न
न्वेवमपिपरिगणनंन्यूनंपुंवत्कर्मधारयेति सूत्रेहस्त्यादिभिर्विप्रतिषेधविचारे दारदिकेत्यत्रपुंवद्भावाव
काशप्रदर्शनपरपस्पाहिकेत्युदाहरणपरवार्त्तिकभाष्यप्रामाण्येन प्रागिवात्कइत्यस्यापितसिलादित्वा
वश्यकत्वात्दरच्छन्दादपत्यंस्त्रीत्यर्थे घ्यमन्त्मगधेत्यरारतस्यात्तश्चेतिलक्प्रागिवात्कइत्यस्यापि तिचे
त्सत्यंकैःप्रत्ययेवार्त्तिककारमतेवाचनिकपुंवत्वाभ्युपगमाददोषः अतएवदारदिकेत्यत्रजातेश्चेतिपुंवत्व
पाठो भाष्येयत्रास्य परिगणनेऽपाठात् सचकेपुंवत्त्वस्यवार्त्तिकसिद्धत्वबोधनपूर्वकं सोत्रत्वबोधनफलकंतन्मूलंचिंत्यं।

५५१

त्रिषेधो नापद्यते नत्स्त्र त्रभाष्ये यमुदाहृर्हितोपि परिगणिताः कयाकृत्याकथं नस्यांवेलायांतदानहिंस्मुदाहृतंचनत्यापि।
सर्वनाम्नोवृत्तिमात्रइत्येवसिद्धत्वान्मूलकृतानगणिताः यत्तु भाष्ये एतज्ज्ञणेन सामर्थ्यात् तत्रत्यवृत्तिपदंतद्धितभिन्न
वृत्तिपरमितितत्रदक्षिणोत्तराभ्यामतस्सुजितिसूत्रेऽकारोच्चारणाभावेदक्षिणशब्दात्त्रसिदक्षिणेन इत्यसिद्धिमा
शंक्य सर्वनाम्नोवृत्तिमात्रेइत्येवसिद्धमितिभाष्यउक्तत्वेनत्व इकार्थस्यकल्पयितुमशक्यत्वात् अत एव भवत्प
योध्यायतीत्यादिमहाकविप्रयोगाः संगच्छन्त इत्यलं वह्वीव्रित्ति यद्यपि डीषावैकल्पिकत्वात् तदभावे वहु।
त्रेतिसिध्यति तथापि पाक्षिकानिष्टवारणायेदं वहुत्येति प्रकारवचनेथाल् तत्रकिं सर्वनामवहुभ्यः इत्यधिक
तं यक्कतिरित्तिं यकत्वेष्टाभ्यामितिलिंगविशिष्टपरिभाषयातिल् परिगणनसामर्थ्यादेवजाते इति निषेधाप्र
वृत्तिरिति वोध्यं अन्तरस्येति अन्ताविर्भाष्यान् शासीति वहुत्वार्थ्यादित्यपमपि शास नृसिन्तादिषु इष्ट इत्यर्थः स
र्थः त्यतलोः अत्र संज्ञाज्ञातिक्रियाऽभावव्यतिरिक्तो धर्मोगुणः वो त इत्यादौ तत्यानिर्णीतत्वात् तेन क्रिया।
शब्दात्तत्पूर्ववत् अत एव गुणवृत्ति सूत्रे उभयसंज्ञात्वस्येति भाष्ये प्रयुक्तं अत एवैकतद्धितेति सूत्रे एकत्व
मित्युदाहृत्य पूर्ववत्वेनसिद्धमित्याशंक्यभाष्यउक्तं उक्तमेतत्त्वतलोर्गुणवचनस्येति एकशब्दस्यसंख्या
यां गुणवचनत्वेप्यसहायवाचिनोऽन्यात्यादित्यविके पदः असहायत्वं च सजातीयद्वितीयाभावः इ
ति केचित् आकडारसूत्रे भाष्येनु संज्ञाजातिरूढं न तद्धितसमस्तसर्वनामसंख्याशब्दातिरिक्तःशा
ब्दोगुणवचनइत्युक्तं तत्कथं एकशब्दस्य संख्यावाचिनोपि गुणवचनमिति चिंत्यं एकंवह्वीशब्दात्त्व
तलोर्वह्वीत्वमित्याहुरेवापरे यत्तुपरःसन्निकर्षइतिसूत्रेभाष्ये एकैकवर्णवर्त्तित्वाद्वाचइति तत्तुसा।
मान्योपक्रमात् स्त्रीप्रत्ययाभाव इति पदसंस्कारपक्षेकैयटेनयोजितमेवएतेनतन्नेष्ठुरोहारवती

शा० श्रो०

त्वमासीदिति व्याख्यानम् द्वारवतीत्यस्य यौगिकत्वेन क्रियाशब्दत्वात् द्वारवतीति संज्ञायां निष्ठाकिमतदीपोर्थ इति व्या
ख्यानं मिर्देशिनत्वेन संज्ञाशब्दत्वाद्द्वाद्धो यात् त्वे चेति ह्रस्वस्तु कंदस्येत्याहुः कर्त्रीत्वमिति कृतन्त्रःप्रत्यनुकूलव्या
पारोर्थः एतेन कर्तेर्गुणत्वेनायं गुणवचन इत्यपास्तं धातुप्रतिपाद्यतयात स्याश्रपि क्रियात्वाच्च सत्त्वीत्वं सखि
450 रत्नणीयमिति त्वसाधेवानकोषधापा इत्यत्र नेति योगविभागेन कचित्पुंवत्त्वस्यानित्यत्वात्साधेवेति दुर्घटादयः
प्रारद इति कृत्तार्थशब्दस्य क्रियाशब्दत्वात्पुंवत्त्वाप्राप्तिरिति भावः यदसंस्कारपक्षे विशेष्य संनिधानात्पूर्वं सामा
न्येन नपुंसकत्वमित्युक्तं अत एव परः सन्निकर्ष इति सूत्रे एकैकवर्णवर्त्तित्वाद्वाचः इति भाष्ये कैयटेनैवमेव व्याख्या
तं हास्तिकमिति अचित्तहस्तीति ठकूनचात्र यस्येति लोपेन निर्वाहः तस्याभीयत्वेनासिद्धत्वात्स्थानिवत्वाच्च
नस्तद्धित इति टिलोपानापत्तेः न च ठकूक्कसोश्चेति सिद्धिः क्कसास हि चरितस्य भवत एक एव तत्र गृहणात् अत एव
भस्याढे इत्यस्य हास्तिकमित्युदाहरणं भाष्योदत्तं रोहिणेय इति रोहिता शब्दाद्वर्णादनुदात्तादिति ङीपकारो सं
ति तु पुंवत्त्वे तयोर्निवृत्तौ रोहितेय इति स्यादिति कैयटादयः ननु भस्याढे इत्यत्र सिद्धश्च प्रत्ययविधाविति वक्तव्यस्य
एंचेद मणिन्योरनार्षयोर्वृद्धगुणामिलादिभोण्यादिप्रातिपदिकादिस्यादि सूत्रस्थभाष्यादौ एवं च प्रत्ययो
त्पत्तेः पूर्वं पुंवत्त्वे स्त्रीभ्यो ढगित्यस्याप्रवृत्तौ कं रोहितेय इत्यादनमिति चेन्न सिद्धश्च प्रत्ययविधावित्यं शस्य भाष्य
कारीयत्वेपि यथाश्रुतवार्त्तिकरीत्या तत्था पादनात्र दोषः रौहितिरित्येवापत्तिरित्यन्ये स्त्रीभ्य इति स्त्रिया + अ
रापि तु शाकलावकेद इकारकेतु एकार्थबोधक एव तत्त्वेनेति सिद्धान्ते दोषाभावाच्च गं गादिशब्दात्पुलस्यमपि ण।
स्त्रीयपस्त्रीत्वविशिष्टमेव प्रत्यर्थयन्तीति न कदाचिदपि तेभाषितपुंस्क इति बोध्यं नाइग्नेयु प्रत्ययस्यैव तत्त्वेनेति सिद्धां राम
ते दोषाभावाच्च + इत्यनुवर्त्तनस्य स्वरितत्वात् तत्वादमुख्यार्थविहितठस्यैव ग्रहणमिति व्याख्यानं चात्र मूलं श्र

४

आपीति नन्वस्य पुंसि प्रवृत्तौ यग्नित्वं निमित्तं स्त्रियां त्वग्निसंबंध इति प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कत्वाभावात्कथं
पुंवत्त्वमिति चेन्न शाकलावच्छेदकप्रकारेणैवत्वस्य बोध इति दोषाभावात् तथाबोधे चेदनेन भाष्ये सामानम्
पुंयोगादाख्यायामिति सूत्रस्थभाष्यं च अग्निशब्देन स्वसंबंधाद्यदा पुंस्यर्थे संभादो वृत्तिस्तदा संबंधरूप प्रवृत्ति।
निमित्तेपि भाषितपुंस्कत्वसत्त्वात् यत्तु नपदांतसूत्रे कैयटेनुक्तं स्यादिति तस्योदाहरणे पंचेंद्रसमानाद्यामा
त्यो भावितपुंस्कत्वाभावान्न पुंवत्त्वमिति तन्न त्रित्वं न चात्र भाषितपुंस्कादिति न संबंध्यते ध्वनितं चेदं नपदांतसू
त्रे भाष्ये इति वाच्यं प्रकरणवशत्यागे मानाभावात् नकोपधाया इति सूत्रभाष्ये त्रापि न तत्संबंधस्योक्तत्वात् नप
दांतसूत्रस्थभाष्यमप्येवं परतया नेतत् शाक्यमिति दिक् शात्रुपर्यादिति व्यस्तयत्न इति निर्देशात्रलिंगरिपोर्वै
रिसपत्नारिद्विषद् इत्यमरः अयं च शात्रुभूतस्त्रीमात्रे रूढो भाषितपुंस्कः विवाहितितन्निबंधनसंस्का
रविशिष्टे रूढमित्यर्थः अयं च स्वाविवाहितपतिविवाहितस्त्रीमात्रबोधको रूढ एवानूढपतिशब्दघटितत्वा
नुग्रस्य च नित्यं सपत्न्यादिष्विति साधुत्वं तदेवाह नित्यस्त्रीलिंग इति स्वामिपर्याय इति अयं चैकस्वामिकस्त्रीमा
त्रबोधकः केवलयौगिकः एतल्लक्षणे तु प्रयोगप्रचुरस्कारेणैव पतिशब्दस्य स्वामिबोधकत्वात् एतल्लक्षणे
त्व स्वामिनयोः समनियतत्वात् अस्यापि नित्यं सपत्न्यादिष्विति साधुत्वं अत्र समानशब्दः साधारणपर्यायः आ
द्ययोरिति रूढत्वात्प्रसिद्धत्वाच्चेत्यर्थः नच द्वितीये लिंगविशिष्टपरिभाषया पत्युत्तरपदाण्वः स्यादिति वा।
च्यं परत्वेन शिवाद्यणएव प्राप्तेः तस्याणपवादत्वाभावेन पूर्वविप्रतिषेधाप्राप्तेः आदिस्य साहचर्येणकेव
लयौगिकस्यैव पत्युत्तरपदस्य ग्रहणात् अत एव सापत्न्यो भ्रातेति संगच्छते न चाद्याद्यणन्प्राप्तोति प्रनि
प्रसिद्धत्वेन द्वितीयसपत्नीशब्दस्यैव शिवादिपठितसपत्नीशब्देन ग्रहणौचित्यात् किंचास्मादणिव

शा॰ पो॰

त्तायां पूर्वमेव पुंवत्त्वे सपत्नीशब्दाभावादणभावे प्रकारान्तरत्वादिन्नू एव शब्देरितिवाच्यं शिवादौ सपत्नीशब्दयोर्द्वयोः पाठेना
दोषात् नत्र पुंवद्भावेपि पाठसामर्थ्यान्ङीप् न पूर्वं सपत्नीशब्दत्वमादायाण् एवं च द्विः सपत्नीशब्दपाठसामर्थ्यादपि न द्वि
तीयात्यसुत्तरपदस्य: स्त्रीलिंगविशिष्टेति अन्यथा टस्य विवक्षायां पुंवत्त्वमेव स्यात् परिभाषाप्रयत्नेन उत्पादयोर्विशे
षलक्षणादण्णपवादात्पूर्वविप्रतिषिद्धमिति एवमेव च तेन प्रत्ययविवक्षायां पूर्वमेव पुंवत्त्वाल्लिंगविशिष्टपरिभाषाप
४५१ न्यासो न युक्त इत्यपास्तं ननु शिवादित्वादणेव विवक्षा स्यादत आह नत्वणिति रूढयोरिति रूढियुक्तयोः सपत्नी
शब्दयोरित्यर्थः । अभिव्यक्तपदार्थाये इति न्यायादिति भावः सपत्न्या इति भाषितपुंस्कत्वात्पुंवत्त्वे पस्येतिलोपः अप
रे तु भाष्यकैयटस्वरसादन्यथा वदंति माधवादयस्तु क्तो विवाहनिबंधनपतिशब्दघटितो नास्त्येव अस्याठेइत्यत्र
अटेइत्युक्तो सापत्न्यो न सिध्यति किंतु सापत्न इति प्राप्नोतीति भाष्यकैयटयोरुक्तेः विवाहनिबंधनपतिशब्दघटित
स्य सत्वे तस्य भाषितपुंस्कत्वाभावेन तमादाय सपत्न्यसिद्धेस्तत्संगतिः स्पष्टेव नच पतिर्नोधवे त्रिष्वीशब्द इति को
शात् विवाहनिबंधनपतिशब्दसत्वेन तन्न घटितो वारयितुमशक्य इति वाच्यं + यज्ञफलस्वामित्वेनैव तन्नोबो
धात् अयंभावः स्वामित्वे नैव बोधकः पतिशब्दः स्वामित्वं च यदा प्रकरणादिना यज्ञफलनिरूपितं बुध्यते तदा पुमा
नेव शब्दः स्त्रियां पत्नीनिरूपात् सपत्नीघटको पतिशब्दस्तु न कदापि यज्ञफलप्रतियोगिकस्वामित्वबोधकः ज्ये
ष्ठाया एव यज्ञदानवधिकारेणाभयनिरूपित यज्ञफलप्रतियोगिकस्वामित्वस्यैकत्राभावात् विवाहनिबंधनसंस्कार
विशिष्टेत्तु पतिशब्दस्य न दोनमानं सत्त्व भाष्यसंमतेन च सापत्न्य एव न सिध्यति सापत्न इत्यपि प्राप्नोति + तत्स्य सत्वेपि
न टितत्य पत्नीशब्दस्याभिधानमित्याशयात् न च सापत्न्य एव न सिध्यति सापत्न इत्यपि प्राप्नोतीति भाष्यार्थः तद्वि राम
त्यातीयसत्वे रूढसत्वे रूढत्वेन तस्यैव शिवादौ ग्रहणेन तत्नीपादणः प्राप्त्यभावेपि सापत्नप्राप्तेर्दुरुपपादत्वात्कैयटा।

सङ्गतेः तस्मात्तदभावमादायैव पूर्वपदस्योपपादनीयत्वेन तदभावकल्पने वौचित्ता पूर्वपदत्वेन स्त्वदहानस्यापिक
ल्पनापेक्षया तदभावकल्पनस्यैवौचित्यात् किंच द्वितीयसत्वे तस्यैव नित्यं सपत्न्यादिष्वित्यनेन साधुत्वं स्यात् न च घटीनि
पातनमित्याकारोक्तेः श्रुतिप्रसिद्धत्वेन तस्यैव ग्रहणौचित्याच्च एवं च तत्रीपे विभाषा सपूर्वस्येति ङीपो बाधकः चयः एवं
च तत्र समानस्य सादेशो दुर्लभः निपातनकल्पस्य सादेशस्य तदघटकविवाहनिबंधनयति शब्दे उत्तरपदे कल्पने
प्यन्यत्र प्रवृत्तौ मानाभावात् न च तत्रीयस्यैव मास्तु न त्वपूर्वपदानुत्थानापत्तेः किं च समानपूर्वपदे तत्रकोऽन्य
न्यायेन विभाषेत्यस्य प्रवृत्तिर्दुरुपपादा किंच शत्रुरूढसपत्नमूलकसपत्नीशब्दमादाय सापत्न्यसिद्धिरिति सिद्धान्तोप
संगतः त्वदुक्तविवाहनिबंधनघटितेऽभाषितपुंस्कत्वात् पुंवत्त्वाभावे चरितार्थस्यापि शिवाद्यणो भाष्योक्तसपत्नीशब्दे
प्रत्ययोत्पत्तेः प्रागेव पुंवत्त्वे सपत्नशब्दत्वेन सपत्नीसंबन्धाभावेन चाप्राप्तेः सपत्नीशब्दद्वयस्यापि शिवादौ पाठे च न मा
नं तस्मात्स्वामिपर्यायपतिशब्दघटितस्यैव योगार्थप्रवृत्तिनिमित्तकस्य ग्रहणं तस्य नित्यं सपत्न्यादिष्विति समुदा
योच्चारणेन लोकव्यवहारेण वाऽङ्गं तस्य स्त्रीविशेषे रूढिरित्येवौचित्यं अत एव प्रयोगातिप्रसंगो न भवत्सु सङ्कौ
रः समानस्वामिकदास्योरपि सपत्नीत्वेन व्यवहारापत्तेः क्वचित्तथा व्यवहारस्तु गौणः योगार्थमादाय च भा
षितपुंस्कत्वं पुंसि तु सपतिरितीत्येवौचितं सपत्नप्रकृतिकसपत्नीसंबन्धस्यापि शत्रुत्वोपचारेण स्वविवाहितप
तिविवाहितस्त्र्यंतरेऽपि प्रवृत्तेस्तदपत्येऽपि सापत्न्यसिद्धिश्च न्यूहा पुंवत्त्वेऽपि सामर्थ्याद्रूत पूर्वे सपत्नीशब्दत्वमादा
याराबाधः समानपतिप्रकृतिकसपत्नीशब्दात्वनाण् केवलरूढस्य सपत्नप्रकृतिसपत्नीशब्दस्यैव।
शिवादौ ग्रहणात् नचायमपि सपत्नीवत्सपत्नी इति इवार्थे व्यत्सपत्ने इति निर्देशाद्दलिति रत्नाबुत्त्वेन यौ
गिक एवैवं चाविशेषादुभयोरपि ग्रहणापत्तिरिति वाच्यं व्युत्पादनमात्रं न तत्त्वसतुतः केवलरूढ एवाय

शा॰ शे॰

६५२

मितिनदोषः यदपि तन्नीत्यल्लिंगविशिष्टपरिभाषयायं त्वुत्तरपदत्वे सापत्न्यं तु न्नं न दपि न दैत्येयादित्येपयोः
सिद्धये लिंगविशिष्टपरिभाषाभावस्याकरे उक्तत्वेन तन्माह च ये पत्युत्तरपदं प्रोपि तदप्यवत्तैस्तदा सापत्ने
योन्यथ्याम्र्त्तोन्नौ रेवौचित्यात् एवं चास्मात् ढकि सापत्नेय इत्येवेत्याहुः अत्र निर्णयं वदुर्दर्शनः कुर्वन्नुन
चायमनिष्टइत्यत्र न मानं विपरीतं नित्यं सपत्नीति प्राप्तस्य सिद्धतया स्त्रीविशेषत्र्नटतयास्याप्यभिव्यक्तपदा
र्थकत्वेन शिवादौ ग्रहणस्यौचित्येन सापत्नः प्राप्नोत्येवेति वाच्यं अपटइत्युच्यते तत्र सापत्ने पुंवत्त्वं प्राप्नोति
पक्षिपुनरनपत्य इत्युच्यते इति भाष्यस्यैवमानत्वात् तन्पक्षेहि न सायनो पपत्तिः तन्पक्षे एतदसिद्धेर्भ
गवतानुक्तत्वाच्च एवं चापत्यत्वप्रकारकबोधे सायनो निष्टइति स्पष्टमेव लभ्यते नचैवमप्युक्तरीत्याउर्वी
रः भाष्यप्रामाण्यादेव तस्मान्नाणिति माधवोक्तेः वस्तुतः शिवादौ नसपत्नीशब्दपाठः किंतु स
पत्नस्यैवेति भाष्ये उक्तेस्तस्मादणः प्रवृत्तिरेव न तत्पाच सिद्धांत भाष्ये सापत्नः प्रकृत्यंतरत्वात् सपत्नशब्
दः प्रकृत्यंतरमस्तीति अन्या प्रकृतिर्यस्य स प्रकृत्यंतरः सत्वादित्यर्थः प्रकृत्यंतरमेवाह सपत्नशब्
द इति अत्र ग्रणनिरूपितमित्र प्रकृतित्वमेव सपत्नशब्दस्य शब्दमर्यादया लभ्यते ननु ङीनिरूपितं लक्ष
णया तथा व्याख्याने च नामार्थं एवं च सपत्नीति गणपाठमाश्रित्य पूर्वपक्षः त्वदीया प्रकृतिर्गणेन
पद्यते किंतु मित्रः सपत्नशब्द इत्युत्तराशाय इति न कश्चिद्दोषः सपत्नेऽपि पाठेपि लिंगविशिष्टपरिभाषया
ङीनंतादण न च परत्वादस्मात् स्त्रीभ्यो ढक् एतस्मात् शिवादिपाठस्तु मध्ये पवादन्यायेन नास्य बाध
क इति वाच्यं तत्र बाधसामान्यचिंताश्रयणात् एवं च सपत्न्या अपत्यमित्यर्थेपि सापत्न एव तत्पक्षे तु राम
सापत्निः स्यात् यदि तु सोपीष्ट इत्याग्रहस्तदा बाह्वादित्वात् साध्यः एवं च भावकर्मणोः यत्यंतलक्षणे

यकि सापत्न्यं अभाषितपुंस्कत्वात्पुंवत्वं नेति पारायण इति धातौ माधवेनोक्तं न त्विदं प्रयोगस्तु सपत्नप्रकृतिका
देव चारुणादित्वान्ङीषि बोध्यः अस्मान्तु पक्षांतरालक्षणे यकि सापत्न्यमित्येव मूलोक्तं द्वितीयसपत्नीशब्द
गीकारेपि तन्न दुर्वारमेव यत्तु न्यासकृतानित्यं सपत्न्यादिष्विति समुदायोच्चारणादस्य पुंवत्वं नेत्युक्तं तन्न सभा
वार्थे न ह्यर्थे च निपातनाव यकत्वात् अन्यथा संवृद्धिह्रस्वादीनामपि बाधापत्तिः प्रकृतवार्तिकस्य भा
ष्यविरोधाच्चेति दिक् ककसोऽस्य अभन्त्वार्थमिदं भावत्व इति बावस्थायामेव पुंवत्त्वं एकादेशं बाधित्वानां
न लक्षणः कादेशः अत एव न भस्याढ इत्यनेन सिद्धिः भत्वस्याभावित्वात् कसि सिन्त्वेन पदत्वाच्च न चे
कादेशो भत्वात्प्रत्ययो न्यपत्तेः पूर्वमेव भस्याढ इति पंचत्वेतन ष्यकि कादेशस्य परत्वेपि नस्मिन्पुंवत्वस्य +
निवृत्त्यापत्तेः एकादेशे पुनः कादेशोऽनुपसिद्धिरिति वाच्यं स्थानषादेशयोरेकारस्योच्चारणार्थत्वे त्विधिते
न स्यानिवत्त्वायोगात्संनिपातपरिभाषया च मात्रिष्विक वन्कादेशप्रापणेरिति स्थष्टं भाष्ये पुंवत्वनिवृत्तेरे
व मप्यवारणादित्याहुः भाष्यकारेष्टेति अष्टाध्याय्यामपाठात् अन्यवार्तिकानामिवास्मिन्प्रकरणेऽपा
ठाच्च भाष्यदावन्यकर्तृकत्वानुक्तेश्च भाष्यकारीयत्वमेव कल्प्यत इति भावः इदं च दक्षिणोत्तराभ्यां मतस्य च।
दिड्नामान्यंतराल इति सूत्रयो भाष्ये पठितं अनेन सूत्रवार्तिकयोरुक्तिसंभवोऽप्युक्तः उत्तरदृष्ट्या पूर्वस्याप्र
वृत्तेः गतार्थत्वादिति पाठांतरं अत्रेदं बोध्यं एकतद्धिते वेति न गतार्थे एकशब्दादकन्नित्वतन्त्रोः परत एकि
कत्वमित्यादौ पुंवत्वे इकारो न श्रूयेते पाचकजातीयेत्यादिवत् ह्रस्वे तु भवति श्रवणं प्राप्तजीवकवत् न
चैकत्वविभक्तिकनिर्देशात्तारप्रस्वरूपं विवक्षितमिति वाच्यं इत्येतं नन्वेकतद्धिते चेति न गतार्थं एकशब्दा
दकचित्वतन्त्रोः परत एकिकत्वमित्यादौ पुंवत्वे प्रत्ययस्यादिनीत्वं न स्यादाप्यरत्वाभावात् ह्रस्वे तु स्यानिवत्त्वे

न्नमि

प्र॰ प्रो॰ नाप्यरत्वं प्रत्ययस्थादिति सूत्रेत्याकारप्रश्लेषो नास्तीति प्रागेवनिवनि रूपितं नकोपधाया इति निषेधेन पुंवत्वाप्राप्तेश्च ।
किं चोपसर्जने ऽत्यर्के त्वाधर्ष्येनदा वश्यमिति चेन्नस्य विभक्तिकनिर्देशेनैकशब्दस्वरूपस्य विवक्षितत्वात् द्वावंतस्य
नुग्रहणं भवत्येवास्मल्लोत्यपरिभाषया एकशब्दोत्पस्यच्छस्य विधानसामर्थ्यादित्याहुः नच संज्ञाभूतार्थेनत्र्यभि
व्याप्त्या पदार्थोपे इति न्यायेन वारणान्न ध्वनितं चेदमेकतद्धिते चेति सूत्रे भाष्ये वस्तुतस्तु त्र्य विभक्तिकनिर्देशोन्नारंदत्वा
453 संपूर्णसूत्रवैयर्थ्यापादनायेत्वया संपूर्णसूत्रसार्थक्यानुरोधेन लाघवायाविभक्तिकनिर्देशोन लोपः प्रातिपदि
कांतस्येति विवदितिकल्पनमेवोचितमिति दिक् इदंचित्यमेव भाष्यं नु प्रयोजनोपलक्षणं बोध्यं पत्वेकतद्धिते चेति नियमार्थे
तद्धिते नात्र रूपदयोरेवैकशब्दस्येति नत्र पुंवद्भाव नियामकत्वेकृत्स्य प्रकरणे पाठस्यासंगतता पत्तेः किमुदाहरणमे
कत्वमेकना पुंवत्त्वादध्येतनात्सिद्धं न सिध्यति उक्तमेतत् त्वतलोर्गुणवचनस्येत्यादि शंका समाधान परभाष्य
विरोधाच्च विधित्वेएवसूत्रतात्पर्यात् नियमकलस्यदुर्वचत्वाच्च एकशब्दस्यैवेति नियमस्त्वनाशंक्य एवकृत्स्य
पुंवत्प्रकरणे वैयर्थ्यापत्तेः पत्रठक्कक्षसोरिति नियमार्थमिति तत्र भवत एवेति नियमे हास्तिकमिति भाष्योदाह
रणविरोधापत्तेः कस्त्वहचरितठकोन्यस्मादविधानाच्च भवत इति पदस्यानुपात्तत्वाच्च एतेन भवतष्ठक्छसोरेवे
ति नियम इति परास्तं भवन्मयो ध्यापयतिनावनीयतिरिति महाकविप्रयोगविरोधाच्चेति दिक् इष्टेरुदाहरणमा
ह सर्वमयइत्यादि नत्रागतनरत्यर्थे मयट् तसिलादिषु मयटोपरिगणितत्वान्न सूत्रेण गतार्थता सर्वकमार्य
इति नच स्त्रियाः पुंवदिति सिद्धिः नकोपधाया इति निषेधात् अस्यत्वननिषेधः अनंतरस्येति न्यायेन एतत्प्रकरणो
क्तस्यैव निषेधात् अस्या इष्टेरत्र प्रकरणे प्रमाविष्टत्वात् इदमेवाभिप्रेत्य यमिष्टिर्भाष्ये प्रकरणांतरे पठितेत्याहुः राम॰
नचव्यत्यंतर्गतस्यास्य गौणत्वात्सर्वनामत्वाभावः मात्रग्रहणेन वृत्तेः प्राक् क्वचित्सर्वनामत्वेन दृष्टस्य संप्रति

तदभावेपि तदभ्युपगमात् मात्र शाब्दः कार्त्स्न्येन तत्ताम् अर्थानां प्रतिकं भीत सर्वकं च सर्वनामत्वं निमित्तत्वेनाश्री
यत इति तत्वं अत एवोत्तर पूर्वायेत्यादिभाष्योदाहृतं संगच्छते प्रथमद्वितीयकतरयोरित्यादिप्रयोगास्तु पदसं
स्कारपक्षे सामान्येन पुंसकत्वमाश्रित्य समाधेयाः अन्यथा प्रथमशब्दस्य क्वापि सर्वनामत्वाभावादस्याप्राप्तेः
केचित्तु मात्रग्रहणाद्यस्य क्वचित्सर्वनामत्वं दृष्टं तस्य तत्रो पुंवत्वमित्यर्थात्प्रथमद्वितीयकतरयोरित्यादिसि
द्धिः तृतीयासप्तम्योरित्यादौ तु संज्ञात्वात्कदापि तत्वं न दृष्टमिति न दोषः टाभ्यांभिसित्यादिसमुदायत्वे नैव
बाधानुपभावात् इत्याहुः तेनातिसर्वायेत्यादौ सत्ताकभूतसर्वाघटितसर्वाप्रत्यत्यादौ च न तद्दृतौ तद्दृ
त्ते: प्रागवास्य क्वचिदपि सर्वनामत्वाभावादित्याहुः नन्वेवं तदितरेत्यादावपि पुंवत्वं स्यात् तत्राह एवं स्येवेति
वृत्तिघटकानेकभागमध्ये यत्किंचिदवयवपूर्वस्येत्यर्थः वृत्तिघटकत्वं च प्रकृतिप्रत्यययोः पदयोर्वालिं
गादितिभ्यन्ययोर्वा द्वे तयोः कार्यं पूर्वस्यापिविधीयमानमित्यर्थ निर्विषयं स्यादितिभावः दक्षिणपूर्वादिगि
तिभाष्योदाहरणमप्यत्र लिंगं तेनाकचीत्यादि उपलक्षणमेतत् तदितरेत्यादेर्वद्वसर्वादेश्चेत्याहुः एतौ
यत इत्तिकर्तुः क्वाडि पुंवत्वेकत्सार्वेति दीर्घः मानिन्ग्रहणं समानाधिकरणार्थमस्त्रार्थं चेति यथाक्र
ममुदाहरति स्वामित्यामिति मनइति णिनिः तांतत्वान्ङीष्पुंवत्वात्मानमेव दर्शनीयं मन्यते तत्र एकस्या
एव रूपभेदेन कर्मत्वकर्तृत्वयोः सत्वेपि वास्तवाभेदेन सामानाधिकरण्यमाश्रित्याः स्त्रियाः इति सूत्रेणो
वसिद्धमितिभावः नकोपधा सोत्रो पसंख्यानिकपुंवद्भावमात्रस्य निषेधोय अत एव दिल्लेपिकायाधर्मे वैले
पिकमित्यादौ भस्याढ इति पुंवत्वं न इष्टेस्तु न निषेध इत्युक्तं उत्तरनिषेधास्तु सोत्रमात्रविषयकाः इति स्पष्ट
मात्रभाष्ये पाचिकेति रावुलकादेष्टादिवत्वानि रसिकेति अतइनिठनाचितिठन् मद्रिकेति मद्रवृज्योः कन्

श. श. 454

तद्धितवृग्रहणेनेति द्वाभ्यां नञ्नस्य प्रत्येकं संबन्धात् तद्धितग्रहणं वृद्धिग्रहणं चेत्यर्थः पाकेति अर्भक पृथुक पाका वयसी
त्युणादिकप्रत्ययान्तः अजादिपाठादाप् पाकाबाला पंचमी पाकेति याचे पापूतसिन्नादिविधिना प्राप्तिः वृद्धिशब्देनेति
वृद्धिशब्दस्यावर्त्तनेनैनो कार्यलाभ इति भावः स्रौघ्नीति स्रुघ्नान् भवार्थे णिङीप् मध्यमेति भवार्थे मध्यान्मः
कौण्डलावेति कर्मण्यण् उदयं तावदिति तत्परिमाणमस्यास्तावतीयत्र देनेभ्य इति वतुप् आसर्वनाम्न इत्याकारो
न वृद्धिशब्देन विहित इति भावः काषायीति कषायेण रक्तेत्यर्थे णिङीप् हैमीति हेम्नो विकार इत्यदानादेशेत्यत्र फ
लोपधेति इदं च प्रवाहणस्य ढे इति सूत्रे भाष्ये ध्वनितं अत एवार्धप्रस्थिकीभार्या यस्येति विग्रहे अर्धप्रस्थिकभार्य
इत्यत्र निषेधो न अत्र हि नातः परस्येत्यनेनोत्तरपदवृद्धिनिषेधात् पूर्वस्यैवैकल्पिकत्वेनाभावाच्च अत एव निमि
त्तग्रहणं चरितार्थं अन्यथा वृद्धेस्तद्धितस्येत्येवरूपात् वृद्धिरूपतद्धितासंभवेन तन्निमित्त इत्यस्य संभवात् नन्वदं
उप्रवहरणमस्यां क्रीडायामित्यर्थे दाण्डा इत्यादौ अर्धशसूक्ष्वात्मत्वर्थीये चि स्त्रियां टापा सहैकादेशो अर्धशाभार्य
इत्यादौ च वृद्धिरूपतद्धितसंभव इति वाच्यं अविकार इति पर्युदासेन वृद्धिरूपतद्धितायहणात् तद्धि विकारेषु हि इ
पत्तद्धितोस्ति तच्च पाठान्तरं वक्ष्यमाणभाष्यप्रामाण्येन इत्यानामनभिधानाच्च यद्यपि भाष्ये निमित्तग्रहणसामर्थ्या
द्वृद्धीनां निमित्तमिति वृद्धेर्निमित्तं यस्मिन्निति वार्थो अपलेन निमित्तग्रहणसामर्थ्यादेव व्यपदेशिवद्भावाप्रवृत्त्या
तावद्भावेदोषपरिहार उक्तस्तथापि वृद्धीनां तद्धितस्येत्येवमिति किं तस्तद्धितस्येत्येव सिद्धे निमित्तग्रहणेन दर्शिमि
ति बोध्यं आद्ये निमित्तत्वं यावद्वृद्धिजननयोग्यत्वे सति यत्किंचित्फलोपहितत्वं शब्दव्यापाराश्रयणेपि यत्किंचि राम·
त्फलोपहितत्वमेवतत् इत्यन्तं फलोपधानं नादैच्समुदायं प्रति माना भावादसंभवाच्च किंतु वृद्धित्वावच्छिन्नं यत्किं
चित्त्वं अत एव पारिषद्याभार्य इत्यत्र न पुंवत् अन्यथा पारिषदोन्यस्य यावत्तद्वृद्धिफलोपधानाभावेन दोषः स्यात्

ाकार वृद्धिसंज्ञां विधायात्र तद्धिते स्थानाद्देर्मादेरित्यनेनैव तद्विधानमिति पक्षान्तरमुक्तं सूत्रभेद

अत एव वर्णायाह तेनेति सूत्रभाष्ये भांटा हृ न भार्याय स्येत्यर्थे पुंवद्भाव प्रतिषेध उक्तः वैयाकरणभार्य इति न चैचौ प्रवृत्ति फलो
पधायकत्वमस्त्येवेति वाच्यं न योर्वृद्धि शब्देनाविधानात् न चात्र यवत्वनिषेधेति षेधे इष्टापत्तिरस्तु वृद्धिरादैच् सूत्रे
तद्भावितानामेव संज्ञेति पक्षे भाष्यकृता ग्रामगुणादिभ्यः — मयट् — फिज्ञामप्राप्ति दोषवत् अत्र पुंवत्व प्रतिषेधा प्रा
प्ति रूपदोषानुपन्यासेन तदप्राप्तेरेवेष्टत्वानुमानात् दाविकीस्त्रापसीभार्यायस्येत्यर्थे दाविकीभार्य इत्यादौ दवि
काप्रिंशपेत्यात्वे पुंवत्वं न भवत्येव तत्र वृद्धिपदमनुवर्त्य वृद्धिसंज्ञाकारविधानात् अत एव भाष्ये दविकेत्यस्य
पृथमाध्याय पाठे न एषामौरो वृद्धिसंज्ञत्वप्राप्तितं सूत्रमात्रभेदेन तत्र दूषितमित्यनाल्प पर्युदासेनैव तद्धितला
भे तद्धितपदमकर्त्रे रिच कारक इति वत्त्र आयानित्यत्व ज्ञापनार्थमिति वोध्यं वृद्धिसंज्ञा सूत्रस्थे एतन्सूत्रे व्याधिक
रवद्गुग्नीस्थादिपक्ष परसिद्धान्त भाष्योक्तपक्षेपि यथा एनयोः सिद्धिस्तथा भाष्यप्रदीपोद्योते निरूपितं यत्तु न
याभ्यामिति सूत्रे नित्यत्वादैचि यद्यपि वृद्धिस्तथापि रेव स्यादिति तन्निषेधो व्यर्थ इत्यापातकविषयार्थमिति भाष्ये
उक्तत्वेनात्र पुंवत्त्वनिषेध इष्ट इति तन्न अपवादत्वेन वृद्धिवाधस्यैव न्याय्यत्वेन पाठान्तरं यद्यपीति शब्देन भगवता
तस्यैव ध्वनितत्वेन च वद्ध्यप्राप्त्यैव निषेधवैयर्थ्यं भाष्यतात्पर्येण तद्विरोधाभावादिति नव्याः केचित्तु भाष्ये ताव
ज्ञावदोषवारणाय शब्दव्यापारस्यानुक्तेस्तदाश्रयत्वेन मानं ऐचौ प्रति नत्त द्धितस्य निमित्तत्वमस्त्येवाधिका
र प्राप्तत्यागे मानाभावात् एवं च वैयाकरणीभार्य इत्येव एतेन वृद्धिरादैच् सूत्रे भाष्ये तद्भावितानामेव सं
ज्ञेति पक्षे च पुंवत्वप्रतिषेधाप्राप्ति रूपदोषानुद्भावनेनात्र तन्निषेधानिष्ट एवेत्यपास्तं किं चादैच् मात्रग्रह
णपक्षे वैयाकरणीभार्य्येतावद्धार्थ एव निषेधानापादने तत्र तत्व वत्त्रे रिष्टत्वमनुमीयते किं चैवं सति शाद्य।
व्यापाराश्रयणस्य वद्रूपकत्वेन तावद्धार्थदोषवारणाय व्यधिकरणबहुव्रीह्याद्यविपर्यंत भाष्यरूतोद्याद्यमानं
विफलं स्यादित्यलं बहुः २

प्रा॰ शे॰

युक्तिविरुद्धतया पूर्वपक्षस्यत्वेन च तस्य प्रौढिवादपरत्वात् यद्यपीति शब्देन भगवता पिवाधितस्य पुनः प्रवृत्त्ययोगे
न सूत्रैकवाक्यतया च वक्ष्यमाणरीत्या वयुक्तत्वस्याध्वनितत्वाच्च निषेधं कुर्वता। सूत्रकृतो मतेन वृद्धिप्रसङ्गे रूपपादयि
तुमशक्यत्वाच्च किंच नित्यत्वाद्वृद्धिनैवापितस्य न वृद्धिः तथा सति प्रयत्नलाघवाय एवं वैव विदध्यादिति दिक्
सुकेशेति स्वांगाच्चोपसर्जनादिति ङीष् अकेशेति सहनञ्विद्यमाने ङीषनिषेधः जातेः पर इति पन्नप
निपदोक्तत्वाज्जातेरिति ङीषं तत्र एवास्य प्रवृत्तिरिति तत्र नकोपधायाः इति सूत्रभाष्ये हस्तिकमित्युदाहर
णे औपसंख्यानिकस्य नायं निषेध इत्युक्तेः न हि हस्तिनी शब्दाज्जातेरिति ङीष् ऋदन्त्वाभावात् न च स्वां
गाच्चेतस्य त्वस्यैवैपर्थ्यं तत्रापि जातेः परत्वादनेनैव सिद्धेः केशादीनामप्याकृतिग्रहणत्वेन जातित्वादि
ति वाच्यं प्रत्यासत्त्या जातिवाचकान्निस्त्रीत्वार्थस्त्रीप्रत्ययस्यैव ग्रहणे नादोषात् + भविष्यस्य स्त्रीत्वविशि
ष्टजातिबोधकत्वाच्च अंगत्वाव्यपविरहं तिजातिरेवैतत्कास्त्रे जातिग्रहणे न ग्रहणमित्यपि कश्चित् अन्ये तु
+ स्वांगलक्षणेन जातिलक्षणं वा धादित्यपि कश्चित् जातेरिति षष्ठी जातिवाचकस्त्रीबोधकशब्दस्ये।
त्यर्थः अत एवेडविडो गोत्रापत्यं स्त्री इडविट् सा भार्या यस्य डविड्भार्य इत्यादौ पुंवत्त्वनिषेधसिद्धिरत
एव भाष्ये नूङः इत्यस्य पर्युदासत्वे ऐडविडवृन्दारिकेति पुंवत्कर्मधारयेति सूत्रविषये दूषणं दत्तमित्या
हुः + परे तु सूत्रद्वयस्याप्येकतात्पर्यवत्त्वबोधनाय तत्राप्यस्यानुवृत्तिबोधनाय च सूत्रद्वयसाधारणमु
दाहरणं दत्तं भाष्ये न हि कर्मधारयेऽस्याप्रवृत्तौ तीनमस्ति अत एव प्रतिषिद्धार्थे पुंवदिति सूत्रमित्युक्तमा राम॰
करे तस्मादिदं भाष्यं तत्र पुंवत्त्वाभावे मानं एवं चेडविडभार्या यस्येत्यर्थे यदि समासस्तानिधानं तदा एडवि
डभार्य इत्याद्येव साधु जातेश्चेति निषेधस्यानित्यत्वेन दृष्टोविषयेऽप्रवृत्तेरित्याहुः + सोत्रस्यैवायमिति न।

कोपधायाः इति सूत्रव्यतिरिक्तः सर्वोऽपि निषेध इत्यर्थः स्पष्टं चेदं न कोपधायाः इति सूत्रभाष्ये अत एव गार्गीन्ना-
त्म इत्यादौ भस्याढे इति पुंवत्त्वमित्याकरग्रंथाः संगच्छन्ते अत एव च पुंवत्कर्मधारयेति सूत्रे दारक इति पुंवत्त्वो-
दाहरणं भाष्योक्तं संगच्छते + विप्रतिषेधवार्त्तिकबलादेव क प्रत्यये पुंवत्त्वं त्वोत्तपनेन न स्यात् सोऽत्रत्वादित्यादि निकेति
नू परे नुनसिलादिसूत्रे परिगणनस्य वार्त्तिककृतैवोक्तेः कापि निषेधो न स्यात् यदि वार्त्तिकोक्तत्वेऽपि सोऽत्रत्वम
त्यस्ति तर्हि कस्यापि विप्रतिषेधवार्त्तिकबलेन न तसिलादिषु ग्रहणं नुपात्तेन सोऽत्रत्वमस्त्येव न च तद्धलेन क-
विषये स्वतंत्रमेव वचनमनुमीयते न न तसिलादिषु ग्रहणमिति वाच्यं गौरवाद् दारदक इति भाष्योदाहरणेन
ज्ञातेऽश्रेनि निषेधानित्यत्वकल्पने नादोषादिति वदंति यत्तु ज्ञापि सूत्रे ऽन्यानीत्येव कठमानिनीति तज्ज्ञानु-
क्तं म + नु भाष्ये नुपलंभान्मूलकृतोपेक्षितं संख्यया दशासमीपवर्त्तिन इत्यर्थे सामानाधिकरण्यस्यान्य-
पदार्थे वृत्तेश्च विरहान्पूर्वेणाप्राप्तौ वचनं अनेकमन्यपदार्थे इति सूत्र एव शेष ग्रहणानुवृत्त्या शेषाधिकार-
स्य त्वाभावात् इतः कवभार्यमित्याकरे फलांतरं दर्शितं ननु शेषादिति सूत्रे बहुव्रीहौ सकथ्यादन्तेरित्याप्य-
प्रत्यय एव शेषोऽपेक्ष्यत इति भाष्य रीत्यापाद्येव न च मतेन नु चिंत्यं समीप्ये सतीति समीपियोतके नो येन बहु-
व्रीहिरिति भावः समीपिद्योतक नाचास्यात्रैव भाष्ये स्पष्टा समीपार्थे नत्वव्ययीभाव एव उपदशा इति
दशासमीपवर्त्तिन इति बोधः स्वरूपन्ति दशत्व समीप संख्यावत्त्व संबंधेन चान्वयः तदाह नवैकादशा वेत्य-
र्थे इति अत एव दशानां वलादीनां समीपयोगवादयस्ते उपदशा इति न भवतीत्याहुः एवं च नित्यबहुव्रच-
नोऽयं निशाद् इत्ये ति सूत्रे तीमिलुन्नष्टीकमिति भावः तिलोपे च परत्रूपपदमित्रस्य समुदायस्यानन्तवि-
घमानत्वात् यस्येति लोपस्य न स्थानीयत्वेन तिलोपस्यासिद्धेरिति बोध्यं ह्रौवेति संशय विषयत्वं वा

प्रा॰ श्रो॰ र्थः संशयविषयद्वित्वत्रित्ववंतइतिबोधः अत एव नित्यं बहुवचनांतइति केचित् विकल्प एवार्थः सच परस्परप्रतिक्षे
पकत्वं तयाचक्रियानिरूपितपरस्परप्रतिक्षेपकद्वित्वत्रित्ववंतइतिबोधः एवंच नियमतः पंचास्मादुपरि षट्ं तइतिव
हुवचनं उक्तंच सेषां वचाधिष्ठानावागिति कार्यान्वये हि विकल्पो नत्वेन ज्ञानस्य बोधविषयत्वेपीत्यन्ये संशयेऽस्वा
भावसमाधिकरणत्वरूपो विरोधो धर्मयोर्विकल्पत्वं तु धर्मिणोरिति संशयार्थविकल्पयोर्भेद इति बोध्यं द्वित्राद्यन्तार इति
प्राक्तिस्वभावात् सुजर्थे बहुव्रीहिः प्रवृत्तौ तु सुजर्थो न भावे लोकार्थीभावाश्रयणान्त चोपप्रयोगः द्विशाद् स्यच
वृत्तिविषये द्वित्वसंख्याकावृत्तिबोधकत्वं न स्याच्च विषयतयेतरपदार्थे संबंधः एवंच द्वित्वसंख्यापि विशिष्टावृत्ति
विषयादशेति बोधः स्पष्टं चेदमत्र भाष्ये नन्वत्र वार्थः + पाठांतरं ननु अत्र वार्थः सुजर्थश्चान्यपदार्थ इति पूर्व
लो एव सिद्धं न च मत्वर्थे पूर्वयोगोऽस्त्वार्थो चेदीमतिवाच्यं प्राप्तोदकादिषु मत्वर्थं विनापि तत्स्वीकारादिति चेन्न
सुजर्थस्यान्यपदार्थत्वाभावात् कृत्वभावार्थे सुचस्य वपकत्वाच्च उक्तविषये पूर्वसूत्रेण समासे प्रातिकपर
त्वस्य वक्ष्यमाणत्वादित्याहुः इत्यंते सुजर्थश्चान्यपदार्थप्राधान्येन सूचने: इह तु वार्थः सुजर्थो न प्रधानं सा
मानाधिकरण्याभावाच्च अयं सर्वोपविषयविभाग इति शब्दः प्रकर्षेण लभ्यते अत एव निरादीनां गतार्थे
वृत्तौ नायं समासः किं नु तत्पुरुष एव अत एव संख्यायास्तत्पुरुषस्य उक्त्वा चो निस्त्रिंशाद्यर्थमिति वार्तिकं सं
गच्छते अन्यथा निस्त्रिंशादेः परत्वादनेन बहुव्रीहेरेवापत्तौ नतदसंगतिः स्पष्टं चेत्याहुः संख्येयेति किं चत्वारो वि
प्राः अव्ययेत्यादि कं विप्राः पंच संख्येये इति किम् अधिविंशते र्गवां संख्येति अंतराल इति अत्रांतरालशब्देन दिग
वयवस्यासत्याग्रह्यते अतएवेन द्विहितसमासस्य नित्यस्त्रीलिंगनामरोक्तासंगच्छते पक्षान्न चेति विभाषेति सूत्रे। राम॰
भाष्यं दक्षिणपूर्वस्याम चिरकृतायां शालायां संप्रत्यपरस्यादिति तत्र लक्षणया पिने तुं शाकां इत्याहुः इंद स्व

ग्रहणक्रियायांन
भावेलोकार्थीभाव
मापन्ने इत्यर्थः

त्रमसमासाधिकरणार्थे विभाषादिकस्मासः इत्यत्र प्रतिपदोक्तस्यास्यैव ग्रहणार्थं कत्वभावार्थं च दक्षिणपू
र्वैत्नि सर्वनाम्नोऽवृत्तिमात्र इति शुवच्चं तत्र तेनेदं सप्तम्यंते ग्रहणविषय इत्यादीनि प्रथमादिवचनांतानि ग्रहणेऽ।
स्मिन्निति ग्रहणं केशाकेशादि प्रहरणं दंडादि तद्वाचके इत्यर्थ इति कश्चित् ग्रहणक्रियायामन्विते इत्यादिरर्थे
इत्यन्ये इदं पुद्गमित्यर्थ इति तत्र विशेष्ये इत्यर्थः अत एवमर्थं किमकर्तृकं दंडतांडवं भुजाभुजि द्वोणिभूतांदि
इत्तसे इत्यादौ पुद्गादिवाचकपदोपादानं संगच्छते यत्र तु तदनुपादानं तत्र तदध्याहारेणान्वयः इदं चकैय
टाद्यनुरोधेनोक्तं वस्तुतः क्रियामात्रेऽयं साधुः अत एव भाष्ये क्रियाभिधानादित्युक्तं अत एव कर्णाकर्णि प्रथि
तमप्यशोवंधुवर्गैरभाणि हस्तिमिषान्स्प्रहत्यकुचलटां मित्यादि प्रयोगाः संगच्छन्त इत्याहुः अयं विषय।
विशेष इति इति शब्दश्चात्र प्रकारेण तत्वं च लोकप्रसिद्धत्वं निदर्शनं च लोकप्रसिद्धानामेव तदेतद्द्युत्यते इति
शब्दो लौकिकीं विवक्षामनुसारयतीति ग्रहणप्रहरणरूपे त्र्यपदार्थभूतक्रियारूपः कर्मव्यतिहाररूपश्चास्य
र्थः कर्मव्यतिहारः परस्परग्रहणादिः अत एव च कर्मव्यतिहार इति संगच्छते कर्मव्यतिहारे बहुव्रीहाविति
प्रकृत्याभिप्रायानुरासादित्यादे इतनैव साधनात् इच्समासान्त इति इच्कर्मव्यतिहार इत्यनेन तिष्ठद्गु इति
ननु केशाकेशीत्यस्याव्ययत्वेन मानं क्वचिद्भाष्ये निर्विभक्तिक केशाकेशीति प्रयोगस्तु नपुंसकमाद्ययोप
पद्यत इति अव्ययत्वेन मानं अव्ययीभावित्वे तु स्तुतरामिति चेन्न वृत्त्यादिषु मात्सर्येन तत्त्वामीकारात् अत एव
केशाकेशि कुर्वते नित्यादौ परांगवत्वं भवत्येव अव्ययानां नेति निषेधस्तु नाव्ययीभावस्येति स्पष्टं भाष्ये न च
वमव्ययीभावसंज्ञाया बहुव्रीहिसंज्ञाया बाधात्समासस्वरे लोवादात्तत्वे सिद्धे किमिचिष्ठित्वेनानचउप।
पत्तीव्यविरोधस्यान्याप्यत्वेन संज्ञयोः समावेश एवोचितः इति वाच्यं समावेशोपि सति शिष्टन्याय मूल

प्रा॰ प्रो॰

457

कान्निमित्तस्वरापेक्षया निमित्तिस्वरस्य बलवत्त्वादव्ययीभावत्वप्रयुक्तसमासान्तोदात्तस्वरेणैव सिद्धेश्चिन्त्य
त्वैयर्थ्यस्य नदवस्थत्वात् निमित्तिस्वरबलवत्त्वं च समर्थसूत्रे भाष्ये स्पष्टं समासान्तानामलौकिके प्रवृत्त्या समासां
तेकृतेव हृद्गीहित्वप्रयुक्तपूर्वपदप्रकृत्याचरितार्थ्येनाव्ययीभावप्रकरणेऽस्याऽपाठस्याचरितार्थत्वया श्याकाङ्क्षीरस्य
त्वप्राप्तबाधस्य लौकिकोपजीव्यविरोधेनान्यथाकर्तुमनुचितत्वात् आकडारशास्त्रावाधायैव योगपत्ना मात्वेनोच्
प्रवृत्तिरिति चेत्तविशेषणार्थं च स्य सत्त्वान्तिष्ठद्गुप्रभृतिष्वधिकारपाठेऽपि सूत्रे गन्धिरित्यादावतिव्याप्तिः स्यात्
समावेशफलं नु इच्प्रत्यया व्ययत्वयोः सिद्धिः ननु तत्र तेनेदमित्यव्ययीभावप्रकरण एव पाठ्यं इत्युपितत्स
मासान्तप्रकरण एव पाठ्य एवं च तिष्ठद्गुप्रभृतिषु पाठस्यानावश्यकत्वं च शेषोपव्यर्थ इति चेत्र द्विदण्ड्यादि
ष्वश्चेति सूत्रेऽस्याऽदानुवृत्त्यर्थमात्रपाठस्यावश्यकत्वात् किं चिधनुषा धनुषा चेदं प्रवृत्तं युद्धमित्याद्य
र्थविवक्षायां अनडन्यथा नाप्नोतिः सिद्धान्तेत्वेषु परत्वादनङेवेष्यत इत्याहुः गृहीत्वेति त्वाप्रत्ययोध्याहृ
त इस्थित्यादिक्रियामादाय बोध्यः केशाकेशि गृहीत्वास्थितयोरिदं युद्धं प्रवृत्तमित्यर्थात् ग्रहणकर्म
त्वं प्रत्यासत्त्या केशादिविशिष्टपुरुषाणां बोध्यं युद्धस्यानेककर्तृकत्वात् केशादिपदद्वय प्रयोगात्स
मासाच्च कर्मव्यतीहारस्य लब्धत्वेन व्यतीतिनोक्तं परस्परमिति शेषो वा इदं सूत्रं वैयधिकरण्यार्थम
प्रथमार्थार्थमेकशेषबाधनार्थं च एकत्र ग्रहणं प्रहरणादावन्वयेन सहविवितास त्वात् सरूपत्वा
त्वद एकशेषः प्राप्तः स्वेवं नद्धं विना समासाभावादनवकाशत्वेनानेन बाध्यत इत्याहुः मुष्टीमुष्टीति
पन्त्तदर्शिग्रहणादनदंन पूर्वपदस्यान्त्यमितित्र्यर्वाचीनैरुक्तं तद्भाष्यविरोधादुपेक्ष्यं एवं चेद्दशैर्थेन द राम॰
ण्डाग्रहणं तात्पर्येकल्प्यमिति प्रामाणिका आरोहन्तीति न च डोरविन्येचसूत्रानामितिवाच्यं क्व चित्त ।

वर्णग्रहणे निर्दिश्यमानस्येति परिभाषानुपस्थित्या सर्वादेशतापत्तेः भूश्चानोः छ्वि॰ पिउगवादिभ्योपतिभोयमित्यसि।
ध्यापत्तेश्च यथात्र नवांतादिशास्त्रप्राधान्ये तन्निमित्तस्येत्यत्र वृत्त्यादितं मूलमुपलक्षणं मित्याश्रित्य संज्ञापूर्वकेतिवि
धेयकोटौ संज्ञापूर्वके त्यर्थः तेन ओरोदितिन्यासेपिभस्यनद्धितइतिसंज्ञापूर्वकत्वमस्त्येवेति न वाच्यं ओदिति तपरत्वा
संज्ञेति नष्टांकं तकारस्योच्चारणार्थत्वात् फलाभावेन तपरस्त्रापरत्वेश्च न च स्वं रूपमिति संज्ञात्वं स्वं रूपमित्यस्य
प्रत्याख्यानात् ग्रहणग्रहणसामर्थ्येन दृष्टासंज्ञानामग्रहणात्वेत्याहुः यत्त्वेवंसति स्यादेरिनिरितिसूत्रे शौवादंष्ट्रोमगणे
रित्यत्र संज्ञापूर्वकविधेरनित्यत्वात् कोनेनिकेयटाघ...मसंगतं स्यादिति तन्न वृद्धाच्छ इति सूत्रे प्रत्ययग्रहणानुवृत्त्या प्रत्य
यत्वविशिष्टकप्रत्ययविधाने न विधेयकोटौ संज्ञायाअपि प्रवेशात् यत्र शादीनामसत्त्वां संज्ञानुपपत्ते वाक्यभेदेन सं
ज्ञाविधेये नितेत्र संज्ञाविशिष्टस्यैकवाक्यतये वविधिसंभवात् सुञ्जिदायज्ञेनेत्यादौ नामधेयत्वलाभायविध्याव
त्तिं मन्वते न्यायविदः असतां संज्ञानुपपत्तेरित्यस्य चासतां संज्ञया व्यवहारानुपपत्तेरित्यर्थेन विशिष्टविधानेवा
धकाभावात् अत एव सावर्णिको नाम मनुर्भवान्भुवि मविष्यतीत्यादौ पपद्यते किंच न्यायसाम्येनासतोदेव्रवि
धानासंभवेन वाक्यभेदेनैव परत्वे विधाने छप्रत्ययमात्रविधौ वृद्धादित्यादिपंचमंता नामनन्वपापत्तिरित्याहुः
भाष्यप्रयोगादेव तत्र कोन्यपरे स्वायंभुवमिति स्वयंभुवरिदमित्यर्थेण् तद्धिते किं पद्धतीतेन सहेति तुल्ययोगपक्ष
पाअग्रागनादिक्रियायोगस्यो न के सहेत्येतदित्यर्थः वोपसउपसर्जनस्येति न सहस्य विशेषणं अव्यभिचारा
त् असत्त्ववाचितया द्वंद्वासंभवात् न च पूर्वाङ्गस्य सारूप्यं सह पूर्वाह्णमित्यादौ व्यभिचारोस्त्येव अकालेस्त्वनु
केरव्ययीभावे चेत्यस्य प्रवृत्तेरिति वाच्यं पाठांतरं तस्याप्यव्ययमिति प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात्
अतो व्यभिचारात् व्याख्यानाद्वनद्वन्द्वपदेन संनिधापितस्य समासस्यैव पूर्वकारकं विशेषणं समासस्यो।

पा·यो· पसर्ज्जनत्वासंभवात् इत्यंतं वेत्येवमत्रापित्वाम्रकालेऽव्ययीभावेऽत्यनुवर्त्यप्रसक्त्यप्रतिषेधं चाश्रित्यकालो
त्तरपदेऽव्ययीभावेनेतिवाक्यभेदेन व्याख्यानेनैव सिद्धेः किं न तत्र पदेन संनिधापितस्य समासस्यावयव
प हारके विशेषणे समासस्योपसर्ज्जनसंज्ञायाऽभावात् नच सहकृत्वविषयत्वादोऽसंभवत्येव समासउपस
 र्ज्जनं एवं तर्हि लक्ष्यानुरोधादेवोपसर्ज्जनस्येति व्यधिकरणबहुव्रीह्याश्रयणं + व्याख्यं + वोध्यं सर्वत्रच कश्चि पाठं मकथीया
दवयवउपसर्ज्जनमेवेति विशेषणसामर्थ्यात्तु उपसर्ज्जनसर्वावयवकस्येत्यर्थः नारप्राश्च बहुव्रीहिरेव चप्रयोगं तं वोध
साहित्यं सहार्थे अत्रापि स्वभावात्तदाश्रयरूपान्यपदार्थांतर्भावेण समासस्य प्रवृत्तिरिति लौकिको
पसर्ज्जनसर्वावयवकत्वमस्यवोध्य समासस्येत्यपि व्यधिकरणमित्याशयेनाह बहुव्रीहेरिति तेने
न हसहकृत्वा सहपृथ्वा अत्र राजनि युधिकृञः सहे चेति क्वनिपुउपपदसमासव्याख्यानाच्च उपसर्ज्ज
नपदेन लौकिकं शास्त्रीयं चोपसर्ज्जनत्वमत्र गृह्यते तेन न सपुत्र इत्यादेरप्युपसर्ज्जनसर्वावयवकत्व
मस्त्येवेत्याशयेनाह बहुव्रीहेरिति सहकृत्वविषयत्वात्रापि न उपसर्ज्जनसर्वावयवके बहुव्रीहौ
पडुत्तरपदं सहशब्दस्य तत्परत्वाभावात् क्वपुत्र इत्युदाहरणे पुत्रप्रतियोगिकत्वसाहित्यापूर्वानितिवोधा
त्पुत्रस्य प्रतियोगितयासाहित्ये विशेषणत्वेनासामानाधिकरण्यपूर्वेणाप्राप्तौ वचनं कवभाव्य।
र्थं चेत्याहुः सपुत्र इति सप्तमी विशेषण इति पुत्रस्य न पूर्वनिपातः प्रथमानिर्दिष्टमित्यनेनोपसर्ज्ज रम·
नत्वाद्यत्र पूर्वनिपातानियमप्रसक्तिस्तत्रैवास्य प्रवृत्तेरित्याहुः प्रायिकमिति लौकिकविवक्षाना
त्पर्ययाहकेचित्प्रायादिदंलक्ष्यं तुल्ययोग इति तुल्ययोगस्वादेरित्याहुः सकर्मक इति स्वार्थिकः अ
नेएवार्थेन सहनिवृत्त इत्यर्थकः सार्थकोनिवृत्त इति हेतुस्तत्रस्य भाष्यप्रयोगः संगच्छते न

नुसकर्मकत्वादौ सहाय्यो यदि विद्यमानत्वं न दाविद्यमानकर्मसंबंधीत्यनुभवसिद्धवोधविरोधः नदाहिक
र्मनिष्ठविद्यमानत्वं इति वोधः स्यात् न च तथानुभवः तस्माद्विद्यमानत्वविशिष्टधर्मवाचीकर्मीदि पदसमाना
धिकरणो वाच्यः तत्र च तृतीयापाठुर्लभत्वेन नानेन समासप्रसक्तिः सदैव पुत्रैर्दस्युभिर्भारं च हन्ति गर्दभी
त्यादौ तु दस्यूनां तु पुत्राणां विद्यमानत्वे पीत्यर्थान्न दोषः दस्युस्तु पपुत्रेषु विद्यमानेषु इत्यर्थकल्पनं तु फ
लितार्थकल्पनं परं तपाकल्पचित्रेयं किंत्वनेकमन्यपदार्थे इत्यनेनैव सिद्धः सादेशोपि स पूर्वापाठ इत्या
दिनिर्देशैः प्रतिपदोक्तपरिभाषापावोपसर्जनस्येत्यत्राप्रवृत्त्या सुलभ एव तत्र न एवानेकमिति सूत्रेण।
स्यान्यथासिद्धिमाशंक्यासमानाधिकरणार्थकत्वभावार्थं चेत्युक्तं भाष्ये संहितप्रायेति सूत्रे केपटादि
भिः सहोक्तरित्यस्य विद्यमानाववत्पस्य इति विग्रह प्रदर्शनं कृतं न परं त्यादौ विवसर्प्वैत्यादौ सर्वनामसं
ख्ययोरित्यस्याप्रवृत्तिरपि प्रसज्यतादाः नित्यत्वान इति चेच्चिंत्यमेवेदं ज्ञापिकत्वं भाष्यानुक्तत्वाच्चेति दिक्
प्रकृत्याशिषीति नेत्येव सिद्धे प्रकृत्येति चिंत्यप्रयोजनं कल्पं तर्हि यजमानस्य सपुत्रस्येष्टर्याभिवृद्धिरस्त्वा
दिप्रयोगा इति चेन्न येष्टापामिवृद्धिरस्त्विति भवंतो नु शृत्वं विति प्रार्थनावाक्यं नाशीर्वचनं पूर्वाशीर्वच
नं न त्यास्त्विति न त्र सपुत्रस्येत्यादि न प्रयुज्यते [illegible]। एवं ति आहुः वहुव्रीहौ संख्येये संख्येयेवर्तमान सं+
पा ख्याशब्दांतो वहुव्रीहिरित्यर्थः अत्र प्रतिपदोक्तसंख्यैयेति विहितसमासस्यैव ग्रहणं नेन द्वौ त्रयो येषां
मिति विग्रहे न डजित्याहुः पंचम्यर्थे सप्तमीत्याह तस्मादिति उपगण इत्यत्र उचिसत्यसति वाचरूपविशे
षो नास्ति इत्यत आह स्वरे [illegible] विशेष इति उचिसति चित इत्यनेनोदात्तत्वमसति तु पूर्वपदप्रकृति स्वरे
णाद्युदात्तमित्याहुः अत्र वहुगणयोरनियतप्रवचयवचनयोरपि यदा चिविशिष्टेष्ट वदशादिषु वृत्ति

प्रा·प्रो·

स्यादासन्नसमीपभूतनवादीनामपि बहुत्वाद्बहुवचनमिति द्रष्टव्यं : संख्यायाइति संख्यान्तस्यानन्तु रूपस्य समासान्तो
डचित्यर्थः एकाधिकाविंशतिरेकविंशतिरित्यादौ गोविंशतिरित्यादौ च न अव्ययादेरिति त्रत्र अधिकलोपादि
ति च वार्त्तिकशेषात् त्रिंशाद्यर्थमिति वार्त्तिकशेषः आदिशब्दस्य प्रकारवाचितया यत्र डित्वफलसंभावना तत्रैवे
नि दम् पाठांतरं अत एवोहित्यादौ बहुव्रीहौ सकथ्यक्ष्णोरिति प्रकरण एव नु इदं नस्त्रितं तथा सति प्रतिप
दोक्तपरिभाषया द्वौ त्रयो यथा मित्यनेकमिति समासेन स्यात् षष्ठ्ककरणसामर्थ्यात्तु न तदप्रवृत्तिः अत एव तादृश
विग्रहे पक्षे कवदिभाष्ये । नंतर बहुव्रीहावपेक्षया पूर्वदिक्तानस्योक्तत्वात एतत्प्रयोगेष्वप्यापि त्वाने ध्या-
नितावात्र प्रतिपदोक्तपरिभाषाप्रवृत्तिः संख्येयेत्यादि सूत्र प्रत्याख्यानवार्त्तिके नत्वप्रतिपाद्यः संख्योत्तरपदः सं।
ख्येयवाचीभिधायित्वादित्यनेन कवभवार्थमस्यावश्यकत्वेन भाष्ये प्रत्याख्यानं वार्त्तिकमित्यन्यत् इत्यंत अ
त एवासिद्धिरित्यादौ नवस्तुतो बहुव्रीहौ संख्येय इत्यस्य लाभाद्बहुव्रीहौ सकथ्यक्ष्णोरिति प्रकरण एव वक्तव्यत्वे।
त्रोत्रि वीवाक्यभेदार्था नत्र च तत्पुरुषादित्यनुवर्त्तते विभाषेति च संख्येये वर्त्तमानसंख्यांतात्तत्पुरुषाडजवेत्यर्थः
सा च व्यवस्थितविभाषेति सर्वेष्टसिद्धिरित्याहुः व्यत्ययेन षष्ठीति सप्तम्याष्येवमेव तदाह बहुव्रीहेरिति नतु
तदंतस्य बहुव्रीहेः समासांत इति व्याख्यानसंभवेन षष्ठ्यां प्रोक्तव्यत्ययो चुचितः अवश्यं तूल्या सप्तमीव्यत्यस्य
षष्ठ्यर्थे कल्पने नैवोपपत्तेरिति चेन्न स्वांगादिति पंचम्या अनन्वपापत्तेः तस्या अपि व्यत्ययकल्पने बहुव्रीहौ राम·
यदसाहचर्येण षष्ठ्या एव व्यत्यय उचितः पंचम्यपि प्रत्ययविधावन्वययोग्यैवेत्याहुः स्वांगं चेद्धाइवं मूर्त्तिम
दिलक्षणलक्षितं वचः वोडीषर्थः तदुदाहस्यात् हरति जलजाक्षीति चिन्त्यमतो दात्रार्थे मतसामर्थ्या
त्सर्वपदप्रकृतिस्वरो नेति स्थूलाक्षीति अत्रा त्रपर्वग्रंथिः पचिहिडीषु स्यात् अव्ययोदर्शनादित्यचू अंगु

वं स्त्रीसदृशेति दारुणोऽप्राणित्वया मुख्यांगुल्यसंभवाद्द्वित्रिभावः द्व्यंगुलेति मात्रचो द्वयसचो वा द्विगोर्नित्यं
मिति लुक् नत्वात्र बहुव्रीहिः पदाभावेपि तत्पुरुषेपि शेषविहितो नेव भविष्यति अत्र न च का प्रात्वे एव विशेषविहितत्व
स्यैव षत्वप्रयोजकत्वात् न चैवमपि दारुणीत्यस्यांगुलिविशेषणत्वे वात्र नातिप्रसंगः पंचांगुलिसदृशानि काष्ठा
नि यस्य पुरुषस्य पंचांगुलिरित्यादावव्याप्तेरेव द्वंद्वाव्ययीभावस्यात्र त्रिरपि कल्पं द्वित्रिभ्यां च क्वचित्प्रकृते षविधानं
द्विमूर्ध इत्यादौ द्वित्रिभ्यां पाद्दन्मूर्धस्विति पाक्षिकांतोदात्तत्वाभावे पूर्वपदप्रकृतिस्वरार्थं क्वचिद्वि चिन्त्यान्नित्यमंतो
दात्तत्वं स्यात् चित्स्वरो हि चित्त्वसामर्थ्यात् पूर्वपदप्रकृतिस्वरं बाधत इति स्पष्टमेव न च द्वित्रिभ्यामिति विकल्पः
सामर्थ्याच्चित्स्वरं बाधिष्यते न चात्र षत्वापि स्वरद्वयसिद्धिरिति वाच्यं समासांताभावेन स्यचारितार्थ्यात्
तदभावश्चानित्यत्वात् अप्रनित्यत्वे च षविधानमेव ज्ञापकं अन्यथा तद्वैयर्थ्यं स्पष्टमेव न च समासांते मूर्ध
न्शब्दांत बहुव्रीहेरभावात् कथं स्वरश्रुतिवाच्यं समासांतानां समासावयवत्वेन मूर्धन्नुत्तरपद कबहु
व्रीहेः सत्वेनादोषात् उत्तरपदावयवत्वं तु न सर्वत्र क्रिम यद्धानन्यत्ते मूर्धन्शब्दांत बहुव्रीहेरिति व्याख्येयमि।
त्याहुः नेत्रुरिति नक्षत्रे यो नेता प्रादुस्तत्र उत्तरपद बहुव्रीहेरित्यर्थः नेता नायकः नेत्र शब्दस्य नक्षत्रत्व।
त्रित्वं च तत्सामानाधिकरण्याद्बोध्यं नक्षत्रेरित्यनेन तु विशेषणात्रे हचंद्रो नेता यस्य स चंद्रनेता मृग इति
अत्र हि तत्र शब्दांतो बहुव्रीहिर्नेत्रे त्रेवतं ने नेनननेत्र प्राहु इति अत्र भाष्ये मासात् प्रत्ययपूर्वपदाट्ठज्वाक्य
व्यः पंचकमासिकः पंचभृतिरस्य पंचको मासः सोस्यांशवस्नभृतय इति संख्यायाः कन् पंचको मासो
स्येति विग्रह इत्युक्तं इत्युक्तं दस्मिन्निति केचित् न नु स्यल्लुपूर्वादिति बहुव्रीहिरिति शेषः अद्वौर्दनादित्यंत
ग्रहणेन ज्ञापितमेनन्नत्र प्रकरणे वर्णग्रहणेन दंत दंत ग्रहणं नात्वीत्याशयेनाह पूर्वपदस्यादिति

प्रा॰ शे॰ ।समानपदे ऽन्यस्यापि उपदेशस्यार्थात्समासे प्राप्ते विध्यर्थमिदं भाष्ये ऽनिशायनं क्रम्यवनमित्यादीनां त्वनभि
धानं बोध्यं रघुनाथादिशब्दे तु हल् ऋवर्णादिपाठाभावात्स्वाभावे णत्वे संज्ञात्वं गापन्नेर्वा खुरखराभ्यां वा णसिति ना
सिकायाः नस्य पेऽन्यत्र केवलादेशवचनं प्रत्ययनिवृत्त्यर्थं न चात्र प्रोषाद्विभाषेति कप्रत्ययः स्यादेशस्ये
वस्यानिष्टत्वात् समासान्तेनाशेषत्वादित्याहुः। पत्तेऽप्यपीति भाष्ये त्वेतत्प्रकरणे तत्पद्यकाशब्दः क्लस्त्राधक्रम
पिमुनित्रयानुक्तमिदानीं न गृह्यते रूपं तेनियतकालाः स्मृतयः यथा कलौ पाराशरी स्मृतिरिति एतच्च
प्रतीताद्धुदनन्ता विनिसत्रकैयटादौ स्पष्टं एवं तदनुक्तमपि मुनित्रयोक्तमादरणीयमेव तदुक्तं पाराशरखुरा
णे पालिनीयं महाशास्त्रं यदसाधुत्वलक्षणं सर्वविकारकं यात्युपेक्षितमनवजर्यं न किंचिनेति शितिना ऋचैना
अर्हिनाऽति नैगमाऽन्यपि भाष्ये रूपपत्तेः तदुक्तं पाराशरं उपसर्गाच्च नासिकाशब्दस्य क्रियार्थत्वात् प्रत्युत्त
र्गत्वायोगे नोपसर्गग्रहणं प्राद्युपलक्षणं स्पष्टं चेदं गतिश्चेत्यत्र भाष्ये ऽस्याह प्रादेरिति उपसर्गादनो।
अनोऽक्किं प्रनो मुंचनमित्यत्र णत्वं माभूदिति तदुक्तमिति अनोऽत्पर इत्यपनीयवक्तुल्य ग्रहणं कृत्वेत्यर्थः अ
न्यथा प्रणेनेयेत्यादावव्याप्तिः प्रनः इत्यादावतिव्याप्तिश्चस्यादिति भावः नस्य धात्वस्थोरुषुभ्यः इति सू
त्रात्सिम्नुवर्त्तते नासिकस्यादादेशस्य नासिकादेशस्य च ग्रहणमिति व्याख्यातारः अत्राप्युपसर्गग्रहणं।
प्रागदेवेति तत्रैव भाष्ये स्पष्टं प्रणसः इति प्रगता नासिका यस्येति विग्रहः विगत या नासिकयेति तत्र च
पदशब्दिति नसादेशः इति भावः केचित्तु नसा नासा च नासिकेति कोशात्स्वतंत्र नसा शब्दः घटितस्येव प्र राम
ण्यमानमिदं रूपमित्याहुः शोभनं प्रातरस्येति प्रातः शब्देन तात्कालिकं कर्म लक्ष्यते अन्यथा प्रातः श
ब्दस्याधिकरणशक्तिप्राधान्येन सामानाधिकरण्यासंभवः कल्यमित्यादाविवरत्नो शक्तिमत्प्रधान

त्वे सं भवति न त्वापिशलेः काले स्वरूपतः शोभनत्वस्य निरूपयितुमशक्यत्वात्कर्मधारयेन त्वात्त्वापप्रपकीर्तिभावः अव
यानां भमात्रम् इति दिलोपः आपिशलिकुलत् इति यस्येति लोपः स्त्रे आपिशलिकुलित् इति इकारान्तपाठस्तु अपपाठः अचूप्रत्ययप्रकर
णविरोधात् चतुरश्रेति तल्लक्षमध्यः अपरणीयपदादिषु यत्नभावोऽनिपातनात् अदूहलत् इति नन्वदन्त हलशब्दमादाय
हल इत्यादिसिद्धौ हलिग्रहणं व्यर्थं न च महद्धलं हलिस्तद्ग्रहितेऽहलस्त्वस्य साधुत्वार्थं तत्र ग्रहणं प्रकरणादिना ना
न्यर्थं च पाल्लं हलपोपपन्नेरिति चेन्न तुहलइत्यादावनोदात्तार्थं न स्यावप्रपकत्वात् अत्र हलः स्तु हल इत्यादौ तु नन्वत्तु
भ्यामिस्यं तोदात्तत्वसिद्धेः हलिशब्दे न समासेकपोनिरत्यर्थे च वैकाल्पिकत्वे किम्र नुत्त्रसमासान्तत्वाभावेन तदप्राप्ते
रिति हरदत्तादयः शक्योरिति आचार्येणाभयथा कात्राः पाठितात् इति भावः हरदत्तस्तु हलिशक्त्योरिति पाठान्तरं
अस्थि पर्यायः शक्तिशब्द इत्याह नित्यमसिच्च सेवित्तु नकृतः सस्थेवं माभूदिति अकारोकारोच्चारणं भन्त्वाप
न्नेन स्तु प्रजसावित्यादौ यस्येति लोपः अन्यतिरित्वा देवान्यतरस्यां ग्रहणे निवृत्तेनैनित्यग्रहणमन्यतोऽपि विधा
नार्थं तेनाल्पमेधस इति सिध्यतीति वृत्तिकृतोदयः नैतत्तभाष्येऽदृष्टे धर्मीदनिच केवलादिति बहुव्रीहिः समासान्ति
त्र पूर्वपदविशेषणमित्याह केवलात्पूर्वपदादितिर्मनि आनिचोकारस्तु नकारात्पूर्वमवगुह्यभावयेत्याहुः केवला
त्किमिति बहुव्रीहिणा पूर्वपदाक्षेपेतस्य च समासप्रथमावयवे रूढत्वेन ततः परत्वाभावेनैव त्रिपदबहुव्रीहौ नदो
ष इति प्रश्नः उत्तरं तु केवलादित्यस्याभावे आक्षेप एव न स्यादिति तत्तात्पर्यग्राहकतया सार्थकमिति इदमेव
वत्तापकमन्यत्र तात्पर्यग्राहकाभावे समासान्तप्रकरणे पूर्वपदाक्षेपस्येत्याहुः परमः स्वोपमौयस्येति इह स्वः
शब्दस्य सर्वनामसंख्ययोरिति पूर्वनिपातेन आहिताग्न्यादेराकृतिगणत्वादिति हरदत्तमाधवौ एतेन जहस्त्वा
र्थे तिव्याख्यातं यत्तु पूर्वपदादिति धर्मस्यापि विशेषणमिति तन्न फलाभावात् धर्मशब्दान्तस्योत्तरपदत्वेन तु धर्म

४६१

461

प्रौढ़ौ· शाद्रस्य बहुव्रीहिघटकीभूतपूर्वपदास्य रत्वाभावान्न दोषः कर्मधारयपूर्वपदो ह्यतिनचकेवलादित्यस्य समासः।
नाम्मकादित्यर्थेनात्र केवलत्वमिति वाच्यं केवलपदस्य लोकेन स्तुदुर्भ्यां केवलाभ्यामित्यादौ श्रौतस्त्रे चान्याभावे प्र मज्ञानीप
योगे एतच्च दृष्टार्थमाभाभावात् इदं चेन्नादेरिति सूत्रे भाष्ये स्पष्टं एतेन साध्यो धर्मो यस्य साध्यधर्मा संदिग्धश्चासौ
स चेति विग्रहः स च संदेहः साध्यधर्मद्वारक एव पर्यवस्यतीति निरस्ताः क्लेशाः परास्तः उक्तरीत्या साध्यस्य सा
त्संदिग्धत्वलाभात् अन्यादिवदिति स्त्रादिनानि वृत्तिधर्मस्थानीत्यादिसंग्रहः कृतसमासान्तेति स चानिजेवोप
स्थितत्वात् दन्तिरोर्मे + लुब्धो व्याधिकृत्तद्योगादेव मेनिष्पन्नाविदं निपातनं तेन एकस्त्रियामी मेमरुरित्यमरः वा
ली हे माङ्गमाली गुणनिधि रिपुगणनिर्मितोदन्तिरोर्मे + त्यादौ नुरूपकं बोध्यं नादर्थ्यो तिश्चत एव विषयविशेषः।
ह एवेच्छ नहिदएडकालेत्यादौ न ध्वनयन्नाह द्वौ दंडाविति समुदायस्य पत्रप्रसिद्धिस्तत्रैवेदं निपातनमिति भा
व एतदर्थमेव समुदायनिपातनमिति बोध्यं उभाहस्तीति निपातनादेवायन्नभावः उभयाहस्तीति उभया
हस्त्याभरेति मंत्रे उभाभ्यां हस्ताभ्यामाभरेति वेदभाष्यं बहुव्रीह्यधिकारेपि समुदायनिपातनादेव न त्वनुरूपादः।
पर्यन्त्रव्ययत्वात् भ्यामो लुक् एतेनोभाहस्तौ उभयाहस्ति इत्यादौ निपातनादिच् प्रत्ययलोपे प्रत्ययलक्षणेना
व्ययीभावसंज्ञेति प्राचां ग्रन्थो व्याख्यातः निकुच्य कर्णौ निकुच्यकर्णौ धावतीत्याद्यर्थे मयूरव्यंसकादित्वात्स
मासः प्रसंभ्यां ज्ञोरादेशत्वं बोधयितुं स्यान्नषष्टीत्व प्रकटनायोपदद्वित्वमारोप्य ज्ञानुनोरिति द्विवचननिर्दे
शः अन्यथा पंचमीसंदेहे ज्ञोरपि प्रत्ययत्वसंभावनेत्या च प्रेज्ञुरादेश इति धनुषश्च उसाहचर्यात् ङिः। राम·
त्करणाच्चादेशत्वं निश्चित्याह अनङादेश इति धृतधनुषमित्यादौ तु समासांतविधेरनित्यत्वान्नदोषः अत
अतएव प्रतरंश्चादयस्तत्तनुरूपरस्यं तोदान्नार्थमंश्चादिगणे राजन् प्राद् पाठश्चरितार्थः राजाहरुतिटचो

नित्यमेतन्न दृष्टं पर्यटस्य हस्तमेवलोपो व्यनुवृत्तादोषः यद् इति व्याख्यातं तन्न प्रत्ययस्याप्रकृतत्वात् गोधेरः इत्यादावव्याप्तेश्चे
त्याहुः पूर्वोत्तरसाहचर्यादिकारस्यादेशः समासान्तादित्यधिकारादादेः परस्येति न प्रवर्त्तत इत्याशयेनाह अन्तादे।
श इति गंधस्येत्व इति यत्तु सूत्रे गंधस्येत्येकवचननिर्देशात् तस्य च गुणवचनो गंधशब्दो गृह्यते न द्रव्यवचनः न
स्य बहुवचनान्तत्वात् तथापि नहिर्गंधानि त्यादौ न स्यात् दर्शनात् गंधस्तु सौरभे भृत्ये गंधके गर्वलेशयोः स एव द्र
व्यवचनो बहुत्वे पुंसि च स्मृत इति कोशाच्चेति तन्न सूत्रे शब्दपरत्वात् इत्याशयेनाह अविभागेनेति एकदेश
इवेत्यस्य विवरणमिदं अन्यपदार्थेन सहेत्यर्थः एवं च गुणवाचिन एवेह ग्रहणं न द्रव्यवाचिन इति फलि
तं अवयवावयविलोकविभागलक्षणेन तादात्म्यमस्येव संबंधस्यांगीकारादिति भावः तदाह सुगंधिर्वायुरि
ति गंधस्य वायुगुणत्वाभावेपि तेनाविभागाद् यत्रास्येव ग्राहणमित्यर्थः एवं कुंकुमाद्यनुलेपनमपि देवद।
त्तादेरविभागायुक्तं निलीनं यदि विवक्षितं तदा सुगंधिर्देवदत्त इति विभागेनावस्थाने तु सुगंध इति स्यादे
चेदं भाष्ये न दृष्टं तथापि वार्त्तिकादिति न्यायोक्तिश्चिंत्या एतेनाघ्रायि वानां धवहः सुगंध इति भट्टिप्रयोगः एकां।
न शब्देन स्वाभाविकत्वं विवक्षितं तेनागंतुकस्येति व्याख्यानं भग्नं वालसहकारः सुगंधी वीत्यादीनां द
र्घटोक्तं प्रामादिकत्वं च परास्तं अल्पाख्यायां अल्पशब्दोल्पत्वपरः तथा च लेशवाचिनो ग्रहणमित्याश
येनाह सूपस्य गंधो लेश इति अत एव ज्ञापकादुपाधिकरणेपि समासः ननु गंधशब्दे धर्मिपरमाश्रित्य
समानाधिकरण एव बहुव्रीहिरस्त्वित्यत आह गंधो गंधक इति धर्मपरतायां कोशवद्धर्मिपरत्वेन किंचि
कृ पादशब्दस्येति तदंतस्येत्यर्थः न चादेः परस्येत्यस्य प्राप्तिः समासांतादित्यधिकारात् न चाभाव

ग्रा॰ रो॰ स्वकर्थं समासात मतमाहस्त्यानिहारेणेतिवचनबलादौपचारिकमवयवत्वमितिभावः समासान्त इति अ
न एव न कर्तव्यमित्याहुः पादस्य पादितिन्तु नन्तु त्रितं प्रतिपदोक्तत्वेन पादः पदित्यत्रास्यैवग्रहणमपन्नो पादपतेः कि
पिपद इत्यादौ तदनापन्नेरित्याहुः कुम्भपदीषु वहुवचननिर्देशाद्गणपाठसामर्थ्याद्व्याद्यर्थावगतिः इह गणे कुं
भपदीत्यादि समुदाया एव पठ्यन्ते तत्प्रयोजनं विषयविशेषप्रग्रहस्तदाह स्त्रियामिति पदेहोपमान।
पूर्वसंख्यापूर्वं च पठ्यते तस्य सिद्धे लोपेन नित्यं ङीवर्थं वचनमित्याहुः अयमाकृतिगण इति गणलक्ष
तू अष्टापदीत्यत्र अष्टनो निपातनाद्दीर्घत्वं अष्टनः संज्ञायामिति वा आकारः द्विदन्निति शिशुत्वावस्था
प्रत्याप्यते षोडन्निति षट्त्वं दन्तद इत्यनेनोत्वष्टुत्वे सुदन्निति शोभना दन्ता अस्याः समस्ता जाता इति
विशिष्टावयोवस्था प्रतीयते एतेनासंज्ञात्वेपि स्याददलरोषात्सुदती सज्ञैति व्याख्यातं एतेन संख्याग्र
हणमेव वयोर्थे सुग्रहणं तु वयोर्थमपि न हि तेन वयोगम्यत इत्यपास्तं सुदंतो लाढ इत्यसिध्यापते
रित्याहुः समदंदीति नासिकोदरेत्यादि नाडीषु अपावः अपामकपिषुः अरोकोऽदीप्तिः रुचदीप्तौ।
रोचते रोकः स न विद्यते यस्येत्यर्थात् अरोकोऽच्छिद्र इत्यर्थ इति कश्चित् अग्रान्त अनुक्तसमुच्चयार्थे
चकारेणमूषिकदन्निति सिद्धमिति वान्ते त्रैनङ्गाप्यरहं ककुदस्या कार्तालाहारादिकृतावयवोपचया
दयोवस्थाधर्मा अवस्थेत्युच्यंते अजातककुत्वेन बाल्यं पूर्णककुत्वेन तारुण्यं गम्यते अवस्थायां किं
श्वेतककुदः संज्ञैवेति निपातनाल्लभ्यते एवं च पर्वते इत्यस्य तद्विशेषे इत्यर्थः संज्ञायामिति वा मंडूकास्य राम
त्वानुवर्तनीयमित्याहुः सुहृत् दुर्हृद् दोस्सहकदेनापि सिद्धे मित्रामित्रयोः हृदयशब्दनिवृत्त्यर्थं वच
नमित्याहुः ककुभावार्थे च व्यूढविशालं न हि तत्वात्कस्यते त्वं सोपदाविति सः प्रियसर्पिष्क इत्यणः षः

एकवचनांतानीति तथा चैकवचनांतावयववहुव्रीहावेव नित्यं कविन्नित्यर्थः सर्वत्र गणे ऽविभक्तिकोच्चारणस्यै
व दृष्टत्वेन केषांचित्सविभक्तिकानां पाठस्तु द्विवचनार्थ इति भावः तदाह द्विवचनेत्यादीति लक्ष्मीशब्देनुपा
ठसामर्थ्यान्न घृतश्चेत्यस्यापि नियमः अत एवाकृशमरुशल लक्ष्मीश्चेन सेति सिद्धं वहुवचनांतेन विग्रहात्
वहुलक्ष्मीर्यस्येति विग्रहे न घृतं चरतीति कप्रभवत्येव अत्र तत्पाठस्यावितर निवृत्तिमात्रफलकत्वान्न दु
पन्यास एवमुक्तनरइतिबोध्यं शेषादितिसूत्रे तत्पाठस्य नियमार्थत्वेन तेषामविशेषत्वादिति भावः ए
वंच संख्यावाचिवहुशब्देन लक्ष्म्यादीनां समासे वैकल्पिकः एव कप् वैपुल्यवाचिनां समासे तु नियमानां
विधिमुखेन प्रवृत्तौ उरःप्रभृतित्वात्तिषेधमुखेन प्रवृत्तौ न घृतश्चेतीति दिक् उरस्। सर्पिष् उपानत् पुमा
मान् अनड्वान् पयः नौ दधि मधु शालि लक्ष्मीः अर्थान्नञः वृतन्नर्थे वतेति सूत्र पठितनगरी त्यत्र तु पु
वोरनाकाविति सूत्रस्य भाष्यप्रामाण्येन समासांतविधेरनित्यत्वान्न कविति बोध्यं शेषा अनुक्तेति।
यत्तु भाष्ये नैव पेक्षं शेषग्रहणं नापि समासांतापेक्षं किंतर्हि अनंतरो यो वहुव्रीह्यधिकारः सोपेक्ष्यत इत्युक्तं।
तेनात्राविवादः समासांत इति सूत्रे तद्ग्रहणप्रयोजनकथनावसरे वहुव्रीहिसंज्ञा च प्रयोजनं उत्तमधुरी
नीचधुर इति भाष्यविरोधापत्तेश्च अन्यथा कक्पुरित्यादीनां समासांतरे चरितार्थेन पापरेणाकपावाधाप
त्तिः उपक्रमे समासांतापेक्षया शेषस्यैव भाष्योक्तत्वाच्चेति वृत्तिकेयट हरदत्तादयस्तु ङीत्याप्त्वदारति
प्रियपथ इति अपरे तु उपक्रमे समासान्तत उक्तस्यार्थस्य विशेषव्यवस्थायकप्रागुक्तभाष्यादनंतरवहु
व्रीह्यधिकारापेक्षे शेषत्वविज्ञानमुचितं नच समासांता इति सूत्रस्य भाष्यविरोधः कपो वैकल्पिक
त्वेन तदभावेन त्प्रयोगोपपत्तेः नचात्र पक्षे प्रतिपदोक्तसमासांतानां स्वस्वविषये वाधकत्वेनैवोपपत्तौ

प्रा॰शे॰

463

शेषग्रहणं वैयर्थ्यापत्तिरिति वाच्यं न हि प्रतिपदोक्तत्वमेव बाधकत्वे बीजं किं तर्हि अनवकाशत्वं समासान्ता
स्य काव्यभावे सावकाशत्वात्। इति न दोषः स्पष्टं चेदमत्रैव भाष्ये एवं च प्रियपथ इत्यादिविषये पक्षे प्रियपथिक इत्यपि भ
वति अत एव बहुव्रीहौ सक्थ्यक्ष्णोः इत्यस्य भिन्नत्वेन पाठः सार्थक इत्युक्तं अत एव भाष्ये ऽनन्तरं बहुव्रीह्यधिकारेऽनन्तरप
मुपात्तं न चैवमपि वक्रकत्तुरित्यादेः प्रकृतिविशेषापेक्षत्वेन समत्वात् न च समासान्तमात्रापेक्षशेषत्वपक्षेऽन्यत्रचू
कादेरसिद्धिरुक्तदोषानुद्भावनेन तेषामनित्यत्वमिति वाच्यं उदाहरणपरतञ्ज्ञाप्यस्योपलक्षणत्वात् एवान्त्यचोमा
णवेवद्वचस्त्वरणात्व्यामिति शेषवचनेन सम्भवदपि तत्समाधानं भाष्ये न कृतं न च बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः पूर्व
मेव कप्प्रकरपाठेन विशेषविधिभिः परत्वाद्बाधेनैव सिद्धौ तदर्थकशेषग्रहणं व्यर्थम् विभाषा शपावेत्यादिसूत्रवि
षयेपक्षेवबापत्तेः म मन्तु अनुक्तसमासान्तं न बहुव्रीहित्वाभावान्नादोषः एतेन वैकल्पिकसमासान्ताभावे कविधेर्वैक
ल्पिकापवादाभावे उत्सर्गवृत्तेरित्यत्र दृष्टत्वात् नादिकृत्य इति भाष्यकैयटाभ्यां स्पष्टमुक्तत्वात् इत्यपास्तं अ
त एवाकृतसमासान्तादिति नोक्तं अत एव सक्थ्यक्ष्णोरित्यत्र ककवभावार्थं चेति भाष्योक्तं संगच्छते इत्याहुः पत्नुत
त्र तेनेदमिति सूत्रभाष्यकाव्यभावार्थं चेदमित्युक्तं यत्तु कैयटेन शेषाधिकारो गृह्यते नोपपुक्तादन्य इति तद्भ्रमप्रमादः।
प्रकृतसूत्रस्थभाष्यविरोधादुपेक्ष्यम् शेषाधिकारेति इदं बहुव्रीहिप्रकरणे सक्थ्यक्ष्णोरित्यादौ पुनः पुनः कव भावार्थं
चेति भाष्योक्ते ऽत्तापत्ते पद्य पत्नेकमिति सूत्रशेषेण भिधानाद्ध्यधिकरणानां न समास इति शेषग्रहणं न कार्यं।
मू इत्युक्तं एवं च शेषाधिकारस्य बहुव्रीहिरप्रसिद्धः तथापि तदुत्तरभाष्ये एव शेषेण स्मिन्नूसत्यनभिधानं इत्यादिना।
सक्थ्यक्ष्णोरित्यादिबोधितसमासेभ्यः कप्स्यावर्तकोपायस्याव पृथक्कर्तव्यत्वप्रतिपादनाद किं चित्करं तत्तुसक्थ्यक्ष्णोरुद्धारि राम॰
तशेषग्रहणात्कथमर्थद्वयलाभ इत्यत आह तत्रादिनेति आदिनाभाव स्पेकशेषोऽस्यापोन्य नकपीत्यतः कपी

त्यनुवर्त्तते न संज्ञायामनंतरस्येति न्यायात्केषादित्यस्यैवायं निषेधः उरः प्रभृतिभ्य इत्यादेस्तु संज्ञाविषयेपि प्र
वृत्तिस्तदाह शेषादितीति विश्वदेव इति विश्वेदेवस्य निकः चिन्त्योपपाठः ईयसश्च न संज्ञे यसोरिति वक्तव्ये यो
गविभागसामर्थ्याद्व्यवहितस्याप्ययं निषेध इत्याशयेनाह न कविति बहुव्रीहौ नञ्पूर्वादिति वचनमर्थतः प
ठति बहुव्रीहेर्नेति मात्रय इत्येवं तदन्तं न नपुंसकशेषे उक्तं बहुश्रेयसीति लिंगविशिष्टपरिभाषया निषेधं
न घृतस्येति नित्यं शासः कप् अभिवादनस्तु तिरूपोभयार्थकवदिधातुनोभयसाधारणं जालस्यतरस्य
भिप्रेत्याह शूलिन इति एतेन वंदित इत्यस्तु न इति इत्युक्तिर्व्याख्यानात् स्तुत्यर्थकस्यैव ग्रहणं तेनाभिवंदितश्चा
त्र क इत्यत्र कविति हरदत्तोक्तिश्च परास्ता स्वश्चानेति न घृतस्येति कप् शासः बहूनाशिरिति उपसर्जनत्वस्य
स्त्रीप्रत्ययांतत्वाभावादिति अधिहस्त इ नेत्रिभ्य ईरित्यौणादिकत्वादिति भावः लुडिति शेषप्रतेऽस्याभिव्य।
धिकरणे इति भावः समानाधिकरणानामिति समानाधिकरणानां वचनक्रियायस्येत्यर्थः कंठेकाल इति कंठ इत्यस्य का
रकत्वात्कर्त्रा हारकसंबंधेनास्ति क्रियायामन्वयेन यस्याकथंचित्सामर्थ्यमादाय समासप्रवृत्तिः अ
त्रैव व्यधिकरणेपि ज्ञापकात्समास इति बोध्यं ध्वनितं चेदं वर्णेनेत्यत्र भाष्ये नन्वत्र विशेषणत्वेनैवासि
द्धं न च चित्रग्वादौ सामानाधिकरण्ये चरितार्थं शास्त्रमत्र न प्रवर्त्तेत अस्य क्रियाविशेषणत्वेपि कालावि
शेषणत्वादिति वाच्यं तावतापि विशेषणत्वानपायात्तेः नस्य तत्र पदार्थविशेषणत्वमेवात्र निविष्टमित्युच्य
मानमस्ति कालीदेशव्यावर्त्तकतयोत्तरपदार्थविशेषणत्वस्याप्युपलब्धेरन्यपदार्थविशेषणत्वं तव्या
वर्त्तकत्वात्र गृह्यत इति चेन्न असामर्थ्येपि व्यधिकरणेपि च समासज्ञापनार्थं सप्तमीपदस्यावश्यकत्वात् प
त्रु सप्तमीग्रहणसामर्थ्येन विशेषणपदस्य परिच्छेदकमात्रपरत्वं एवं च पदार्था कंठेकिंचिदस्तीति निर्दिष्टा तेका

शा॰श्री

464

त्वइति प्रभृत्यनेन दानस्यापि विशेषणत्वेन पूर्वनिपातनवारणायेदमिति तत्र यद्दा ऽस्याभिन्नाः सन्तीति निर्द्धारितेन तस्य
विकेदाय च गावइति प्रभृत्यन्ते तदा गोभिन्नइत्यस्याप्यापत्तेः केचित्तु प्रागुक्तरीत्या ऽसामर्थ्येपि समासप्रवृत्तिरित्याप
नार्थे सप्तमीग्रहणस्यावश्यकत्वमित्याहुः चित्रगुरिति यद्यपीह उपसर्जनं पूर्वमिति सिद्धं तथाप्यन्यपदार्थोपे
क्षयोभयोरपि प्राधान्यसत्वात् दनियमे प्राप्ते विशेषणग्रहणं तत्सामर्थ्याच्च प्रकृतसूत्रे उत्तरपदार्थविशेष
णत्वमेव गृह्यते इति न दोषः प्रथमानिर्दिष्टमिति सूत्रे हि समासशास्त्रे प्रथमानिर्दिष्टं सति संभवे प्रत्यास
त्त्या तत्समासार्थं प्रत्ययप्रधानं तदुपसर्जनमित्येव लभ्यते तेनान्तरपदार्थानिरूपितं तत्र बहुव्रीहौ सप्तमीत्युक्ते
तत्र कौण्डिन्यन्यायेनोपसर्जनं पूर्वमित्यस्य बाध्येतातो विशेषणग्रहणमिति सर्वनामसंख्ययोरिति एतत्प्रभृती
। प्रायो विशेषणत्वेन गतार्थानि हस्तदक्षिणइत्यत्र तु षष्ठीस्थानेइति सूत्रस्थभाष्यप्रयोगात् राजदन्तादित्वा
द्वा परनिपातः एतेन वन्येतराइति व्याख्यातं एवं जहत्स्वार्थावृत्तिरित्यपि जहत्स्वं पदं यं यस्य नाः सजहत्स्वः
सोर्थो यत्रेति बहुव्रीहिगर्भो बहुव्रीहिर्जहत्स्वार्थपदानि यत्रेत्यन्ये केचित्तु तत्परइत्यादिनिर्देशादस्यानि
त्यत्वमाहुः ॥ सर्वश्वेत इति वचनसामर्थ्यात् भूतपूर्वगत्या सर्वादेः सर्वनामत्वं बोध्यमित्योतयोरिति सूत्र एव
वार्त्तिके त्याचोपि संख्याशब्दस्य पूर्वनिपातो न कृत इत्याहुः संख्यायाइति संख्यावाचकयोः परस्परं समा
से ऽल्पार्थवाचिकाया इत्यर्थः न चास्याल्पान्तरमिति सूत्रे उपसंख्यातत्वेन द्वंद्वविषयमेवेदमिति वाच्यं ।
। संख्ययाव्ययासन्नेति सूत्रे हि त्रायस्त्रिंशच्चतुर इत्यादिभाष्यप्रयोगात् तदस्मिन्नधिकमिति सूत्रे सहस्राणां
शतमित्यर्थेपि शतसहस्रमिति भाष्यप्रयोगाच्च अन्यथा बाणानायांत्रिशब्दस्य परत्वेन शब्दपरविप्रति
षेधाच्चादीनामेव पूर्वनिपातापत्तेः मध्यमपदलोपितत्पुरुषेप्येकादशाद्वादशेत्येव प्रयोगस्वीकाराच्च

नहि कर्मकत्वे पित्र्यं ज्ञांशामंनयतीत्यादौ न चकारप्रयोगो नापि समासः एकधर्मावच्छिन्नेन्वयाभावात् त्र्यत्रा।
साहित्यविशेषणं साहित्यं च धवखदिरकर्मकं छेदनमिति बोधः एतदर्थ एवात्रैकार्थीभावः समूह इति तिरो
हितावयवभेदः समूह इत्यर्थः अयमेवात्र विशेष्यः इत्थं च तत्र तिरोहितावयवभेदः समूह इति विशेषः इयतैव
साहित्यं विशेषणमिति व्यवहारः साहित्यमेव च समूह इत्याहुः अत एव प्राण्यंगसमाहारद्वंद्वगर्भेष्या
णिपादद्वंद्वेतोष्ठाविनिहिद्वंद्वे द्वंद्वस्य प्राणी प्रतिनियमेन प्रवर्त्तते पूर्वोत्तरपदयोः प्राण्यंगसमाहारार्थत्वेपि
प्राण्यंगार्थत्वाभावादित्याहुः अत्राद्ययोर्न समासः अनेकसुबंतानां चार्थे शक्त्यभावेनैकार्थीभावरूप
सामर्थ्याभावात् किंच चेह द्वंद्व इत्येव पदानां च कारे शक्त्यभावात्तदर्थलक्षसूत्रे र्थग्रहणसामर्थ्यात् तत्का
र्थग्रहणं कृतत्त्वं च कृत्स्नसमस्यमानपदार्थान्वयिबोधकत्वमेव तत्त्वं न पोरेवेति न दोषः यत्तु कैय
टादिभिरेकक्रियान्वयित्वरूपं सामर्थ्यं छेदद्योदनादिवदत्रास्त्येवेत्युक्तं तत्र तुच्छं ततः सर्वोमूत्रिकयेत्यादौ समा
सापत्तेः अन्वाचये त्वेकत्र सामर्थ्ये सामर्थ्यस्याप्याभावाच्च किंचान्ययोः साहित्यादेकार्थीभावसामर्थ्ये चा
रितार्थस्य शास्त्रस्य बहिरंगक्रियाघटितसामर्थ्ये प्रवृत्तेरित्याहुः किंच बहुव्रीहिघटकपदानां कर्माद्यं
तर्भावेनेव द्वंद्वघटकपदानां चार्थान्तर्भावेनैकार्थीभाव अत्र व पृथकः समर्थ इति परिभाषणात् चार्थे द्वंद्व
तर्भा इत्युक्तेश्च अत एव चार्थस्य द्वंद्वेनोक्तत्वाच्चशब्दस्याप्रयोगः एवं च समासे समुच्चयपादे रुक्ते संभवोपि ना+
पुष्पवंतावित्यादावविवेकशक्तिविषयत्वं समप्रधानानां परस्परं विहायेतरान्वयेस्याप्रयोगत्वात् अत्र स
मप्राधान्यपरस्पराविशेषणत्वमेव अत एव राजपुरुषप्रश्नेत्यादौ न तथान्वय इति दिक् ननु नीलोत्प
लमित्यादौ नीलं च तदुत्पलं चेति च प्राप्ते तर्भावेन विग्रहदर्शनाच्चदर्थान्तर्भावेनैकार्थीभावसत्वेन

शा॰ शो॰
श॰

समा=६

द्वंद्वोद्भुर्वीरः तत्र हि साहित्यं चार्थः एवं च नीलभिन्नं नीलत्वसहितोत्पलत्ववदुत्पलमिति बोधः अत एव पाठ
कृतादशायां पाचकत्वाभाववति न पाचकपाठक इति प्रयोगः साहित्यस्यैककालिकत्वादिसमनियतत्वा
दिसमनियतत्वान्नेति चेन्न सामानाधिकरण्ये विशेषविहितया विशेषणं विशेष्य[illegible]णेनेति नमुरूपसंत
पावाधात् प्रधानाप्रधानयोरिति न्यायेन चार्थस्य समासघटकपदबोध्यप्रधानार्थान्वये एवं द्वंद्वप्रसंगस्य
इदमेवाभिप्रेत्य पदार्थभेदे द्वंद्वः पदार्थैतावच्छेदकभेदे कर्मधारय इति प्रवादः एवं चात्र चार्थान्तर्भावेन
कार्थीभावे सत्त्वादेस्तात्पर्यग्राहकस्याभावात् नीलाभिन्नमुत्पलमित्येव बोधः नाधिकरणेनेत्यत्र विभि
गमनाविरहाद्देशघटिते कालघटिते च सामानाधिकरण्यं गृह्यते तोऽन्य प्रागुक्तप्रयोगः एतदर्थमेव
कर्मधारयविग्रहे च शाद्रप्रयोगः देशघटितसामानाधिकरण्यविच्छिन्नायो बोधनाय सर्वनामप्रयोगः
कर्मधारयसंज्ञायामाध इतिस्तु न युक्तं तस्या एकसंज्ञाधिकारबहिर्भूतत्वात् सामानाधिकरण्या-
विवक्षायां तु द्वंद्वे इष्टापत्तिरेवेति दिक्. न चैवं शिवरामयोरभेद इत्यत्राशंसासंभावनयोरविशेष इति भा
ष्यप्रयोगे च नीलघटयोरैक्यमित्यत्र द्वंद्वानापत्तिः सामानाधिकरण्याच्चेति वाच्यं एकपदार्थान्वये सा
मानाधिकरण्यस्य प्रतीतावपि द्वंद्वरूपपदसंस्कारवेलायां तदविवक्षणात् पदार्थभेदस्य विवक्षणा
च्च विवक्षैव वचनं तत्र तत्र साधुत्वबीजं न च त्यदादीनि सर्वैरिति सूत्रे सामान्यविशेषवाचिनोर्न द्वंद्व इति भा
ष्यपठितत्वेन कथं द्वंद्व इति वाच्यं प्राच्यभरतेष्विति निर्देशेन तस्यानित्यत्वात् अत एवाशंसासंभावन ।
योरविशेष इति भाष्यवार्त्तिकादिप्रयोगाऽसंगतते अत एव गोबलीवर्दमित्यादिसिद्धिः बलीवर्द ।
समभिव्याहारात् स्त्रीणामेव गोपदेन बोध इत्यतस्तत्रैव भाष्यानुप्रत्यारीत्या विशेषपरत्वात् ।

465

नएवबैयटोहंद्वंद्वसाधारणमिदमित्याहहंहेयीति अपिनानन्पुरुषपिनेनदशाधिकाढोदशाहेरुन्निनेत्याहुः
वाप्रियस्येति इदंबहुव्रीहावेवनेन स्वहेत्वो नहि द्विषये नुनेदं भवर्त्तते वेनित्यावस्थितविभाषामय एणात् नेना
प्रियस्हेमिनेत्याहुः गहादे गहादिराकृतिगणः आहिताग्न्यादिरप्येवं अत्रवाप्रियस्येत्यतो वेत्यनुवर्त्तते सा
चव्यवस्थितविभाषेत्याशयेनाह क्वचिन्नेति इदं चप्रयोगदर्शनाद् इत्यादिस्वरसाच्चोक्तं कृतकृत्य इति कृतं
किंचिदनेनेति निष्ठान्ते यदा कृत्यमिति प्रयुज्यते नदाकृत्यस्य विशेषणत्वात्सर्वे निपाते प्राप्ते इदं अत्र निषा
प्राप्तविहितनिष्ठायाग्रहणं तेन नपुंसके भावे क्तस्य योगे चास्मिन्नित्यादौ नदोष इत्याहुः जातिकालेति
एतच्च जातिकालसुखादिभ्यो नाच्छादनात् क्तोकृतमितप्रतिपन्नाइत्यनेन बहुव्रीहावंतोदात्तविधाय
केन ज्ञापितं सारंगजग्धीति अस्वांगपूर्वपदाद्वेति ङीप्ज्ञापकसिद्धस्यासर्वत्रिकत्वाद्वाग्रहणं नुव
र्तेत्याह शापिकमिति क्वचिन्नेति इदमपिवाग्रहणानुवृत्त्या लभ्यते इति बहुव्रीहिः वार्थ अनेकमन्यपदा
र्थ इत्यतो नेकमित्यनुवर्त्तते तत्फलं च यथापथं समासांतात ङोः प्रवृत्तिरप्रवृत्तिश्च वार्थ इति च द्यो
त्यार्थः परस्परनिरपेक्षस्येति तत्वे चैकस्य क्रियान्वयोत्तरमपरस्यारत्या तदन्वयाद्बोध्यं अनेकस्ये
ति तेनैकस्य सापेक्षत्वेपिनदोष इति भावः न्यग्रोधोदश्पनामित्युपक्रम्य स्नतश्चेत्युक्तेगम्यनएतत् न्य
ग्रोधश्चेन्निरइतिभाष्यात् एकस्मिन्निति एकधर्मावच्छिन्न इत्यर्थः अन्वय इति सचविशेष्यतयाविशेष
णतयावेत्यन्यदेतत् अत्रेदंबोध्यं समुच्चयेच शब्देन स्वसमभिव्याहृतपदार्थेतरस्साहित्यं बुध्यते
न स्वस्मिंस्तत्र अत एवेतिरेतरयोगान्भेदः अत एव तत्र च द्वयप्रयोगो नैकस्यैव मूलेयत्र तत्रेति पूरणीय
नत्वन्वय एव समुच्चय इति भ्रमितव्यं अहरहर्नयमानोगामश्वमित्यादौ नसमासः अहरहः पदेन

श॰ शे॰

466

साहित्यस्य तत्र गम्यत्वेपि तस्य चकारावाच्यत्वात् तच्च विनिगमनाविरहात् परस्यैव बुध्यते अत एव भ
गवता तत्र समाससंज्ञा पाकरचेन कृता यो भावान्न समासः अनुक्तं यत्र विग्रहे चेन द्योत्यं साहित्यं तत्रैव समा
सो न चात्र तथेति तदभावः साहित्यबलादेव समानिताद्यैव समभिव्याहृतक्रियायामेककालिकत्वादिग
म्यते एकधर्मावच्छिन्ने ऽन्वयश्चैवं स्तुतो भञ्जनस्य भिन्नत्वेपि न दोषः काले एकत्वं च बुद्धिविशेषविषयत्व
मित्येककाले द्वयोर्भञ्जनासंभव इति न वाच्यं विशेष्यतयान्वयश्च देवदत्तः पचति हसति चेत्यादौ क्रिया
समुच्चये द्रष्टव्यः समुच्चये च समभिव्याहृतस्य किंचित्प्राधान्यं प्रतीयते अत एव समकक्षयोर्मध्ये एकस्य
समुच्चयेऽन्वेतुः स्यादिह एतेषां आनुषंगिकत्वे इति न त्वानुद्देश्यत्वं निष्पादकयत्ननिष्पाद्यत्वं अन्वाच
येऽलत्वेऽनुक्तेगम्यत एतत् समायेलोयमिति भाष्यात् एकस्य प्राधान्यमपरस्य तदनुरोधेन क्रियासं
बंध इति कैयटाच्च अत्र प्राधान्यं तत्संबंधि क्रियायामन्वयप्रयोजकयत्नरूपं अत्र च व्याप्यत्वादिकमधि
कं भासते आनुषंगिकत्वमिदं च द्योत्यं तस्यापृथग्दर्शनादन्नाम्नुवत्रापि भिक्षामटत्वेव भिक्षामन
टं स्तु भिक्षामटन् गामानयति अत्र त्वपि नान्विष्यानयति एतदर्थमेवात्र पश्चाद्दर्थकान्वाचयः वारणं
स्यष्टं चेटकर्तृः काडू सत्तोपश्चेत्यत्र भाष्ये एवं चानुषंगिके भिक्षाटनव्याप्यं गवानयनमिति बोधः मि
लितानामिति परस्परनिरूपित साहित्यवतामित्यर्थः स्वविशिष्टैकविशेष्यतानिरूपकतावच्छेद
कधर्मवतामिति यावत् अन्वय इति एकधर्मावच्छिन्ने नान्वय इत्यर्थः इतरेतरयोगे प्लक्षश्च न्यग्रोधश्चे
त्युक्ते गम्यत एतत्प्लक्षोपि न्यग्रोधसहायो न्यग्रोधोपि प्लक्षसहाय इति भाष्यात् एवं च तत्र वाचानेकत्व
कारकयोगः साहित्यं चारवंडोपाधिः नीधातोः संयोगजननकव्यापारानुकूलव्यापारवाचकत्वे

धौ

द्वंद्व इत्युक्तं यत्तु कर्मधारयेऽभेदस्यार्थ इति तत्र संसर्गमर्यादयैव तस्य लाभात् च शब्दस्य तत्र प्रयोगाभावाच्च
चार्थे इति पाठकश्चकृतस्तत्र स्यभाष्यविरोधाच्चेति दिक् । तत्र लौकिकवाक्ये एवैकार्थीभावकल्पनायुक्तिविशिष्ट ।
स्ये वार्थे वर्त्तनेन रामकृष्णावित्यादौ विशिष्टादेव सुबुत्पत्तिः स्यादेकार्थाद् द्विर्वचनन्यायात् । तथा च द्वंद्वे हेतुर्लभ्यतेऽने ।
कस्तु वर्तताभावात् समुदायाद्युत्पत्तिर्यावयवे संख्या[illegible] त्वरूपानुग्रहसंभवादिति चेन्न संख्यातयानुग्रहसंभवे विप्रेषु
स्वपदत्वाननुग्रहे एवं त्वेकमपि तस्य द्वंद्वत्वात् अत एव पूर्वपदेन तोपादिकं चार्थे द्वंद्व इत्यस्योक्तिः संभवस्थ्व हो
तपोत्क्यति अनयोरुत्तरपद परत्वाभावाच्चानद्रु । राजदंतादिषु यद्यपि षष्ठीसमासकर्मधारयादावपि ।
प्राप्नोति तथापि द्वंद्वीय पूर्वनिपातप्रकरणस्यापीदं बाधकं उलूखलमुशलमित्यादि द्वंद्वानामपि केषांचि
त्वात्वादिति ध्वनयितुमत्रोल्लेखः धर्मादिष्विति द्वंद्व एवेदं भाष्ये अल्पाच्तरस्सूत्रे पठितत्वात् तपतीति अ
भ्यर्हितत्वात्पूर्वः पूर्वनिपातः प्राप्तः निपात्यत इति राजदंतादिगणेपाठेनेत्यर्थः अयमिति राजदं
तादिर्धर्मादिश्चेत्यर्थः अनेकप्राप्तावपीति इदं यद्यप्यल्पाच्तरमिति सूत्रे भाष्ये पठितं तथापि पदुमृदु
शुक्लाइति भाष्योदाहरणादन्यविषयमपीति भावः अल्पाच्तरं अस्मादेव निर्देशात्सर्वार्थेतरपक्व…त्वचु
त्वयोरभावश्च तेन धवखदिरपलाशा इत्यपि सिद्धं अत्रापि बहुष्वनियमः आनुपूर्वेणेति कर्त्तव्ये । वे
मानुपूर्व्ये प्रादुर्भावकृतं तत्र ब्राह्मणक्षत्रिय… तं … ध्यम अनित्यमिदं प्रकरणं समद्वाभ्रातृभ्यः लक्षणहे
त्वरित्यादिनिर्देशात् तेन सस्नो … विशेषयुतालिनीमृदगणं च खलु णवाः … नदं तिसं
सादिरित्यादि सिद्धं अत्राद्यदंताद्यल्पाच्तरं लघ्वक्षरं … क्षत्रियाणामिति अभ्यर्हितं चेति भ्रातु
र्ज्यायस इति च विप्रति-षेधेनेति बोध्यं लघ्वक्षरादिभ्योऽभ्यर्हितं पूर्वं विप्रतिषेधेन सर्वतो ऽभ्यर्हितं

र्थं अत एव वासुदेवार्जुनाभ्यामित्यादिनिर्देशाः संगच्छन्ते इदमप्यनित्यमेवेति निर्देशान् द्वन्द्वश्च ।
प्राणि अत्र तूर्याङ्गशब्देन वादका एव गृह्यन्ते इत्यल्पाच्तरमिति सूत्रस्थभाष्यस्वरसः तत्र मृदंगपणवं त्वेतदेवात्रोदा
हृतं न चात्र जातिप्राणिनामित्यस्य प्राप्तिः व्यक्तिपरत्वात् अंगशब्दश्चाद्यन्तवाक्ययोरवयवपरः मध्यमे तूपका
रकपरः अंगशब्दस्य च प्रत्येकमन्वयः तच्च वाक्यत्रयं तन्त्रैकशेषाभ्यां गकादेर्द्वंद्वत्वाभावेनानुग्रह एतस्यावयप
कत्वेन प्रत्यासत्त्या तत्र द्वाक्योपस्थितप्राण्यंगाद्येव द्वितीये गृह्यते तेन मार्दंगिकाश्वारोहावित्यादिसिद्धमित्या
हुः तात्पर्यवशात्त्वानुरोधाच्च बहुवचनांगशब्दस्य प्रत्येकं संबंधात् प्राण्यंगादिवाचकस्यैवावयवकद्वंद्वप
रिग्रह इति न प्राग्युक्तदोषः अत एव सूत्रे बहुवचननिर्देश इति नुक्के परादयः अत्रापि पठेदध्वर्युक्रतुरित्यादौ प्राप्नु
वतीति रेवशरणं साहचर्याद्वा न दोषः एकवचनमिति चेकं वक्तीति वृत्त्यन्ये कत्वविशिष्टपरिमित्याशयेन फलित
माह एकवदिति पाणिपादमित्यत्रापि जातिरप्राणिनामित्येव सिद्धं तथापि व्यक्तिविवक्षायामेकवद्भावार्थं व्यक्ति
करनिरासार्थं चेदं अत्र शास्त्रे जातिपदेनांत्यावयविरत्नेरवयवावयविवृत्तेर्जातेर्ग्रहणं अत एव यत्कांचीत्यादौ सुप्य
ज्ञातावितितिनिर्देश एतदन्ते नोक्त इत्यन्ये एकत्वादिति चार्थे इत्यनेन समाहारे द्वंद्वे इत्यर्थः ननु चार्थे द्वंद्व इत्येव सिद्धमत्रा
हनियमामितिश्चेयं भावः नानेन प्राण्यंगादीनां द्वंद्वमनूद्यैकवत्त्वं विधीयते नियमतः समाहारनिमित्तनपुंसक
त्वादिकार्यं सिद्धं किंत्वेकवचनद्वंद्वमनूद्य प्राण्यंगादिसंबंधो विधीयते स च नियमार्थ इति एकवचनो द्वंद्व एव प्रा
ण्यंगादीनामिति फलितस्य चेदं विभाषावृक्षेति सूत्रे भाष्यकैयटयोः समाहारः प्राण्यंगादीनामेवेति नियमस्तु न व्याख्या
नात् किंचैवं नियमेऽन्यत्र समाहारद्वंद्ववारणेऽपि एषु उभयद्वंद्वस्य प्राप्त्या विभाषावृक्षेति सूत्रे येषां प्राणिजातिवाचिनस्तेषां
द्व एवैकवद्भावापत्तिः नित्यं पुनर्वस्वोरिति सूत्रे बहुवचनग्रहणं च तद्धि समाहारैकवचनस्य माभूदिति कृतं तत्र पुनर्वसू इति
यथा कथंचिन्नहि यानि तैरयुक्ता गार्ग्यश्चैरिनिमध्यमपदलोपी समासः यद्वान्नामेकशेषः एतेन संज्ञायां महत्त्वस्वरप्रदानं ति

भिरिति नियमं विधिरिति सूत्रस्य भाष्ये प्रयोगमुपपादितः वक्तृश्रोतृज्ञानाभावादेकवद्भावाभाव इत्यन्ये अनुवादे यदा
मो प्रतिपन्नाः प्राणिनां नरा वनमग्ममित्यर्थं कार्यान्तरार्थं प्रयोक्ता श्रुतिपाद्यते तदानुवादः तदाह सिद्धस्येति प्रकृते चोदयेत्प्रति
पृयोरनुवादः अनुवादे किं अज्ञातज्ञापने उदगुः कठकालापा इत्यपि चरणशब्दोऽत्र शाखाध्येतृवाची शाखावाचि
नां तु जातिरप्राणिनामित्येव सिद्धं स्थेणोरिति लुङ् तस्थेणोः प्रयोगे सतीत्यर्थः उदयादिति इह यदा कठेषु क
लापेषु चोदितेषु चावाप्यं तत्रागन्तव्यमिति संवादं कृत्वा तं च विस्मृत्य कश्चिदास्ते तं प्रतीदमुच्यते कठेन कलापिना प्रो
क्तमधीयते इति यदुः कठाद्वैशंपायनान्तेवासिनः कठचरकाल्लुक् अध्येतृणः प्रोक्तात् लुक् कलापिनोऽण् स
ब्रह्मचारीत्यादिना [illegible] नादिलोपः अध्वर्युक्रतुः अध्वर्युशब्द ऋत्विग्विशेषे [illegible] तेन च क्रतोः संबन्धाव्यभिचाराद
ध्वर्युपदं तदध्येतॄन् यजुर्वेदं लक्षयतीत्याह यजुर्वेद इति क्रतुरिति बहुत्वे प्रथमा बोध्याविप्रकृष्टाख्यानामध्ययनत इ
त्येव सिद्धे गुरुक्तिरविप्रकृष्टेति किं दार्थ्यान तदाह प्रत्यासत्त्या इति अध्ययनगता प्रत्यासत्तिरध्येयेव द्वारा तदध्येतरि चा
रोप्यत इति भावः पदककमकमिति पदान्यधीत्य क्रमोऽध्येव्यत इति स्पष्टा प्रत्यासत्तिः पदान्यधीते पदकः क्रमादिभ्यो
वुन् एवं क्रमकः पदक्रमशब्दयोस्तु जातित्वादेव सिद्धमिति तदध्येतृपुरुषवाचकेऽप्रवृत्तिः परं परया संनिकर्षग्रहणा
र्थं द्विसंनिकृष्टाख्यानामिति नोक्तं अध्ययनतः किं पितापुत्रौ अविप्रकृष्टेति किं पाणिनिकवैयाकरणौ जातिः बहुत्वे प्र
प्रमालदाह जातिवाचिनामिति धानाशष्कुलीति वृणतरसानां कुलमिति गोत्रादिषु निपातनात् साधुः विट्शूद्रा इति
जात्याख्यायामिति व द्वुवचनं ड इव्येति अप्राणिनामिति पर्युदासादेतल्लभ्यते अत्र प्राणिशब्देन लोकप्रसिद्धा मनुष्या
दय एव गृह्यन्ते तेन नुवत्सान्तादयः इति विभाषावृक्षेति सूत्रस्य भाष्यस्वरसः ज्ञानप्ररोहणादिना तेषामपि प्राणित्वाङ्गीका
रादिति बोध्यं जातिः किं नन्दकपाञ्चजन्यौ हरेः खड्गो नन्दकः शंखश्च पाञ्चजन्यः एकव्यक्तिवृत्तित्वान्न जातिः जा

नि प्राधान्येति अत एव मृदंगपणवं वेणुवीणं वा इत्यत्राप्यस्य सूत्रस्य भाष्यप्रयोगः नीरोदके संपृक्ते तन्त्रादिवत् वेति सूत्रस्य
भाष्यप्रयोगो रहस्यपर्णयो रिति सूत्रविधायक सूत्रस्य भाष्यप्रयोगश्च संगच्छते जातेः प्राधान्ये चेन देवपन्नदा अपवृद्धिस्य स
कलव्यक्ति प्रतीतिः ननु विशेष्यत्वं कथं संभवात् अत एव वहन्ति द्रव्यविशेषेति प्रकरणादि सहकारेण च नहि प्रोष प्रतीतिरितिवो
बोध्यं कथं तर्हि रंजितानु विविधास्तरुशैला इति न च व्यक्ति प्राधान्यविवक्षया निर्वाहः सकलतरुशैलरंजनस्य विवक्षितत्वा
त् इति चेन्न तरुसहिताः शैला इति व्याख्येयमिति केचित् अन्ये तु भाष्यप्रयोगादिदमनित्यं विभाषेत्यत्र वृक्षादिग्रहणं
तस्यैवावयुत्यानुवादः ते युनिर्दिचिकित्सं विकल्पो न्यनुपद्यप्रयोगमित्याहुः बदरामलकानीति फलत्वव्याप्यजाति
विशिष्टवचनत्वे तो विशिष्टलिंगो नदीदेशः इति द्वंद्वे इतरेतरयोगे द्विवचनापत्तेः समाहारे नपुंसकत्वापत्तेः अयं चच्चा
रकाणि च त्वात्पि द्वंद्वविशेषणानि अग्रामा इति पर्युदासः लाघवात् ग्रामभिन्नसर्वावयवको यो द्वंद्व इत्यर्थः अत्र विभि
न्नलिंगत्वाग्रामत्वयोर्नदीदेशविशेषणत्वं तयोरेव साक्षाद् द्वंद्वविशेषणत्वमित्यपि सुवचनं देशपदेन मनुष्यावासयो
ग्यजनपदनगराणामेव ग्रहणं अतः पर्वतानां न कैलासगंधमादने अत एव नदीग्रहणं नद्याः प्रागुक्तदेशत्वाभा
वात् यद्यपि ग्रामेनाध्येयमित्यादावुदीच्यग्रामाच्चेत्यादौ च ग्रामपदेन नगरमपि गृह्यते तथापीह न व्याख्यानात् ब
हुवचनेन नाग्रामशब्देन नगरत्वानाक्रांतस्यैव ग्रहणात् इदमेवाभिप्रेत्य भाष्ये अग्रामा इत्यत्र नगराणामिति वक्तव्य
मित्युक्तं अत एव मथुरापाटलिपुत्रमित्येव भवति यत्तु प्राचां ग्रामनगराणामिति सूत्रे नगरपदोपादनेन ग्रामग्र
हणेन नगरस्याग्रहणमित्यर्थज्ञापनान्न दोष इति तन्न तस्य योजनस्य वत्स्यादौ स्पष्टमेव दर्शितत्वात् त्वदुक्ता
र्थस्य भाष्ये स्पष्टमेव तन्न सूत्रे प्रत्याख्यानत्वाच्च अत्र इह नदीदेशविषये द्वंद्वे वाक्ये तत्र प्रागुक्तरीत्या नद्यादिसर्वावयवकस्ये
व ग्रहणं किं च विभिन्नलिंगत्वार्थकं विशिष्टलिंगग्रहणं न द्वंद्वस्य साक्षाद्विशेषणं सर्वस्यापि किंचिदपेक्षया।

व

भिन्नलिंगत्वेनाव्यभिचारात् किंतु द्वंद्वावयवनिष्ठं नद्याद्यवयवानन्तरोपेक्षयैव एवं भिन्नलिंगत्वस्य सर्वावयवेष्वप्र
लितत्वेन तत्साहचर्यादपि तथा ग्रहणं अतो गंग पाटलिपुत्रे इत्यादौ नदीजनपदवाचकयोर्द्वंद्वेनास्य प्रवृत्तिः स्यादे
वेदं नद्यां मतुबिति सूत्रे कैयटेनदाहृतग्रामवर्ज्जेत्यादि नदीग्रहणेन देशस्यापि ग्रहणं अन्यत्र भिन्नलिंगत्वासंभवात् ।
कृत्रिमाकृत्रिमन्यायस्तु न प्रवर्त्तते देशसाहचर्यात् ज्ञो ववशात् किंत्वाविति ग्रामाभिन्नसर्वावयवत्वाभावादिति भा
वः येत्वाग्रामा इति प्रसज्यप्रतिषेधमाहुस्तेषां ग्रामसर्वावयवके एव निषेधस्यादिति प्रकृते निषेधासिद्धिरिति
दिक् येषां च शाश्वतिक इत्येकारस्यैव त्तेते ननोभवार्थे निपातनात् टित्त्रिदित्लोपकादेशयोरभावः अत एव ध
लोनस्रस्यस्यं संधिवेलादिगणे पाठाच्छाश्वतमपि ध्वनितं चेदं नस्तद्धिते इति सूत्रे भाष्यकैयटयोः तेन निष्परत्य
र्थः परत्वादिति पशुशकुनिद्वंद्वावकाशो गोमहिषं हंसचक्रवाकादिः अस्यावकाशोऽहिनकुलमार्जारमू
षकादिः चकारेणेति पुनर्विधानार्थेनेत्यर्थः अत्र विरोधो वैरं न तु सहानवस्थितिः व्याख्यानात् द्वंद्वजंतवश्चा
न एकदेशोस्वरित्वप्रतिज्ञया जंतुपदमनुवर्त्य षष्ठ्या विपरिणमय्य तेन विरोधस्य विशेषणात् तेन छायातपा
विति सिद्धमित्याहुः देवासुराणां च न नित्यो विरोधो अमृतमथनात् प्रागसत्वात् ततो देवासुरैरित्यादि सिद्धं शूद्रा
णां शूद्रो अत्रैव वर्णो के तरः न शूद्रत्वजातिमान् निरवसितेषु तदभावात् पात्रादिति येर्भुक्ते भस्मना शुध्यते
कांस्यमित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुद्ध्यति तेषामित्यर्थः एव नो भांवांत् न पात्राद्बहिष्कृताः शक
यवनमिति भाष्योदाहरणादित्याहुः यथोच्चारितानीति कृतावृत्र्याद्येशानीत्यर्थः गणपाठे रूपमेषां वि
। हितं न नु पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यमिति भावः तथा च वार्तिकं गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्त
मिति तेन पररूपादिपक्षे गोश्वं गोश्वश्च न भवतीत्याहुः दासीदासमिति अत एव निपातनात् स्मानास्त्रिये

प्रा॰ शे॰

लोकप्रयोगेन गवाश्वप्रभृद्वन्द्वविभाषाप्राप्ता एषु क्वाचित्कमुत्व(?) एवं द्वन्द्वविकल्पे प्राप्ते वचनमबहुप्रकृत्यर्थं चप्र
योगं सामान्यतः प्राप्ते नियमः वृक्षादौ विशेषाणामेवेति व्याख्यानादिति भावः स्पष्टं चेदं स्वं रूपसूत्रे भाष्ये य
त्वन्यत्र द्वन्द्वासंभवाद्विशेषाणामेवेति तत्र प्राच्यभारतेषु इति निर्देशेन समान्यविशेषयोर्द्वन्द्वनिषेधस्यानित्य।
तयोरत्र वृक्षादौ संभवादित्याहुः श्वादिनां मृगादिषु प्रागुक्तरीत्या वृक्षादिसर्वावयवकद्वन्द्व एवेत्यत्रापि(?) तत्र
।द्वाका प्रवृत्तिः अत एव व्रीहिकुशाग्रत्वमित्यादौ जातित्वान्नित्यमेव फलसेनेति बहुप्रकृतिर्बहुवचनात प्रकृ
क इत्यर्थः बदराणि चेत्यादौ जात्याख्येति बहुत्वं अत्र बहु वनस्पतिग्राहेनेत्यस्य ग्रहणं इदं च प्रकरणं शेषभूतं ए
कवचनद्वन्द्वविषयं यत्र क्वास्त्र(?) प्राप्नोति न द्वन्द्वकृतेरेव एतदेवाभिप्रेत्य विशेषेणाद्वन्द्वप्राप्तिरनेन नियम्यते इति
भाष्ये उक्तं तेनाबहुप्रकृतेरितरेतरयोग एव एतेन प्लक्षन्यग्रोधावित्यत्र विभाषेत्यस्य नियमेपि जातिरप्राणिना
मिति स्यात् बदरामलके इत्यत्र जातिरित्यस्याप्रवृत्तावपि चार्थे इति विभाषा स्यादित्यपास्तं यद्यपि वार्त्तिक
व्याख्यानभाष्ये फलानि साधारणेनैषां द्वन्द्वो विभाषैकवद्भवति स च बहुव्रीहि प्रकृतिरेवेत्युक्तं बदरामलके
पठितः ननु फलाद्यंशेपि विकल्पबोधकः बदरामलकानि मूर्खालिहा इत्युदाहृतं च तस्यापि नासौ वाच
निकः किंतु विभाषा वृक्षेति सूत्रप्राप्तिविषयानुवादकः ननु फलाद्यंशेपि विकल्पबोधकः अत एव बहु
प्रकृतिरेव तत्र यथा स्यादित्येव वार्त्तिकप्रयोजनं भाष्ये उक्तं ननु फलत्वद्वन्द्वं तत्रांशे विकल्पोपि प्रयोजनत्वे
नत्वेनोक्तः किंच फलादिषु विकल्पविधानेन चारितार्थ्ये नियमकतानापत्तौ बदरामलकेति ध्वंत(?) इति।
तदुत्तरभाष्यविरोधापत्तिः भाष्योदाहरणानि तु बदरामलकानीत्यादौ प्राप्तेजात्यादिलक्षणे नित्य एक
वद्भाव इत्यर्थपरतया व्याख्येयानीति स्पष्टमस्मत्कृतभाष्यप्रदीपोद्योते इत्याशयेनाहुर्जातिरिति नित्यं।

प्राप्ते श्रुतिविकल्पार्थमित्यनुषज्यते गोमहिषमित्युदाहरणं तु प्राप्तिमात्राभिप्रायेण नन्वेवं मृगशकुनिग्रहणं व्यर्थं
चार्थे द्वन्द्व इत्यनेनैवोभयोः सिद्धत्वात् न चैषामेव द्वन्द्व इति नियमः चार्थे द्वन्द्वस्यैव पर्यायापत्तेरित्यत आह मृगाणां मृगै
रेवेति तेषां तैरेव विभाषितैकवचनो द्वन्द्व इति नियम इति भावः तत्फलितमाह अन्यैस्त्विति न चान्यैः सह समाहारद्व
न्द्व इत्येवास्त्विति वाच्यं विभाषावृक्षेति सूत्रस्य विभाषापदेन प्रकरणात् समाहारद्वन्द्वस्यैवाभावबोधने नानियमे
नापि तदभावबोधनस्यैव न्याय्यत्वात् किं च फलसेनेत्यनेनापि वृक्षप्रकृतिकवनस्पतीनामेव द्वन्द्वो विभाषये
कवत् अन्यप्रकृतिकानां तु नित्यैकनित्यैकवचनान्त एवेति नियमापत्तेः प्रकृतसूत्रस्य स्वार्थे इति सूत्रस्य स्व
प्लक्षन्यग्रोधाविति भाष्यप्रयोगोऽनुपपन्नः स्यात् तस्मान्मूलोक्तमेव साध्वेवमिति पूर्वापरशब्दयोरधरोत्तरश
ब्दयोः परस्परं समास एव विकल्पः अन्यैः सहेतरेतरयोग एवेत्यर्थः नपुंसकत्वार्थमिति पशुत्वादेव विकल्पे
सिद्धेऽश्ववडवग्रहणं प्रतिपदविधानार्थं तेनाश्ववडवमित्यत्र परमपि पूर्ववदश्वेति बाधित्वा सन्नपुंसकमित्ये
वं तच्छेदेन विनिगमनाविरहाद्यावदेकवद्भावभाजः परामृश्य विधीयमानं नपुंसकत्वमेकवद्भाववदेव प्रति
पदविहितमिति भावः पूर्ववदश्वेति तु एकवद्भावविरहपक्षे सावकाशमिति बोध्यं न चाश्ववडवग्रहणमपि
परस्परमेवानयोर्द्वन्द्वो विभाषा अन्यैस्तु इतरेतरयोग एवेत्यर्थमेवास्तु मृगादिसाहचर्यात् गवाश्वे तु गवाश्वप्र
भृतीत्याद्यारम्भसामर्थ्यान्न दोष इति वाच्यं विधिनियमसंभवे विधिरेव ज्याय इत्यनेन मूलोक्तस्यैव न्याय्यत्वादि+
त्याहुः विप्रतिषिद्धं च विरोधोऽत्र सहानवस्थानलक्षणः अद्रव्यवाचिनां तस्यैव संभवात् अधिकरणं द्रव्यं चो
विभाषानुकर्षणार्थः तदाह वैकल्पिक इति अद्रव्येति अद्रव्यवाचिनां चेद्विरुद्धार्थानामेवेति विपरीतनियम
स्तु न सोऽत्रानुपूर्वीस्वरसभंगापत्तेः शीतोष्णे उदके स्त इत्यत्र पाक्षिकैकवद्भावापत्तेश्च उभयतो नियम

प्रा॰ प्रो॰

स्तुनमाभावाद्धोरवाच्चतेन द्रव्येतिगुणोपसर्जनद्रव्यवाचिकानामित्यर्थः अनधिकरणवाचीत्यस्य पर्युदा
सत्वेन क्रियावाचकानां विरुद्धार्थकत्वाभावेन च गुणवाचकस्यैव ग्रहणात् नियमस्य सत्त्वालीपाये ब्रह्मतया।
गुणोपसर्जनद्रव्यवाचक एव समाहारद्वंद्व निषेधात् अत एव नैतत्स्य नमश्चेत्यादौ पाक्षिकसमाहारद्वं
द्वो भवत्येव अत एव न विप्रतिषिद्धमधिकरणविद् धिपपत्र्यादीनीत्यलघुभूतं नास्त्रितिघनपत्त्रुदाहर
ति शीतोष्णे उदके इति इतरेतरयोग एवेति फलसेनावनस्पतीनि साहचर्यादिति भावः किं चात्र विभाषेति ए
कवचनमिति चानुवर्तते न च पौर्वैकल्पिक एकवचन द्वंद्वः स विरुद्धार्थानां चेदद्रव्यवाचिनामेवेत्यन्यत्रैवका
रबोध्यान्ययोगव्यवच्छेदस्य विशेष्यभूतेकवचनद्वंद्व एवान्वय उचितः द्वीन्यान्तु विशेषणैवैकल्पिकत्वेस
म्प्रायतनीति दिक् भवेत्येवेति विप्रतिषिद्धग्रहणाभावेन तु सतत स्यात् अद्रव्यवाचिनामेवेति नियमादिति
भावः एतेन रत्नौपम्यमनुदाहृतं कामक्रोधमिति तत्परास्तं कामक्रोधयोर्विरोधाभावे पि द्रव्यवाचित्वाभावे
न नियमव्यावर्त्यकोटाव प्रवेशान शीतोष्णं सुखदुःखमित्यादाविव पाक्षिकैकवद्भावस्य दुर्वारत्वादिष्टत्वा
च्च नियमार्थेहीदमिति स्थितेः विपरीतनियमस्तु नेत्युक्तमेव अत एवानधिकरणे इति किं शीतोष्णे उदके इति
वृत्तिः संगच्छते यत्तु कामक्रोधप्राद्रूपोर्ध्वैलक्षणेति तत्र निषिद्धलक्षणापत्तेः अन्यथा गंधादीनामपित
द्वितिद्रव्येलक्षणया प्रयोगापत्त्रौ पूरणगुणेति सूत्रस्थभाष्यविरोधापत्तिः सत्रोदाहरणं तु शीतोष्णसुख
दुःखं शीतोष्णे इत्यादि विप्रतिषिद्धमित्येतावन्मात्रेण शीतोष्णे जले इत्यत्रातिव्याप्तिर्नेदकयां चन्द्रन्याविता
दावव्याप्तिश्चेति भावः तदधिपय नियमप्रपंचमपि नानेन नियमस्यैव निषेधः गणपठितब्रह्मप्रजापत्या
दिषु नियमस्याप्राप्तेः तत्साहचर्यात्प्रकरणाच्च चार्थे द्वंद्व इति सूत्रविहित समाहारद्वंद्वस्य नियमस्य चाने

।नेनिषेधः अत एव गणे द्विवचनान्तानामेवैषां पाठः एतेन दधिपयसीत्यादावनेनेतरस्येति पाठार्थं न प्रयुक्तं वि
कल्पस्य निषेधेपि जातिरप्राणिनामिति नित्यः स द्वन्द्व इति परास्तं अत्र अवसरन्यायेन सिद्धे ऽस्य तदाह
नैकवदिति दधिपयसीति अत्र व्यंजनत्वाद्विकल्पः प्राप्तः अयमाकृतिगण इति गणरत्नकृतः न च +
स्कंदविशाखावित्यत्रैकशेषापत्तिः स्कंदश्चैव विशाखश्च द्वौ पुत्रौ संबभूवतुरिति भारतस्य स्वरसेना
पर्यायत्वनिर्णयात् ननु नियमसूत्राणां निषेधमुखेन प्रवृत्तौ जातिरप्राणिनामित्यनेन दितरेतरयो।
गनिषेधक एवं चानेन समाहारद्वंद्वनिषेधे तेन चेतरेतरयोगनिषेधे दधिपयसीत्यादौ द्वंद्व एव न स्यात्
कल्प्यमाननिषेधस्यैवायं निषेधः अंगीकारे तु चार्थे द्वंद्व इति सूत्रेणोभयं स्यात् पाठान्तरं द्विवचनान्तग
णपाठसामर्थ्यात् एतद्विषये एकवचनद्वंद्वविषयं प्राप्तं विधायकं नियामकं वा तस्य सर्वस्य निषेधांगी
कारेणादोषादित्याहुः इत्थं तं कचिन्निषेधस्य निषेधः अत्र प्रजापतीत्यादौ क्वचित्समाहारस्येति वेद
प्यापत्तिश्चेति चेत्राविधिमुखेन प्रवृत्तिः सामान्यशास्त्रसंकोचकतावेति पक्षस्यैवात्र लक्ष्यानुरोधेन स्वी
कारात् एवं संकोचक एव तत्रावेलद्विषये सामान्यशास्त्रसंकोचाभावादितरेतरयोगभवत्येवेति दिक्
अधिकरणेतावत् समासार्थस्य अधिकरणं वर्तिवदार्थेन् पदद्वयं न स्यैतावत्वं परिमाणनियमः स चेह
संख्याकृत एव व्याख्यानात् इति व्याचख्युः द्वयसंख्येति नियमोनेति पूर्वसूत्रवत्सामान्यतो निषेधमाना
भावात् नियमप्रकरणात्तु नियमस्यैव निषेध इति भावः किंच समाहारद्वंद्वनिषेधे दशदंतोष्ठा इति न।
स्यात् अनेन समाहारद्वंद्वस्याप्राप्तंपगानां समाहार एवेत्यनेनेतरेतरयोगस्य च निषेधेन वाक्यस्यैवा
पत्तेः एवं च मेकस्मिन् हास्यांघ्रिकरेष्वभिख्याभित्ताधनामाधुकरीसदृक्षेत्यादि साधु स्यात् किंच

471

वर्त्तिपदार्थस्य संख्याविशेषे बोधनीये पेक्षत्वेनासामर्थ्यान्न समाहारे द्वंद्वस्य प्राप्तिरेवनेति तन्निषेधो व्यर्थः
नच दशपंचदंशूल्पद्रुति समाहारे द्विगुवन्न प्रधानभूते समाहारे दशत्वान्वयविवक्षायां प्राप्तं समाहारद्वं
द्वस्य निषेधोस्त्विति वाच्यं द्रव्यसंख्यानवगमेनैतत्सूत्राप्राप्तेः परंपरासंबंधेन यथाकथंचिद्द्रव्यसं
ख्यावगमे च सूत्रप्रवृत्तौ न किंचिन्मानं नचोक्तन्यायेनेतरेतरयोगद्वंद्वोपि न स्यात् तत्र प्रधानस्या
सापेक्षत्वेनादोषात् मम तु प्राण्यंगादिषु द्वंद्वस्येति नियमादितरेतरयोगस्याप्राप्तौ तद्विधानेन।
चारितार्थ्यं स्पष्टमेव न च नियमेन समाहारद्वंद्वप्राप्तिविषय एवैतन्निवृत्तिबोधनात्मकं यमत्र द्वंद्वश्चे
त्यस्य प्राप्तिरिति वाच्यं पादमित्राधिसमाहारस्य विशेष्यत्वेनेतरेतरयोगस्याप्राप्तौ प्रकरणस्य निया
मकत्वानापत्तेः यदि तु प्रकरणे सामर्थ्यादवांतरभेदमनादृत्य प्राण्यंगत्वादिनोपाधिनाश्रयणे न
प्राण्यंगादीनां पादिद्वंद्वस्तर्हि समाहार एवेति वचव्यक्त्येतरेतरयोगव्यावृत्तिस्तर्हि प्रकृतेपि नषैः प दो
न्तु समाहारद्वंद्वविषये सापेक्षत्वेपि नासामर्थ्यमिति तत्र धवे एव देवदत्तान्वयविवक्षायां वदत्रस्य दधवख
दिरमिति प्रयोगापत्तेः मानाभावाच्च एतत्सूत्रसार्थक्यं तूक्तमेवेति दिक्। दशदंतोष्ठा इति समाहारे दशत्वा
स्यान्वयविवक्षायां दशदंतोष्ठानीत्यपि भवत्येवेति बोध्यं पाठांतरं केचित्तु दंतोष्ठाद्वारकसंबंधेन दशत्व
स्य समाहारेन्वयविवक्षायामस्त्येव समाहारे द्वंद्वप्राप्तिस्तस्मात्पूर्वसूत्रवदयमप्युभयोर्निषेधः अ
तएवात्र सूत्रविषये समाहारद्वंद्वसिद्धिः सामर्थ्येनासामर्थ्ये समासकल्पनापेक्षया एवमन्वयक।
ल्पनस्यैवोचितत्वात् किंच पदार्तरेतरयोगेपि उद्भूतावयवभेदः समूह एव समासार्थः स चावयववलिंगा।
दिभिस्तद्वानिति मतं तदा सापेक्षत्वात्तस्याप्यप्राप्तिरिति मदुक्तमेव प्रकरणं अपि च नियमेन समाहारं

द्वंद्वप्राप्तिविषय एवेतरयोगनिवृत्तिबोधनाद्द्वंद्वंद्वश्चेत्यादिः प्राप्तिरेवाभावेननिषेधः स्यात् सामीप्येनपरिच्छेद
वृत्तिसोऽचसमीपपावृः सामीप्येनपरिच्छेदेनात्तलिक इतिभावः यद्यपीहसमाहारद्वंद्वोवेतिव्याख्यानेपिनत्त
त्रिस्त्वत्यापि प्रक्रममनुरुध्याह नियमोवास्यादिति उपदशांदंतोष्ठमिति दशसमीपदंतोष्ठसमाहार इत्यर्थः
दशासामीप्यंचनहृत्तिसंख्यावत्वेनेतिबोध्यंवृत्तिपदार्थेषु सामीप्यान्वयेनासामर्थ्येपिएतत्सामार्थ्यादेव
समाहारद्वंद्वः इतरेयोगेतुबहुव्रीहेरेवानुप्रयोगः तस्यसमीपसंख्यावत्प्रधानत्वात् नचाव्ययीभावानुप्रयोग
स्तुन समानलिंगवचनत्वेनबहुव्रीह्यनुप्रयोगस्येवन्याय्यत्वात् अतएवसमाहारद्वंद्वेनबहुव्रीह्यनुप्रयोगः किं
त्वव्ययीभावस्यैवेति यद्यपिलिंगवचनत्वेनबहुव्रीह्यनुप्रयोगस्येवन्याय्यत्वात् अतएवसमाहारद्वंद्वेनबहु
व्रीह्यनुप्रयोगः किंत्वव्ययीभावस्यैवेतियद्यपिसमाहारेबहुव्रीह्यनुप्रयोगेपितस्यअवयवव्यवहारकसंबंधेनसमु
दायार्थेऽन्वयेनद्वंद्वार्थाभिन्नत्वाद्द्वंद्वार्थस्यैकवद्भावादेवत्वेउपदशमितिसिध्यतितथापिषष्ठ्येकवचनादौउपदश।
स्यपाणिपादस्येत्यपिस्यात् उपदशंपाणिपाणिपादस्येत्येवेष्यते यद्यपिउपदशपदार्थेसमाहारविशेषणपा
णिपादेऽन्वयः नसमाहारेपाणिपादस्येतिषष्ठीतसमाहारनिरूपितसंबंधे इतिनोपदशस्येतितत्सामाना+
धिकरण्यान्वयस्यापादनाद्दीतथापिबहुव्रीह्यर्थस्यनानमजन्यप्रतीतिविशेष्ययोरभेदान्वय इतितुल्यत्या
समाहारएवान्वयः स्यात् नविशेषणेपाणिपादादावितिइष्टबोधासिद्धिः अव्ययीभावानुप्रयोगेतुअव्य
यतयानदोषः वृत्त्यन्तरेऽव्ययात्तिरिक्तान्वयविशेषणदानात इत्याहुः समाहारेदशसामीप्यान्वयविवक्षायां
तुउपदशाद्दंतोष्ठानीतिबोध्यं अव्ययीभावानुप्रयोगेसामानाधिकरण्यंतुसमीपसमीपिनोरभेदविव
क्षयेतिस्पष्टंभाष्ये इतिदिक् आनङृतो विद्यायोनीत्यनोविद्यायोनीत्यायात्तु वर्त्ततेनचैवंकृतरत्व।

षा॰प्रो॰

472

ऽऽत्वस्याप्यनुवृत्त्यैव सिद्धेः किं ऋत इत्यनेनेति वाच्यं तस्य हि स्थानित्वेनैव संबंधः स्यात् ऋदंतसामर्थ्याद्द्वंद्वविशेष
णं तेन विना महादौ नानङ् नकारोच्चारणमुरपरत्वबाधनार्थं अत्र ऋकारस्य निर्दिश्यमानत्वे ङकारो मित्राव
वरुणाविन्त्यादेरेव नादौ देवताद्वंद्वविषयेऽन्त्यादेशार्थः ङकारोऽन्त्यादेशार्थः उत्तरपद इति चाधिकारः न च ऋत
इत्यनुवर्त्तनेन स्यैव स्थानित्वे व्यर्थे होतृपोतृनेष्टोद्गातार इति भाष्योदाहरणप्रामाण्येनात्र उत्तरपदेन पूर्वप
दानाक्षेपात् तदंतविधिरिति वाच्यं मित्रावरुणाविन्त्यं नादेशार्थत्वात् होतेति एषां विद्याकृतैकपत्रत्विक्
कृतः संबंधः मातेति अत्र योनिकृतः मंडूकेति अनपत्यमध्येन संबंधः न तु वाक्यभेदेन संबध्यते ऋत इ।
त्यनुवृत्तेर् ऋदंतस्य पुत्रप्राग्रूपेऽस्मानङ् इत्यर्थः तेन तातपुत्राविन्त्यादौ न देवतेति अनृकारार्थमविद्यादिसं
बध्यार्थवचनं प्रसिद्धेति द्वंद्वं रहस्येति स्तत्र अभिव्यक्तिग्रहणे नात्यंतसहचरितयुगले द्वंद्वशब्दस्य निपातना
दिति भावः प्रसिद्धिश्चैकहविर्भागित्वेन लोके प्रसिद्धं साहचर्यं तया वा तत्राया अप्रसिद्धिस्तु कल्पसूत्रवेदयोर्शाणा
ऽत्यादाविति स्कंदविशाखौ शिववैश्रवणाविन्त्याद्यर्थः ईदग्नेः देवताद्वंद्वे इत्येवेति ऽपोतिर्लेतावियाग्नीषोमौ माणे
छामी त्याश्वलायनप्रयोगस्तु कांदसत्वाद्बोध्यः अग्नेस्तुन्सात्पदाद्योरित्यस्यापवादः अग्निष्टुतत्कृतान्तु विशेषः
संपदादित्वात् क्विपि करणे क्विप् अग्निष्टोम इति सोमयागस्याख्यासंस्थोच्यते इद्वृद्धौ तकार उच्चारणार्थः वृद्धिग्र
हणे न च तद्वत् लब्ध्यते न हि पोत्तरपदासंभवात् तदाह वृद्धिमतीति अलौकिक इति तद्धितीया अलौकिक इत्यर्थः प
यथ्यंतरंगत्वं तथोक्तस्यापि उपजनिष्यमाणे व्यपवादः इति न्यायान्नैयत्यान् तद्धितविषया समासा अलौकिकइ
त्यर्थः वृद्धिमत्त्वं चोत्तरपदस्य भाव्येव निमित्तं एतेन समर्थानामित्युक्तेः तद्धितकृतिविषयेऽकृते तस्यैव उप
जनिष्यमाण इति न्यायस्याप्रवृत्तिः प्रकृतिसंबंधे तु कृतानङादौ प्रवृत्त्यैव चरितार्थमित्यपास्तं आग्ना

प्र

वैयर्थ्यमिति इत्वाभावादानङेव । द्यावाक्षामेति द्यावाक्षामारुक्मो अन्तर्विभातीत्यत्रत्यमिदं तत्रैकं पदं द्वंद्वसमासः
दिवो द्यावेति द्यावादेशः सुपां सुलुगिति षष्ठ्या डादेशः देवताद्वंद्वे च निपूर्वोत्तरपदयोः प्रकृतिस्वरः इति वे
दभाष्ये स्पष्टं यत्तु सरूपसूत्रे चार्थे द्वंद्व इति सूत्रे च द्यावाक्षामेत्युदाहृतं युगपदधिकरणवचनतासा
धकत्वेन तत्तु द्यावाक्षामा पृथमेकत्र तेनेतिमंत्रस्थत्वे तत्रैतरेतरापेक्षत्वाभयत्रापि द्विवचनं द्यौश्चक्षा
द्विवचने गोतो णिदिति णित्वे सुपां सुलुगित्याकारः प्रथमे प्रधाने दिवस्पृथिव्योः इति तदर्थः इ शब्दो ।
ऽसमासद्योतकः अकारोच्चारणमिति सचोच्चारणार्थः नेत्संज्ञाफलाभावात् अननुनासिकत्वमाना ।
भावाच्च नापि विवक्षितः प्रयोगेऽश्रवणात्तु तदुच्चारणं हि सूत्रे सानस्य श्रवणं प्यास्यादिति तदपि श्रूय
माणसकारांतादेशस्य विधानं स्यादित्येतदर्थं ते न प्रयोगे विकाराभावो नुमीयते इति भावः छंदसिट
हेति द्यावाचिदस्मै इति पृथ्वी चिदस्मै पृथिवी संनमते इत्यत्रत्यमिदं चिदस्मै इत्यनेन व्यवधानात्स ।
मासाभावनिर्णयः तत्र समासाभावे पि द्यावादेशः इतरेतरापेक्षत्वाद्विवचनं प्रमित्रयोर्वरुणयोरिति
वत् अत एव पदकाले पृथिवी इतीति प्रश्लेषं पठंति अत एव संनमेत इत्यनेन सामानाधिकरण्यमित्यर्थः
तत्त्वा क्रंदसीति पूर्वसवर्णः अपरे तु द्यौश्च रूपे वा त्रापि द्यावेति पूर्ववत् इतरेतरसमानं अयमेव मूलार्थः
ध्वनितं च वेदं चार्थे द्वंद्व इत्यत्र कैयटेनेत्याहुः विसर्गमिति तेन न कश्चिद्विकारो नेत्येवानुमेयं लक्ष्यानुरोधादिति भा ।
वः मातरपितरो मातृशब्दस्यारङादेशो निपात्यते उत्तरखंडे तु ऋतो ङीत्येव सिद्धं एकशेषस्यैवैकल्पि ।
कत्वाद्द्वंद्वः इदं च वृत्तिकृदयोः स्पष्टं यद्यपि भाष्ये पितरामातरा च छंदसीति सूत्रे इदं सूत्रे च ध्वनिताः पूर्वोत्तरप
दयोरारारौ निपात्येते इत्युक्तं तथापि तत्र पूर्वोत्तरपदयोरिति सप्तमी तयोः सतोः पूर्वपदस्यार्थे इति के

यदः अनन्तर एवोत्तरपदे इत्यधिकृतस्यानवाधः विस्तरस्तु भाष्ये प्रदीपोद्योतेद्रष्टव्यः इदंतु बोध्यं इत्यनिर्णयग्र
हणं न तत्कालेत्वकृतस्वनियमपिवाकृत्त्वचमितिप्रयोगेत्वकशब्दोलघुतरं न च्यापि समर्थसूत्रस्य भाष्य
प्रामाण्यात्परनिपातोस्येत्याह वहूनामिति वाक्यस्त्रकन्यचं इदमगर्भइहेतुवाकस्वजनं इतिइदं अ
पवादसंगत्याह अग्रयेति विभाषाणां सौत्रसत्रूपशाह्नस्य रूप्यते बोध्यते इति भूतस्वत्वर्थपरतयापि व्या
ख्यानादिदं सिद्धमित्याह समानार्थत्वं चात्र नानधिकार्थकत्वं तेनाश्वश्च सैंधवश्चेत्यत्र नैकशेषः
सूत्रे सरूपाणामेवेति नियमाश्रयणात् वृद्धो यूना वृद्धमिति पाणिनिसूत्रे गोत्रसंज्ञस्य प्राचां संज्ञात्वे
वचेहग्रहणं न तु वृद्धिसंज्ञस्येत्यादि अपत्यवाचकेन कृत्रिमेणापूना साहचर्यान्नु व्याख्यानाच्च न दाहमगोत्र
मिति गोत्रे पूर्वेत्येवत्तु नोक्तं अपत्याधिकारादन्यत्रापत्यमात्रस्य लौकिकगोत्रग्रहणस्य वस्तुप्रमाणत्वा
त्तस्य ग्रहणं पत्नौ औपगवो नंतरऔपगविश्च पुत्रैकशेषापत्तेरित्येके युवप्रत्ययमात्रेतियुवत्वप्रतीतिमात्रेत्यर्थः
एवकारलभ्योयमर्थः तल्लक्षणमिति आर्थं शाब्दं चेत्यर्थः इदं सरूपग्रहणानुवृत्तेर्लभ्यते सारूप्यं तदुपात्तविशे
षातिरेकेणग्राह्य यद्वायोसोविशेषः स तल्लक्षण एवेति वचनव्यक्तापावतुइदं पविधेफलाभेन तल्लाभः भाग
वित्तीति गोत्रापत्यें तत्र स्त्रूनि तदेताहृ द्वावकुसौवीरेष्विति कुत्सा पाठ कुत्र च कुत्सासौवीरगोत्रं चाधिकमपे
त्यतेन तु युवत्वमात्रकृतं वैलक्षण्यमिति भावः गार्ग्यवात्स्यायनाविति इदं च कृत्स्नशब्देषूपलक्षणं गोत्रादिक
नमित्यर्थः स्त्रीपुंस्त्रीत्वस्यैवेरूप्यकारणस्याधिक्यात्पूर्वेणाप्राप्तौ वचनं तल्लक्षणश्चेदेव विशेष इति इहापि सं
वध्यते तेन गार्गी च वात्स्यायनश्चेत्यादौ नातिप्रसंगः पुंवत्कृतवैलक्षण्यं स्फुटीकियते कर्त्रैर्द्विवचना
तेनविग्रहमाह गार्ग्यायणाविति अर्थातिदेशस्य फलमाह अनुवर्तमाने इति तद्राजस्य बहुषु लुक् इति अतः २

पाद्यनिर्देशो स्त्रीत्वस्य निवर्त्तनान्न लुक् स्यादितिभावः पुमानित्यत्र सरूपाणामिति निवर्त्तते तेन हंसश्च व
रटा चेत्यत्र हंसत्वजातिसाम्ये शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वेऽपि नातिप्रसंगः सारूप्ये सति।
तल्लक्षणविशेष एवैतन्मते: अत एव भ्रातृपुत्राविति सूत्रं चरितार्थं तदुक्तं भाष्ये यत्रार्थे प्रकृतेस्तल्लक्षणम्।
एवं विशेषस्तत्रैकशेषो भवतीति तल्लक्षण एवेति किं इंद्रेंद्राण्यौ अत्र पुंयोगकृतोऽपि विशेषः ननु गौरे
यं गौश्चेयं चानयोः सहोक्तावेतौ गावाविति नियमेनानस्यान्न तल्लक्षणविशेषाभावदेतस्य त्राप्राप्तेः स।
रूपाणामित्येकशेषेऽनुपपन्ने स्त्रीवाचकस्यापि शेषापत्तिः न च गावावित्यत्र रूपे विशेषाभावे नानुप्रयोगे
च त्यदादीनीत्येकशेषे त्यदादितः शेषे पुंनपुंसकतस्तन्त्रोक्तेरेतावित्यस्य नियमेन सिद्धिरिति वाच्यम् अहं द्व
न्तल्रूपविशेषणानामित्यत्र द्वंद्वपदेन तदपवादैकशेषस्याप्यलक्षणात् न तदप्राप्तेरिति वक्ष्यते न चै
तेगावावित्यत्रैवापत्तिरेवास्त्विति वाच्यं कैयटादिविरोधात् तर्हि पुमान् स्त्रियेति नत्वैकशेषे इति
चेन्न चेदं शब्दोपादानसामर्थ्याद्विशेषश्चेत्तल्लक्षण एवेत्यन्वयेन तदितरकृतविशेषविरहरूपे विशि।
ष्टाभावे तात्पर्यान्न दोषः स चेह विशेष्याभावादस्त्येव अत्र विभक्ताविव्यनुवर्त्तते। विभक्तौ तदितरकृत
विशेषविरहश्चेदित्यर्थः अत एव जननीवाचकमातृशब्दयोर्नैकशेषः हंसाविति ननु शिष्यमाणस्य
लुप्यमानार्थाभिधायित्वात् तत्रार्थस्य तत्रार्थस्यापुंस्कत्वेन स्त्रीप्रत्ययो दुर्वार इति चेन्न स्त्रीपुंसयोरिति व
क्तव्ये वैरूप्येणानिर्देशात् शिष्यमाणतो लिंगं न तु लुप्यमानतोऽपीत्यर्थज्ञापनेनादोषादित्याहुः आस।
लीवत्सश्च जातसणावत्सा चेत्यत्र न पुंवत् यत्र प्रधानगतस्त्रीत्वपुंस्त्वकृत एव विशेषस्तत्रैवैकशेषप्रव
त्तेः इह चाप्रधानकृतविशेषस्यापि सत्वात् यतः स्त्रीपुंसोः सहविवक्षायामेवैकशेषः सहविवक्षा।

शा॰ शो॰

च प्रधानयोरेवेति न च लक्षणे ऽपि देवेत्यनुवृत्त्या घटनशब्देन तयोरेव परामर्श इत्याह । नपुंसकमन अन्यत
रस्यामित्येकवद्वेत्यत्रेनैव संबध्यते आनंतर्यात्तत्त्वर्थं च शब्दाच्चेत्याह । तच्चेवेति अनपुंसकेनेति किं शुक्लं च
शुक्लं शुक्लौ अत्रैकवत्त्वं न अस्य ग्रहणमस्यैवैकवद्भावइति बोधनार्थं अन्यथोत्तरत्राप्यनुवृत्तिः संभाव्येते
त्याह । ननु समाहारद्वंद्वविषये ऽप्येकशेषस्योपपादनादेकवच्चेत्यादि व्यर्थमिति चेन्न विशेषसूत्राणां
गार्ग्य॰च तद्विषये ऽप्रवृत्तिज्ञापनार्थत्वात् अत एव गार्ग्यायणश्चेति विग्रहे गार्ग्यायणं इति न साधु अत एवास्य ग्रह
णं चरितार्थं अन्यत्रैकवद्भावप्रयोजकीभूतैकशेषाभावबोधनार्थं हि न तत्र अननुवृत्तिस्त्व स्वरितत्वादपि
सिद्धा वस्तुतस्तु जातिव्यक्तिरन्यतरपदार्थो अयेन वचनद्वयस्य सिद्धमाश्रित्य भाष्ये प्रत्याख्यानात्स्य शा
र्थमेवेतत् अनभिधानमन्यत्र भाष्यमतेत्याह । शुक्ले शुक्लादिपदानां पुंस्त्वाद्गुणिपरतां स्यो रपि लुप
टादिपदोपादानं एवं च गुणपरतायां नीलो रूपमित्याद्येव प्रयोगः गुणिपरत्वे तु विशेष्यलिंगाः तदुक्तं गुणे
शुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीति तथा स्त्रीदारादयो ऽपि हि शब्दं यादृशोः प्रस्तुतं पदैः गुणद्रव्यक्रिया
शब्दास्तथा स्युस्तस्य भेदकाः स्तुवतिनी स्त्री स्तुवतिनो दाराः स्तुवतिकलत्रं दंडिनी स्त्री दंडिनो दाराः ।
दंडि कलत्रं पाचिका स्त्री पाचका दाराः पाचकं कलत्रमिति उदाहरणानि नमयति न धनुरेषां यस्तदा
रोपणेन त्रिभुवनजयलक्ष्मीमैथिलीनस्य दारा इति हनुमन्नाटकपद्ये तु दारा इत्यस्यैव विशेषणत्वात्
बह्वितिवहवः अमरव्याख्यानात्तस्तु गुणे शुक्लादयः पुंसीति विशेष्यानुपादाने ऽप्यस्य सामान्येन पुं
सकस्यापवादः तेन नीलं रूपमित्याद्येवेत्याहुः नच लक्षण एवेति किं हि महिमान्यो ऽत्र महत्त्वादि
तो ऽपि विशेष इत्याहुः पिता मात्रा श्वशुरः श्वश्र्वा इदं सूत्रद्वयं नैकशेषार्थं विवक्षितार्थलक्षणयापि

पितरावित्यादिसिद्धेः नापि द्वंद्ववृत्त्यर्थस्यैकत्वविकल्पकत्वे न पक्षे तस्यापीष्टत्वात् किंतु मातरावित्यादेरस्ता ह
गमकेऽसाधुत्वबोधनाय मातापितराविति पितुर्दशगुणं माता गौरवेणातिरिच्यत इति स्मृते मातुरभ्यर्हितत्वात्
पूर्वनिपातः कृत इत्यानङ् श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिता इति स्मृतेः श्वश्र्वा अप्यभ्यर्हितत्वं स
दादीनि सर्वैः सर्वं त्यदादिभिरन्यैः शेषेत्यर्थः अन्यथा अन्यासत्यासदादिभिः सहोक्तावित्येवार्थः स्यात् प
रमिति गणीयप्राक्पर इति शक्तिपे धादिति भावः पूर्वोपस्थितत्वरूपान्तरंगत्वेन व्यवस्था बाधा एव वाचनि
वा कमेवेदमिति कश्चित् पूर्वशेषोपीति अत एवाहं च भवांश्चावामिति सिध्यति अत्रादिपर्येतानामिति निय
माभावात् देवदत्तश्च भवांश्च भवन्ताविति सिध्यति स्पष्टं चेदं सर्वनामसंज्ञाप्रकरणे भाष्ये त्यदादित इति त्र्याद्यादि
त्वात्तसिः त्यदादीनां शेष इति अर्थः पुंनपुंसकत इत्यत्राप्येवमेव स्त्रीशेषेपि पुंस्त्वादिप्रयुक्तमेव लिंगं भवतीति
भावः पुंनपुंसकयोस्त्विति पठिष्यते न तु नपुंसकमित्यन्वयः परत्वं च पुंनपुंसकत इति वचनेऽदं इदं च कैयय
दोस्पष्टं लिंगसर्वनामत्वेन नपुंसकत्वस्य व्यापकतया प्राधान्यात् तस्यैव लिंगमिति नपुंसकमनपुंसकेति सू
त्रभाष्योक्तरीत्यापीदं साधयितुं शक्यमिति बोध्यं अस्यापवादमाह अद्वंद्वेतिन्यायप्रसिद्धं चेदं अंतरंगत्वात् एवं लिं
गबाधनेन चरितार्थस्य बहिरंगविशेष्यसंबंधप्राप्तलिंगबाधकत्वे मानाभावादिति कैयटः अत एवैकशेष
विशेषणेपि त्यदादित इत्यस्य प्रवृत्तिः अत एव पुंस्त्रीसंघे स्त्रीशेषे गाव इमाश्चरंतीति भाष्यप्रयोगः संगच्छते
इमा इत्यत्र ह्यनेनैवैकशेषः एवं च विशेष्यसंनिधानाभावे तच्च सा च स च तानि स च सा च ताविन्यादौ पुंनपुंस
कत्व एव लिंगमित्याहुः कुक्कुटमयूर्याविति द्वंद्वतत्पुरुषयोः परपदलिंगत्वेन तदधीनत्वेव विशेषणस्यापि
बोध्यं तत्पुरुषे उदाहरति तच्चेति पिप्पल्या अर्धं सा चेति अर्धपिप्पली अर्धपिप्पल्यौ ते इति इदमुपलक्षणं

अर्धपिप्पल्यस्त्वादित्यत्र विशेषो बोध्यः नचैवं सूत्रे सर्वैरिति व्यर्थं त्यदादीनां समान्यसामान्यवाचित्वेन तस्यैव प्र
योगसंभवात् नच द्वंद्वनिरन्त्यर्थं सामान्यविशेषवाचिनोस्तदभावादिति वाच्यं क्वचित्तयोरपि द्वंद्वज्ञापनार्थ
त्वात् तेन गोबलीवर्दं प्रमाणप्रमेयेत्यादि च सिद्धं अत एव शास्त्रभरतेष्विति निर्देशः संगच्छते प्रकरणादिना
तत्कतृस्यापि विशेषपरतायां द्वंद्वनिरन्त्यर्थमस्यावश्यकत्वात् अविद्यानत्वितो योगः मत्स्यादौ तद्विशेषयो
रित्यादौ तु तदिति विभक्तिप्रतिरूपकमव्ययं पंचादिपठितं वा स्याकृतिगणत्वात् अत्र च सूत्रे परस्परसाहचर्येण
नव्ययस्यैव ग्रहणादित्याहुः द्विशाद्वेकशावृयोस्तु द्वौकारिति निर्देशादेकशेषो न ग्राम्यपशुअत्र नपुंसकेने
त्यनुवर्त्तनेन तद्धन यत्राह पुमानिति स्पष्टं चेदं तत्रैव गौगावाविति संघग्रहणाद्बहूनां समुदाये शास्त्रमिति भावः
संघग्रहणसामर्थ्याद्ववत्सादिति नच नाय तरुणवाचीशूद्रादौ नर्णाके वत्स इति द्विकोटशेषात् तर्णकं संघो
जातगवापत्यमिति तद्व्याख्यानात् सकृत्करिस्तु वत्स स्यादित्यमरात्वेतिवाच्यं वत्सं स्त्रीवेतु वत्सतीति कोशा
त् वत्सो वाचकात् शाशस्त्रे प्रथमे घचि प्रशस्तवत्सोर्थे तद्ग्रत्यर्थे तरुणस्यैव प्रतीतेः प्रकरणादिना च पदागम
वो विशेष्यत्वेन ज्ञातास्तदेदमदाहरणं ध्वनितं चेदं वृत्ताविव्याहुः यद्वा वत्सशब्दस्यापत्यवाचिनः प्रकरणा मात्र
दिना तरुणपरत्वे इदं प्रत्युदाहरणं ध्वनितं चेदमं तर्वदिति सूत्रे भाष्ये वर्करस्काम्रेमेइत्यपि प्रत्युदाहरणं वर्क
रस्तरुणः पशुः अनेकशफेष्विति उष्ट्राणां त्वारण्यत्वात्स्त्रीशेषाभाव इति केयटादयः तेषामखुर
त्वात्रेत्यन्ये एकशेषे वक्तुमेइति विभक्त्यपनये हृत्विनां तरंगत्वात्रदुत्यन्तेनैः पूर्वमित्यर्थः द्वंद्वापवाद एक
शेष इति व्यवहारस्तु नार्किकी शान्तिमादाय बोध्यः एतेन कतं द्वंद्वानामेकशेषत्वमिति निरस्तं फलो
पि विशेषमाह तेनेति समासत्वद्वंद्वत्वाभावेन त्यर्थः एकवादिति तत्रिपमरइत्यर्थः पंचानामिति

ते

इतोऽसर्वनामस्थानइतिस्त्रं तंनुपंचाऽत्यत्र मिष्ठिताऽदोव चरितार्थसमासांतो नेति कृत हंहाना मेकशेषे हिंहंहालो।
किकविग्रहवाक्ये नन्त्राणिर्दिष्टे रासप्यादिति भावः अतएव सर्वइत्यादौ विभाषाजसीति स्पेकशेषः प्रसंगादाह त्त
दिति परार्थाभिधानमिति करणे ल्युट् परपदार्थेनान्वितापः स्वार्थस्तदभिधानमभिधामिः तदुपस्थितिः सत्वकारण
मित्यर्थः इतरार्थान्वितस्यैव स्वार्थस्योपस्थितिर्येन घटकैरिति फलितं साच समुदायशक्तिसाध्या अयमेवचैकार्थी
भावः एतदुक्तं भवति न केवलयारूढ्यापावपवशक्त्या सर्वत्र निर्वाहः किंतु विशिष्टार्थे विषयकेशक्त्यंतरमेवस्वीक
र्तव्यं अत एव चित्रगोर्विशेषणस्य पदार्थैकदेशत्वान्न विशेषणसंबंधः इहैव स्याद्योगः बहुव्रीहौ पक्कद्वादेः किंच
बहुव्रीहेरन्यपदार्थे शक्तिरपि अवयवशक्तिमात्रवादिनां न सिध्येत न च निरूढलक्षणया निर्वाहः शक्तावेव प
र्यवसानादिनी त्यन्यत्र विस्तरः अप्रसिद्धं नानेति दिकपरस्य प्रत्यासन्न्यानन्नह त्रिविधायकस्त्राद्दितात्पर्यवि
षय एव एकार्थीभावोपि पदविधिर्नत्पर्यविषयोरेव प्रत्यासन्ने द्विशा इत्यादौ सुजर्थादीनामपि व्याख्यानात्र।
त्वं बोध्यं वृत्तिरिति समुदायस्यवृत्त्याश्रयत्वेनोपचरिकोयं शाब्दव्यवहारो निरूढः पंचस्थितिबोध्यं तत्रतद्धित
समासयोः पदोद्देश्यकविधित्वस्य स्पष्टत्वेन मानांतरासिद्धेकार्थीभावस्य च सत्वेन परिभाषाप्रवृत्तिः स्पष्टैव कृ।
नामप्युपपदनिमित्तकानां कर्मण्यणित्यादीनां तत्वं स्पष्टमेव न च तत्र नित्यसमासात्वकृतेकार्थीभाव एव अभिधा
तिमूलकेनोपदं शामित्यादावसमासेपि नदावश्यकत्वात् न महांतं करोतीत्यर्थे ऽसमार्थ्यात्समासप्राप्ताव
पि इडुन्यते इवार्त्ताव्रकृतद्धितप्राप्तौ च नहटिन समुदायपरो ननदंतपरो अतएव हृकचोर्नदोषा पाचक।
इत्यादावपि उद्देश्यविधेयभावेनानन्वयापायकत्वेरिकृदित्यादेरकरूप्यापचैकार्थीभावस्यावश्यक इति बोध्यं

अत एव पाचकादिशब्दानां क्रियाप्रवृत्तिनिमित्तकत्वमित्याकरे व्यवहारः अत एव व्यापारान्वयविवक्षाया
मादिः पाचकवृत्तिन साहचर्यात्तु परिभाषाप्रवृत्तिर्बोध्या पदविधिशब्देन पदोद्देश्यकविधिस्तत्साहचरित्ता।
विधेश्च ग्रहणात् फलेत्वेकदेशविशेषणस्यान्वयो भवत्येव अत एव समस्तार्थ्यापकशब्दैकदेशदारुणमि
त्यादिक्रियाविशेषणानामन्वयः पूजनात्पूजितमित्यत्र भाष्ये दर्शितः एकशेषेपि द्वंद्वदरन्यनुवृत्त्यान द्वि
वचनविधानेनैकार्थीभावस्यावश्यकः नन्वेकशेषप्रकरणं चार्थे द्वंद्व इत्युत्तरमेव कार्यं समर्थाधिकारला
भेनैकार्थीभावविषयत्वस्य सौकार्यं कार्यमेवलाभात् सवित्यस्य तु व्याख्यानादेव निवृत्तिर्भविष्यत्येव
वं सिद्धे प्रथमपाठकरणसामर्थ्यादेकार्थीभावाभाव एव एकशेषप्रवृत्तिरिति चेन्न भाष्यविरुद्धत्वात् प्र
थमे पाठस्तु कालोपसर्जने चेत्यन स्त्रुत्यपदानुवृत्त्याऽस्य प्रत्याख्यानत्वबोधनायेत्येके सनाद्यन्ते ध
पि सुपः आत्मनः क्यजित्यादौ पदविधित्वस्पष्टमेव सनं तेन तु यद्यपि सन्नु विधेनैपदविधित्वं न यद्यपि सु
पः आत्मनः इत्यादौ न तः कर्मणे इच्छायामिति सनुवृत्तेर्योधिकारानुरोधात्साहचर्यात्तु परिभाषाप्रवृत्तिः
अत एव लिङ्गं मा ह्रासन्तत्त्वत्र तु निवृत्तिन्यासेन न विरोधः तन्मते हि पदविधित्वस्य स्पष्टत्वेन समर्थप
रिभाषाद्वैरस्य अत एव भाष्यकृता वचनं प्रत्याख्यातं स्वभावत एव वृत्त्यप्रवृत्त्योः सिद्धत्वादिति प्रातिपदि
कप्रकृति चक्षिपोपिकर्तुः क्याङिति सूत्रे उपसंख्यानत्वेन तत्साहचर्यादेकार्थीभाव एव प्रवृत्तिः प्रातिप
दिकादिति लिङ्गस्तु प्रातिपदिकाद्युत्पत्तावपि साहचर्यात् एकार्थीभाव एव प्रकृतिः नचैवं व्याकरणस्य
सूत्रं करोतीत्यर्थे सत्त्वप्राप्तस्य सविशेषणत्वात् णिजनापत्तेः व्याकरणसूत्रयतीति हेतुमति चेति सू
त्रभाष्योक्तप्रयोगानुपपत्तिरिति वाच्यं प्रातिपदिकाद्धात्वर्थे इति चुरादिगणसूत्रेणैव सिद्धे पुन

हंतु तीत्यत्र तत्करोतीत्यनेन मुंडमिश्रादि सूत्रे वत्सापेक्षत्वादपि विधानेनादोषात् वृत्तौ षष्टीत्युन सूत्रे धोतु
तयाव चनत्वेन ननन्त्रि वृत्तिरूपितकर्मत्वस्योपजनने नाशोपत्वात् अतएव सुपआत्मइतिसूत्रे भाष्ये माणवकं
मुंडयतीत्यत्र सापेक्षत्वादपि णिच् मुंडमिश्रेतिवचनसामर्थ्यादित्युक्तं संगच्छते इतिदिक् वस्तुतोऽस्य
प्रवृत्तित्वमेवनेत्यन्ये कंड्वादियगाद्यं तेनतु नवृत्तित्वं स्वार्थिकत्वेन विजातीयाभावेन एकार्थीभावस्यनि
फला रूपयितुमशक्यत्वात् पदविधित्वाभावाच्चेभावाच्च पाठांतरं अतएव माणवकंमुंडयतीति अत्र मौंडपरात् अ
उश्चाटूत्प्रत्ययः तस्यच सापेक्षत्वेन प्रतीयमानतया क्रियाया अकारके नित्यसाकांक्षत्वात्तद्दोषः नतदर्थ
कस्य प्रातिपदिकत्वात्केन णिच् गणे पाठाभावात्साधनार्थकस्यापि ग्रामतत्त्वादि स्वप्रातिपदिकत्वात् तेः
सच वृत्तिविषय एव अतएवसत्त्वप्रधानेन विग्रहकरणमितितत्त्वं इत्यंतं वृत्त्यर्थबोधकमिति एकार्थीभा
वकृतविशेषराहित्येनवृत्त्यर्थबोधकमित्यर्थः तेनपाणिनीयोदकमित्यादेर्विग्रहभूते प्राप्तमुदकंयमित्या
दौनव्यभिचारः वाक्यमिति तत्समासघटकपदानां तत्तत्समासप्रवृत्तियोग्यविभक्त्यंतानां पूर्वोक्तप्रयो
गविषयमित्यर्थः एतेन वाक्यात् इवेति फलितोर्थः वः कालो यस्येति विग्रहइतियं घाख्याख्याताः अतए
वसंज्ञादिविषयसमासे वाक्येन संज्ञानवगमेपि वृत्तिघटकपदस्वरूपबोधनाय समस्यमानपदार्थ
बोधकवाक्यप्रयोगोभवत्येव एवं अनेवाप्यामश्रोवाप्ययः संज्ञायामिति समास इति कैयटाद्युक्तं सं
गच्छते नचैवं वाक्येन संज्ञानवगमादिह नित्यसमास इत्यादिग्रंथासंगतिः वृत्तिसमानार्थकत्वाभावेन।
नित्यत्वव्यवहारात् नचैतादृशानित्यत्वस्य सर्वत्रैव सत्त्वेनाव्यावर्तकत्वं अन्यत्र वृत्त्योभासमानायोर्वृत्तेः
पदार्थयोस्तेषां यथाकथंचिद्वाक्यपिभानमस्तिअत्र तु नतदपीति वैषम्यात् नित्याधिकारीयसमसेतु

प्रा. शे.

477

नेन समासघटकपदानां व्यपेक्षाया अभावस्यैव बोधनात् न वाक्यप्रयोगः तदाहुः अविग्रह इति लौकिक
विग्रहरहित इत्यर्थः एवं च नैकार्थकत्वबोधनं त्विति घटकपदस्य त्वबोधनेन च विग्रहप्रदर्शनस्य फलं
बोध्यं अस्वपदेति समस्यमानयावत्पदाघटितत्वम् इत्यर्थः अतो बहुव्रीह्यादेर्न दुष्टानि त्वम् अलौकिकस्य
विग्रहत्वं तु सादृश्येन तत्तद्व्यस्तपदोच्चारणत्वेन बोध्यं हि त्रा इति वा रूपान्यपदार्थसन्बन्धे पि तस्य प्राधान्यस्या
भाव इति भावः तौ दंतौ ष्ठमिति समाहारस्य प्रधानत्वादिति भावः अनेकेति आदीत्यर्थः हंहोति अनेक
मित्यनुवर्त्तते काचिदिति केचित्तु अन्यतरत्ववानित्यर्थः हि त्र्यन्यतरा इति च बोधः एवं च तत्प्राधान्यमस्त्ये
व एवं चेदं चिन्त्यमित्याहुः द्विरात्रमाद्विपद इत्यर्थकमिदमित्यन्ये X ह्यद्य जातादौ समासविभाजको।
पाधिगणनावश्यकी चेत्तत्राहुः सुपां सुपेति सुपामिति सर्वत्र संबध्यते तिङामिति यावत् कटप्रूः अज
स्रमिति क्वचिचीति वार्त्तिके नमिकं पीति सूत्रे च कठप्रु अजस्रसि इति समस्तानुवादेन तत्रैवानिपातना
ह्यान्तु नासमास इति भावः अपंच नञ्प्रत्ययसंनियोगशिष्ट एवेत्याहुः तिङन्तार्थे क्वतेन सहेति
योगविभागेनात्र समासः स च योगविभागस्येष्टत्वान्नञ्प्रत्ययसंनियोगेनैवेत्यन्ये अत्रेदं चिन्त्यं सुपां
तिङन्तेनैव तिङो सुबन्तेन त्यस्य संग्रहात्वद्वैधत्वं चिन्त्यं पंचविधत्वमेवयुक्तमिति उभयत्रापि सुपू
मिङ्घटितत्वस्याविशिष्टत्वादितिवत्त्रपरमाः अभिधानलक्षणा बोध्या तत्त्र तत्र भाष्ये बहुशोनभि
धानादिसुक्तेरकर्तरि चेति सूत्रे भिधानलक्षणाः कृत्तद्धितसमासा इति भाष्योक्तेश्चेत्याहुः इति सर्व
समासशेषः अथ इति अविभाक्तिकः सौत्रो निर्देश इति भावः अल्लोपाधूरिति अनस्त संबंधिनी या धू

एकवचनांतानीति तथा चैकवचनांतावयवबहुव्रीहावेव नियमं कवित्यर्थः सर्वत्र गणे विभक्तिकोच्चारणसे
व दृष्टत्वेन केषांचित्सविभक्तिकानां पाठस्तद्द्विवचनार्थ इति भावस्तदाह द्विवचनेत्यादीति लक्ष्मीशब्दे नुपा
ठसामर्थ्यात्तत्र घृतशब्देन्यस्यापि नियमः अतएवाकुशामरुशलक्ष्मीर्धेनसेति सिद्धं बहुवचनांतेनविग्रहात्
वहीलक्ष्मीर्यस्येति विग्रहे न घृतं चेति कप्प्रभवत्येव अत्र तत्पाठस्य वितरनिवृत्तिमात्रफलकत्वात्तदु
पन्यास एव युक्ततर इति बोध्यं शेषादिति सूत्रे वं तत्पाठस्य नियमार्थत्वेन तेषामविशेषत्वादिति भावः ए
वं च संख्यावाचिबहुशब्देन लल्यादीनां समासे वैकल्पिकः एवं कप्पूर्वे तुल्यवाचिनां समासे तु नियमानां
विधिमुखेन प्रवृत्तौ उरःप्रभृतिभ्यो निषेधमुखेन प्रवृत्तौ न घृतश्चेति नित्यकि उरस्। सर्पिष्। उपानत्। पुमा
न्। अनड्वान्। पयः। नौ। दधि। मधु। शालि। लक्ष्मीः। अर्थान्नञः। वतनअर्थवतेति सुपथी नगरीत्यत्र तु पु
वोरनाकाविति सूत्रस्थभाष्यप्रामाण्येन समासांतविधेरनित्यत्वात्त कवितिबोध्यं शेषाद्विभाषेति।
यत्तु भाष्ये नैव पेक्षं शेषग्रहणं नापि समासांतापेक्षं किंतर्हि नंतरो यो बहुव्रीह्यधिकारः सोपेक्ष्यते इत्यु
क्ते तत्रापि विवादः समासांतवृत्तिसूत्रेंतग्रहणप्रयोजनकथनावसरे बहुव्रीहिसंज्ञा च प्रयोजनं उद्धधुरो
नीचधुर इति भाष्यविरोधापत्तेः अन्यथा कक्षूरित्यादीनां समासांतरे चरितार्थेन पापरेण कपा बाधाप
त्तिः उपक्रमे समासांतापेक्षया शेषस्यैव भाष्ये उक्तत्वाच्चेति वृत्तिकेपट हरदत्तादपस्तद्दीत्याप्तुदारति
प्रियपथ इति अपरे तु उपक्रमे समानपत उक्तस्यार्थस्य विशेषव्यवस्थापकप्रागुक्तभाष्यादनंतरं बहु
व्रीह्यधिकारापेक्षेपेव शेषत्वविज्ञानमुचितं न च समासांता इति सूत्रस्थभाष्यविरोधः कपो वैकल्पिक
त्वेन तदभावे तत्प्रयोगोपपत्तेः न चात्र पक्षे प्रतिपदोक्तसमासांतानां स्वस्वविषये बाधकत्वेनैवोपपत्तौ

प

प्रा॰शे॰ शेषग्रहणं वैयर्थ्यापत्तिरिति वाच्यं न हि प्रतिपदोक्तत्वमेव बाधकत्वबीजं किं तर्ह्यनवकाशत्वं समासान्ता
श्च कावभावे सावकाशा इति न दोषः स्पष्टं चेदमत्रैव भाष्ये एवं च प्रियपथ इत्यादिविषये पक्षे शिवपथिक इत्यपि भ
वति अत एव बहुव्रीहौ संख्येये डजित्यस्य भिन्नत्वेन पाठः सार्थक इत्युक्तं सूत्र एव भाष्ये ऽनेन बहुव्रीह्यधिकारे त्वनेन रूपद्
मुपात्तं न चैवमपि वक्ष्यत्यूरित्यादेः प्रकृतिविशेषापत्त्वेन समत्वात् न च समासान्तमात्रापेक्षशेषत्वपक्षे ऽन्तः चू
कादेरसिद्धिः कप्रत्ययानुज्ञापनेनैतेषामनित्यत्वमिति वाच्यं उदाहरणपरतज्ज्ञापकस्योपलक्षणत्वात् एवान्त्योमा
त्रे वहेत्यन्वारणाक्यामिति शेषवचनेन संभवदपि तत्साधानं भाष्ये न कृतं तेन च बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः पूर्व
मेव कप्प्रकरपाठेन विशेषविधिभिः परत्वाद्बाधेनैव सिद्धेरानर्थक्यं शेषग्रहणं व्यर्थमू विभाषापत्रपावेत्यादिसूत्रवि
षये पक्षे वापन्नः समन्तुत्रुनुत्क समासान्तो न बहुव्रीहित्वाभावात्रादोषः एतेन वै कल्पिकसमासान्ताभावे कविषये वैक
ल्पिकापवादाभावे उत्सर्गप्रवृत्तेरित्यत्र दृष्टत्वात्त्वनादिकृत्यपत्र्यूनिभाष्यकैयटाभ्यां स्पष्टमुक्तत्वाच्च अन्यपास्तं अ
त एवास्तु न समासान्तो नादितिनोक्तं अत एव संख्याव्ययेति सूत्रे कवभावार्थं चेति भाष्योक्तं संगच्छते त्याहुः यत्तु त
त्र तेनेदमिति सूत्रभाष्ये कावभावार्थं चेदमित्युक्तं यच्च कैयटेन शेषाधिकारो ऽपेक्ष्यते नोपपत्त्यादन्यत्र तिलङ्घ्यमपि।
प्रकृतसूत्रस्थभाष्यविरोधादुपेक्ष्यम् शेषाधिकारेति रूदं बहुव्रीहिप्रकरणे संख्येयेत्यादौ पुनःपुनः कवभावार्थं
चेतिभाष्योक्तेर्लोपने यद्यप्यनेकमिति सूत्रशेषनभिधानाद्यधिकरणानां न समास इति शेषग्रहणं न कार्यं।
मूत्रत्युक्तं एवं च शेषाधिकारस्य बहुव्रीहिरप्रसिद्धः तथापि तदुत्तरभाष्ये एवं च चैतस्मिन्सत्यनभिधानरूत्यादिना। राम॰
संख्येयेत्यादिवेपि तत्समासे भ्यः कप्यापबद्रोकोपायस्यावप्रपकर्तव्यत्वप्रतिपादनादर्कि चित्करं न तु सर्क्षुद्धारि
त शेषग्राह्यान्यमर्थे द्वपलाभ इत्यतन्त्राहंत त्रादिनेति स्त्रादिनात्राव्यत्येकशेषोऽत्रापोऽन्य नकपीत्यतः कपी

त्यनुवर्त्तते न संज्ञायां अनंतरस्येति न्यायात्केषादित्यस्यैवायं निषेधः उरःप्रभृतिभ्यः कप् इत्यादेस्तु संज्ञाविषयेपि प्र
वृत्तिस्तदाह शेषादितीति विश्वदेवइति विश्वेदेवा अस्येति काचित्कोपपाठः ईयसश्च न संज्ञे यसोरिति वक्तव्ये यो
गविभागसामर्थ्याद्व्यवहितस्याप्ययं निषेध इत्याशयेनाह न कविति बहुव्रीहौ न पुंवदिति वचनमर्थवत्तः प
ठति बहुव्रीहौ नेति अत्र यद्वक्तव्यं तदग्रे नपुंसकश्लोपे वक्ष्यते बहुश्रेयसीति लिंगविशिष्टपरिभाषया निषेधः
न घृतस्वेति नित्यं शाम्रेः कप् अभिवादनस्तुतिन्नियोभयार्थकवदिधातुनोभयसाधारण्यं जालस्य तत्र
भिप्रेत्याह प्रज्ञितइति एतेन वंदितः स्तुत इति रघुटीकाव्याख्यानात् स्तुत्यर्थकस्यैव ग्रहणं तेनाभिवंदितश्चा
त्त करत्यत्र कविति हरदत्तोक्तिश्च परास्ता स्वश्चानेति न घृतश्चेति कप् शाम्नः बहुनाशिरिति उपसर्जनह्रस्व
स्त्रीप्रत्ययांतत्वाभावादिति अथ विहस्तः इत्येते त्रिभ्यईरित्यौणादिकत्वादिति भावः त्वृडिति शृष्यतेऽस्यामित्य
धिकरणे इति भावः समानवाच्येति समासेत्वानं वयन क्रियायस्येत्यर्थः कंठेकाल इति कंठ इत्यस्य का
रकत्वात्कर्त्रेहारकसंबंधेनान्तिक्रियायामन्वयेन यथाकथंचित्सामर्थ्यमादाय समासप्रवृत्तिः अ
त्र वैयधिकरण्येपि ज्ञापकात्समास इति बोध्यं ध्वनितं चेदं वर्णोनेत्यत्र भाष्ये नन्वत्र विशेषणत्वेनैव सि
द्धे नचचित्रग्वादौ सामानाधिकरण्ये चरितार्थं शास्त्रमत्र न प्रवर्त्तेत न अस्य क्रियाविशेषणत्वेपि कालावि
शेषणत्वादितिवाच्यं तावतापि विशेषणत्वात्तनेः नह्यत्र परपदार्थविशेषणत्वमेवात्र निर्दिष्टमित्यत्र
मानमस्ति कालीदेशव्यावर्त्तकतयोत्तरपदार्थविशेषणत्वस्याप्यक्षतेः अन्यपदार्थविशेषणत्वं तद्व्या
वर्त्तकत्वात्र गृह्यते इति चेन्न असामर्थ्यवैयधिकरण्ये च समासज्ञापनार्थं सप्तमीपदस्यावश्यकत्वात् य
त्तु सप्तमीग्रहणसामर्थ्येन विशेषणपदस्य परिच्छेदकमात्रपरत्वं एवं पदाकंठे किंचिदस्तीति निर्देशे तेका

शा०शे

464

ल इति प्रयुक्त्येतेन दान्तस्यापि विशेषणत्वेन पूर्वनिपातवारणायेदमिति तिलत्रयपदाऽस्याभिन्नाः सन्तीति निर्णीतं तेन नम
रिकेदाय च गाव इति प्रयुक्तं तदा गोभिन्नद्रव्यस्याप्याप्तेः केचित्तु प्रागुक्तरीत्याऽसामर्थ्येऽपि समासप्रवृत्तिज्ञाप
नार्थं सप्तमीग्रहणस्यावश्यकत्वमित्याहुः चित्रगुरिति यद्यपीह उपसर्जनं पूर्वमिति सिद्धं तथाप्यन्यपदार्थापे
क्षयोभयोरपि अप्रधानत्वादनियमे प्राप्ते विशेषणग्रहणं न तु सामार्थ्याच्च प्रकृतेन सूत्रेउत्तरपदार्थविशेष
णत्वमेव गृह्यते इति न दोषः प्रथमानिर्दिष्टमिति सूत्रे हि समासशास्त्रे प्रथमानिर्दिष्टं सति संभवे प्रत्यासत्त्
त्या तत्समासार्थं प्रत्ययप्रधानं तदुपसर्जनमित्येव लभ्यते न तूत्तरपदार्थनिरूपितं न तु बहुव्रीहौ सप्तमीत्युक्ते
तज्ञकौण्डिन्यन्यायेनोपसर्जनं पूर्वं तं बाध्येतातो विशेषणग्रहणमिति सर्वनामसंख्ययोरिति एतत्तु प्रभृती
।प्रायो विशेषणत्वेन गतार्थानि हस्तादद्दिणः इत्यत्र तु षष्ठीस्थाने इति सूत्रस्य भाष्यप्रयोगात् राजदन्तादित्वा
द्वा परनिपातः एतेन वन्येनरा इति व्याख्यानं एवं जहत्स्वार्थावृत्तिरित्यपि जहत्स्वं पदं यस्य स जहत्स्वः
सोऽर्थो यस्येति बहुव्रीहिगर्भो बहुव्रीहिर्जहति स्वार्थं पदानि यत्रेत्यन्ये केचित्तु तपर इत्यादिनिर्देशादस्यानि
त्यत्वमाहुः ।। सर्वश्वेत इति वचनसामर्थ्यान्न भूतपूर्वगत्या सर्वादेः सर्वनामत्वं बोध्यमिति द्योतयोरिति अत एव
वार्त्तिके त्यादोऽपि संख्याशब्दस्य पूर्वनिपातो न कृत इत्याहुः संख्याया इति संख्यावाचकयोः परस्परं समा
सेऽल्पार्थवाचिकाया इत्यर्थः न चास्याल्पान्तरमिति सूत्रेऽप संख्यातत्वेन द्वंद्वविषयमेवेदमिति वाच्यं ।
।संख्ययाव्ययासन्नेति सूत्रे हि द्वास्त्रिचतुरा इत्यादिभाष्यप्रयोगात् तदस्मिन्नधिकमिति सूत्रे सहस्राणां
शतमित्यर्थेऽपि शतसहस्रमिति भाष्यप्रयोगाच्च अन्यथा बाणनाग्नौ त्रिशब्दस्य परत्वेन शब्दपरविप्रति
षेधात् द्व्यादीनामेव पूर्वनिपातापत्तेः मध्यमपदलोपितत्पुरुषेप्येकादशद्वादशेत्येव प्रयोगस्वीकाराच्च

नहि कर्मकत्वे पि ग्रामं ग्रामं नयतीत्यादौ न चकारप्रयोगो नापि समासः एकधर्मावच्छिन्नेन्वयाभावात् सूत्र।
साहित्यविशेषणं साहित्यं च खदिरकर्मकं छेदनमिति बोधः एतदर्थ एवात्रैकार्थीभावः समूह इति तिरो
हितावयवभेदः समूह इत्यर्थः अयमेवात्र विशेषः एवं च तु इतावयवभेदः समूह इति विशेष इत्येव
साहित्यं विशेषणमिति व्यवहारः साहित्यमेव च समूह इत्याहुः अत एव प्राण्यंगसमाहारद्वंद्व गभेया
ति पादद्वंद्वे तोऽपि विनिर्द्वंद्वे द्वंद्वश्च प्राणीति नियमेन प्रवर्त्तते पूर्वोत्तरपदयोः प्राण्यंगसमाहारार्थेत्वेपि
प्राण्यंगार्थत्वाभावादित्याहुः अत्राद्ययोर्न समासः अनेकसुबन्तानां चार्थेत्वभावेनैकार्थीभावरूप
सामर्थ्याभावात् किंच चेद्वंद्वद्वंद्व इत्येव पदानां चकारे इत्यभावान्न दर्शनलक्षस्त्वेर्थे ग्रहणसामर्थ्यात् कस्मा
र्थग्रहणं कृत्वा त्वं च कृत्स्न समस्यमानपदार्थान्वयिबोधकत्वमेव तत्त्वं न पोरेवेति न दोषः यत्तु केय
द्भिरेकक्रियान्वयित्वरूपं सामर्थ्यं दध्योदनादिवदत्रास्त्येवेत्युक्तं तन्न हि तत्तः सर्वो मुक्तिकयेत्यादौ समा
सापत्तेः अन्वाचयेत्वेदुक्तसामर्थ्यसामर्थ्यस्याप्यभावाच्च किं च तयोः साक्षादेकार्थीभावसामर्थ्यं च।
रितार्थस्य शास्त्रस्य बहिरंगक्रियाघटितसामर्थ्येऽप्रवृत्तेरित्याहुः किं च बहुव्रीहिघटकपदानां कर्मार्थ
नभावेनैवद्वंद्वघटकपदानां चार्थैर्भावेनैकार्थीभावस्याव्यपकः समर्थरति परिभाषणात् चार्थे द्वंद्व
नभो इत्युक्तेश्च अत एव चार्थस्य द्वंद्वे नोक्तत्वात्स्वशब्दस्याप्रयोगः एवं च समासे समुच्चयपादे रक्तिसंभवोपि ना+
पुष्पवंतावित्यादावविवेकशक्तिविषयणां समप्रधानानां परस्परं विहायेतरान्वयस्यायोगत्वात् अत्र स
मप्राधान्यं परस्परविशेषणत्वमेव अत एव राजपुरुषप्रयोगेत्यादौ न तथान्वय इति दिक् ननु नीलोत्प
लमित्यादौ नीलं च तदुत्पलं चेति च शब्दान्तर्भावेण विग्रहदर्शनाच्चार्थान्तर्भावेनैकार्थीभावसत्वेन

द्वंद्वोऽदुर्वारः तत्र हि साहित्यं चार्थः एवं च नीलमिन्नं नीलत्वसहितोत्पलत्ववदुत्पलमिति बोधः अत एव पाठ
कतादशायां पाचकत्वाभाववति न पाचकपाठक इति प्रयोगः साहित्यस्यैककालिकत्वादिसमनियतत्वा
दिसमनियतत्वाल्लु इति चेन्न सामानाधिकरण्येन विशेषविहितया विशेषणं विशेष्येणेति तदनुरूपसंत
पावाधात् प्रधानाप्रधानयोरिति न्यायेन चार्थस्य समासघटकपदबोध्यप्रधानार्थान्वये एवं द्वंद्व प्रवृत्तेश्च
इदमेवाभिप्रेत्य पदार्थभेदे द्वंद्वः पदार्थतावच्छेदकभेदे कर्मधारय इति प्रवादः एवं चात्र चार्थांतर्भावेण।
कार्थीभावे सूत्रादेस्तात्पर्यग्राहकस्याभावात् नीलाभिन्नमुत्पलमित्येव बोधः नाधिकरणेन तत्र विभि
गमनाविरहाद्देशघटिते कालघटिते च सामानाधिकरण्यं गृह्यते नोऽन्त प्रागुक्तप्रयोगः एतदर्थमेव
कर्मधारयविग्रहे च प्राक् प्रयोगः देशघटितसामानाधिकरण्यविवक्षायां बोधनाय सर्वं नाम प्रयोगः
कर्मधारयसंज्ञया ताध इति तु नयुक्तं तस्या एकसंज्ञाधिकारबहिर्भूतत्वात् सामानाधिकरण्या
विवक्षायां तु द्वंद्व इष्टापत्तिरेवेति दिक् न चैवं शिवरामयोरभेद इत्यत्राशंसासंभावनयोरविशेष इति भा
ष्यप्रयोगे च नीलघटयोरैक्यमित्यत्र द्वंद्वानापत्तिः सामानाधिकरण्याच्चेति वाच्यं एकपदान्वये सा
मानाधिकरण्यस्य प्रतीतावपि द्वंद्व इप पदसंस्कारवेलायां तदविवक्षणात् पदार्थभेदस्य विवक्षा
च्च विवक्षैव वचनत्रतत्र साधुत्वे बीजं न च त्यदादीनि सर्वैरिति सूत्रे सामान्यविशेषवाचिनोर्न द्वंद्व इति भा
ष्य पठितत्वेन कथं द्वंद्व इति वाच्यं प्राच्यभरतेष्विति निर्देशेन तस्यानित्यत्वात् अत एवाशंसासंभावन।
योरविशेष इति भाष्यवार्त्तिकादिप्रयोगाऽसंगच्छते अत एव गोबलीवर्दमित्यादि सिद्धिः बलीवर्द।
समभिव्याहारात् स्त्रीणामेव गोपदेन बोध इत्यनन्तत्वेव भाष्यम् अन्यथा रीत्या विशेषपरत्वात् ।

रित्यर्थः संबंधिनोधिकरणत्वविवक्षया सप्तमी सूत्रे इति बोध्यं तदंतस्येति न द्वाचकधूः शब्दांतस्येत्य
र्थः अत्रे पूर्वपदे धुरोनान्तेसमासार्थेन इति वा न व्याख्यातं दृढधूरक्षः अक्षधूरित्युभयासिध्या पत्ते
रित्याहुः अर्धर्चे इति अर्धर्चाः इति पुंस्त्वं अध्येतर्य्येवेति न त्वाम्नचो न ध्येतरीति बोध्यं अध्येतरीत्यस्या
नन्वयात् अध्यापनं चोपाधितन्त्वादृक्संबंधेव अनध्यवगोष्पदं सेवितासेवितेत्यत्र सेवितेनत्रूवं
गोष्पद शब्द उदाहृयते अत एवान्नृचो माणवक इत्थं बोध्येतरीति द्विपाद्बिभावेति सूत्र स्य भाष्येण ।
न विरोध इत्याहुः अनक्सामेति अनुक्सममासांतत्वात्त्वदेकवपि अनृक्साम वक्क्सं सूक्तमिति
विद्धनुरमिति यद्यप्येदंतनुरशब्देन समासे पत्वं सिद्धं तथापि विद्धनूरिति प्रयोग निरत्यर्थे सूत्रे पूर्वे हलं
कृतसमासांतस्येति येन विधिरिति सूत्रस्थाप्यस्ति इष्टं नीति भाष्यप्रयोगादिति भावः अंतरीपमिति अंत
र्गताः पुनिहला संगताश्चापोयस्मिन्निति विग्रहः अंतःशब्देन सप्तम्यंतो इति सप्तमी समासो वा उपस
र्गग्रहणं प्राधपलक्षणमिति गतिश्चेत्यत्र भाष्ये स्फुटं समापइति पुंस्त्वं लोकात् देवयजनं देवा इज्यंते ऽस्मि
न्निति व्युत्पत्त्यायत्रभः भाष्येन समापं नाम देवयजनमिति पाठो दृश्यते समास इति तथा चानुपसर्गत्वा
त्रत्वमिति भावः समापईत्वे प्रतिषेधवचनारंभवादिमते दीर्घोर्थं यत्नांतरमास्थेयमिति गोरवं स्यादिति न
इतुनादिति समासांताभावः अवर्णांतादेति ह्यांतरिति सूत्रे ईत्वनवर्णांतादन्तकव्यं प्राग्यपरायं उपसर्गादतीति
सूत्रे शेषं परेयमिति भाष्यान्ते सूद्वंलभ्यते ऊदनो दीर्घोच्चारणमवग्रहार्थमिति भाष्यकृतः वह्वचेस्त्वनूपेगा।
मानित्यादौ नावगृह्यते अनुगता आपो ऽस्मिन्निति अनूपो देशः जलप्रायमनूपं स्यादित्यमरः प्रतिस
मादिषु अव्ययीभाव प्रादिसमास बहुव्रीहिषु न्यायतः कृतसमासादिषु बहुव्रीहिः कृतोदक पांडिनीसं।

478

ख्याप्या इति च भाष्ये क्वास्तीति वहुदर्शिनो विचारयंतु भधातोर्माथवर्यं येन्तु श्लोकवार्त्तिकमित्युक्तं द्विगोलु
गित्यत्रेवैयट नतु पंचनदं इमिति प्रतीमुपादाय कृष्णोदकपांडु संख्या इत्यंगाया इति सूत्रमित्युक्तं संख्याया इति
इदं च नदीभिश्चेति सूत्रविहितसमास एवेति नदीभिश्चेति सूत्रभाष्य ध्वनिः योगविभागादितीत्यत्र नु एवं विधे
पस्य पूर्वनिर्देशः तेन दीर्घरात्रादिसिद्धिः पद्मनाभ इति पद्माकारा नाभिर्यस्येति गोलपद्मशब्देन समा
नाधिकरणबहुव्रीहिः यद्वा पद्मं नाभौ यस्येति समासे गड्वादित्वात् सप्तम्याः परनिपातः एवमूर्णनाभोपि
नत्र ड्यापोः संज्ञाछंदसोरिति ह्रस्वो विशेषः अत्पणः करणाल्पुडं तदर्शनशब्दो योगरूढिभपाव्याख्यानाद्वा
चक्षुः पर्यायं तत्पर्युदासेऽपि सदृशग्राह्य इत्येभिन्न सप्रेह्य ग्रहणमित्याशयेनाह गवामक्षीव तिगावो त्र किरणाः गवा
क्षो अक्षि सदृशस्य ध्वनिपात्यत इति तत्फलं च समासविशेषनियमः ष्टित्तोपाद्धिकं चेत्याह अक्षाश्चाश्चा इति तेन
नञ्न्लुकषेऽ चक्षार इत्येवेति भावः अविद्यमानानीति अग्रहणानीति विग्रह इति भाष्यस्वरसः त्रिचतुरा इति
संख्ययाव्ययेति बहुव्रीहिः डचोपवादोयं धेन्वनडुहादिति समाहारे तु द्वंद्वाच्चुदषहान्तादिति टचेव सिद्धमिति भावः
क्वचित्तु धेन्वनडुहमिति पाठः स तु प्रतिपदोक्तत्वान्न त्रापि नेनैवान्नित्वमिति पुल्लेत्याह अक्षिभ्रुवमिति प्राण्यंग
गत्वादेकवद्भावः ऊर्वष्ठीवमिति सक्थ्यत्रीवे पुमानूरुरित्यमरः जानूरुपर्वाष्ठीवदस्त्रियामिति च द्वंद्वो निपा
त्यत इति चित्रणामयी त्यकशेषं वाधित्वेति भावः सरजसमिति अव्ययीभावेनेति सहरजसा सरजः पंक
जमिति सरजसमयहा यव्केतकीनां प्रसवमिति तु पुल्लिंग पुष्पवाचि प्रसव विशेषणत्वेन द्वितीयांतसाधु पदं
तु न हाविप्रसव शब्दस्वस्वतः सकत्वमेव न दाषमादइति वोध्यं सरजसमरं दुर्निर्भरास्थितिनु प्रमाद एवेति वोध्यं
निष्कुलमिति निष्कालः श्रेयस इति विग्रहेपि निः श्रेयसमद्यत्यपेतदाह नलुकदपवेति निःश्रेयानि ति वहुव्री

वद्यमाणयोग
सिद्धमित्युक्तो
क्तिरितितुलं

हिः कस्तुनरेयसमुक्तिनिषेधात्तत्पुरुषस्येति निषष्ठीसमासादीएवेदं श्रुतमितिस्त्रव्ययीभावएवेदं गोष्ठेसप्तमीतत्पु रति
रुषएवेदं तेनषष्ठीतत्पुरुषेगोष्ठस्युत्वेवद्रश्रवर्चसमित्यादौषष्ठीतत्पुरुषेब्रह्मवर्चोदीप्तिः पल्येति पल्योमासभो
जीस्त्रवलमसमित्यादि अवहीनं संततं चतनमद्यइतिविग्रहः संततं सवं नोऽयाऽश्रंयपतीनिश्चेधदस्युपघातेत्यु
णादिः अंधंगाढं वसुघारइति एतेनावसीयइति परच्छेदः अवसाद्भावादीयसनित्यपास्तं तथात्वश्रूप
तेयः कामयेतवसीयान्स्यामिति उत्तरपदार्थप्रशंसामिति कर्मधारयः श्रेयःशब्दोपिप्रशस्तार्थएव आशी
र्विषयमिति षष्ठीतत्पुरुषः विषयशब्दस्याजहल्लिंगत्वात्पुल्लिंगनिर्देशः एतेनतद्धितेविषयं अन्यत्रतत्
कालवाचेवएवंचाशीर्विषयताद्योतकोयं तेनाशीर्लिङ् तथयोगएवास्यसाधुत्वं बोध्यं एतच्चरमेसव्यःश्वः
शब्दोनिरर्थकएवउत्तरपदार्थमात्रवृत्तित्वादित्यन्येत स्वरहासमितिरहस्यप्रकाराम्युच्यतेनप्तमिवतमेप
रेणानाधिगम्यं हि मङ्गहोवक्ति नस्ववत्नतन्नेचनरहस्येनितन्नप्ररहसंविदुः पूर्वयोरनुगतमवहीनं चरहइति
प्रादिसमासः तादृग्रहो यस्मिन्निति बहुव्रीहिर्वाएतेन सप्तमीस्यादित्यस्यसप्तम्यर्थः सप्तमीस्यात्लिप
त्तिगतमुरः प्रत्युरः अनुगतमा अनुशब्दात्प्रत्ययविधानेनैवसिद्धेनिपातनं प्रसिद्ध्युपसंग्रहार्थं तेनानुगोभिर्वा
ह्येएवभवति वाह्येचगवांलहृणत्वंमिर्विद्भमेवेति यस्यचायामइतिसमासः दीर्घत्वइति गोचरन्निर्देघेसरु
शदेर्घ्यवघानमितिबोधः द्विस्तावा समाभिव्याहृतमवत्यादिक्रियाभावत्त्रोषुववेदपदंचवेयवपवपरंस्र
तोऽसामर्थ्यात्समासप्राप्नेराह समासस्तुनिपात्यतेइति द्विस्तावत्त्रिस्तावातीस्पर्धसृचुद्धिसावज्ञादशाहिर्देशइति
वत् आवर्त्तिक्रियात्मगणनेति तत्रसुचसमासनिपातनस्यफलमाह यावतीश्रचतावितिएवंरीत्यासुचः
साधुत्वेचतावक्कद्रुसमभिव्याहृतहि त्रिप्यामेवस्त्रप्रामात्यान तेनहिगुलोघटइत्यर्थेद्विर्घटइतिनापाद्य

श्रा॰ शे॰ मित्याह: दिस्तावोऽग्निरिति नवेदीस्थले नौपचारिकं बोध्यं प्रत्युदाहरणे दिस्तावती तिमित्रे पदे उपसर्गात्
त्र धुर्शब्दस्य क्रियावाचित्वात् उपसर्गादिति प्राप्तफलं ग्रहणं इत्यत: प्रागिति प्राग्वद्बहुव्रीहियहणं कर्तव्य
मिति भाष्योक्तेरिति भाव: बहुव्रीहौ सख्येय इत्यत: प्राक् समासान्तविधेरभावात् अस्यैव तत्र ग्रहणमि
479 त्याहु: तेन स्त्रीश्रीमूर्धाप्रमूर्धानित्यादि सिद्धं किमर्थं लोप इति पदोक्तत्वात् किं लोप इति समासस्यैवात्र ग्रहणात् लोप
इति बाध्योमिति भाष्यवार्त: किंवादिति किमत्र प्रश्ने कर्मधारय: षष्ठीसमासो वा नञ्ग्रहणात् नञ इति पंचमी
नञ: परं यत्पदं तदन्तात्तत्पुरुषादित्यर्थ: यद्वा षष्ठी नञवयवकादित्यर्थ: अपथमिति नञस्तत्पुरुष इति टिलोप: अ
पथं नपुंसकमिति क्लीवत्वं च यथ्यं वर्तते इति अर्थाभावे अव्ययीभाव: अक्ष्यवृत्तिरिति नित्यसमासान्त: इति स
कलसमाससाधारणा: समासान्ता: उत्तरपदे इति स च समासावयवरूप एवेह गृह्यते तेन यौगिक: पदेर
त्यव सिद्धे उत्तरग्रहणात् तेन हेत्रे सामस्ति इह नीत्यादावीदग्नेरिति इत्वं न इहोत्तरपदाधिकारे उसिद्धपर
परिभाषा नोपतिष्ठत इति इच एकाच इति सूत्रे भाष्ये स्पष्टं अयं च न विधि: पंचम्या स्तोकादिभ्य इत्याद्यारं
भसामर्थ्यात् न च तानि नियमार्थानि नियमविधिसंभवे विधेरेवन्याय्यत्वात् नदाह अधिकार इति अलु
कस्यादिति प्रसज्यप्रतिषेधो ये पर्युदासेपि अलुग्विधानसामर्थ्यादेव नाप्राप्तिन्यायेन लुको बाध इत्यन्ये
स्तोकान्मुक्त इति वृत्तावभेदैकत्वसंख्याया औत्सर्गिकत्वादेकवचनान्तेनैव समास: प्रकरणादिना द्वित्वा
द्यवगतावपि द्विवचनान्तादिभिर्न समास: अनभिधानादिति भाष्यवार्त: अत्र समासफलमेकपद्यादि
विशेषणानन्वयादि च किंच स्तोकान्मुक्तस्यापत्यं स्तोकान्मुक्तिरिति विशिष्टान्न द्धित: नन्वत्र समा
सनिमित्तप्रातिपदिकत्वनिमित्त लुकोन्तरंगत्वादेनाप्राप्तिन्यायाच्च निरवकाशत्वादपि तद्धितान्तनिमित्त

त्रिभिन्न लुकोनिवारणे मानाभाव इति चेन्न निषेधास्त्रवलीयांस इति न्यायेन तस्यापि बाधात् किंच सुपो धातुप्रा।
तिपदिकयोर्लुक उत्तरपदे इत्यनु सिद्धवद्भावात् तिबुसत्वम्याः स्थैव भाषायां हलदंतात् संज्ञायां कारनाम्नि चामध्यात्
गुरौ अमूर्धमस्तकात् स्वांगे च १ तत्पुरुषे कृति ३ प्रावृट्शरत्काल दिवा भाषावटघकालतः शयवास २ पंचम्याः स्तोका
ऽऽनः सू मनसः से २ आन्महाउ आत्मनश्च वैयाकरणाख्यायां परस्य च षष्ठ्या आक्रोशे इति पाठेनैव सिद्धे अस्य संनिहित
द्वितीयाध्यायेऽलुकपदघटितगुरुभूतन्यासेन लुक्मात्रनिवृत्तिबोधनात् एवं च स्तोकान्मुक्तीपनीत्यादौ धा
तुवत्वप्रयुक्तोपि लुक् एतेन सुपो धातुप्रातिपदिकयोः अव्ययात् आप इति न्यासेनैव सिद्धे ऽव्ययाद्वाप्सुप इति
सूत्रे ग्रहणं व्यर्थमित्यपास्तम् अव्ययादिति सूत्रेणत्वन्यर्थे सुपो धात्वित्यस्य न त्र पाठाव [illegible] कल्पे ऽलुगादेवे
यर्थ्यो नापन्नात्वृत्तार्थसिद्धेः इह चोत्तरपदाति [illegible] समासः प्रतिपदोक्तत्वात् स्तोकांतिकदूरार्थ इत्येव गृह्यते ए
वं च तत्र सूत्र पठितानामेव स्तोकादीनां ग्रहणं न कारणे च स्तोकाल्पे इति सूत्रपठितानामित्याशयेनाह एवं मं
तिकेत्यादि अपगीतमंत्रसाध्य गुणिनि [illegible] गुणाभिधानं स्तोत्रं अपगीतमंत्रसाध्यं तकस्त्रमिति याज्ञिकव्यवहा
रः पंचमीचेयं द्वितीयार्थे ऽस्मादेव निपातनात् समासोपि तदाह [illegible] णीति केचित्तु [illegible] दाहुः [illegible] स
तीति ल्यपलोपे पंचमीयमित्याहुः स्पष्टे चेदं पदद्वयमपि भाष्ये ओजसाकृतमिति करणे कृते नेति समा।
सः सततनेत्यनमोरतमितितु घञर्थे कविधानं [illegible] षष्ठीसमासे न ततः सतत [illegible]
नवकुव्रीहौ साधुः परत्वोऽनः प्रभृतीनामुत्तरपदाहिति प्रपूर्वे विभाष्यत्वमेवेति तदंतपूर्वपदे [illegible] तिनानत्रिया।
मार्थ्यमेव पदांगाधिकार इत्यस्यारंभात् न त्वत्र पदाधिकार [illegible] नोत्तरपदाकारे विभाष्ये पक्षे एकचित्वमि
ति तदुहारणान् अपरेत्वनदंतारंभे पि पादस्य पदेति सूत्रे एणादिग्यपादोपहतमित्यादौ पदे त्यादेशवारण

480

यविशेषणत्वविरोधाभाववैपरीत्यस्यात्र सूत्रभाष्य एवाश्रयणे नात्रापि तथाश्रयणे बाधकाभाव इत्याहुः । पुं
मानुत्रय इति यस्य प्रमानयत्नः सर्वसाहेतुनानुत्रयमिति ग्रन्थः । ननु आधय इति ननु ज्ञने न[illegible] नन्मानीत्यमरः । आ
त्मनेपद इदं वार्तिकं यत्तापि नित्यमात्मनेपदं पूरणे आत्मनेपदं पूरणे उपसंख्यानं कर्तव्यमिति भाष्यात् । नचैवं वैया
करणानामिति सूत्रे आत्मने इत्यनुवृत्तिर्न लभ्येतेति वाच्यं सोपदादावित्यत्रोपसंख्यानकाम्ये रोरित्यस्येणः
प इत्यत्रानुवृत्तिरिवात्रापि वार्तिके दृष्टानुवृत्तिसंभवात् परस्य चेति सूत्रमेवास्य वार्तिकस्य ज्ञापकं स्पष्टं चेदं
पदमेजयादौ केचित्तु आत्मनेपदेति सूत्रे आत्मज्ञापिनि चेत्यनुवृत्तिपदप्रीना चे भाष्ये सूत्रे हृदयं धृतं आत्मनात्रा
पीति सिध्यर्थं अत एवात्मनेपदेत्यत्र चकारः सार्थकः कार्तिकव्याख्यानं भाष्ये आत्मनेपदेतु ज्ञे एवसत्त्व वार्ति
कस्याज्ञापिनि चेत्येतत्साधारणत्वभ्रमव्यावृत्तये पूरणे इत्येव वार्तिकं अत एव परस्य चेति सूत्रे स्याक्ति
संभवोपि न च तदभावे तेभ्यो हिता सत्त्वहिता इत्यत्राप्यनुगापत्तिः निपातनात्सिद्धेरित्याहुः । तन्मताव।
छंभेनात्रत्यं मूलमिति दिक् पूरणे इति वार्तिकेस्य रितत्व यति ज्ञावत्वात्तद्धिका विहितप्रत्ययग्रहणं नस्व
नृणय ग्रहणं यथात्र पदाधिकारे तदं नाय ग्रहणं हृदयस्य हृल्लेखेत्यत्र ज्ञापयिष्यते तथापीहात्मनपदात्पूर
णे प्रत्ययासंभवेन तदंतग्रहणमित्याह पूरणप्रत्ययांत इति आत्मनापंचम इति हेतौ तृतीया पंचमस्या
दित्याहा सत्पुरुषेति समासः बहुव्रीहिरिति एकस्याप्यात्मत्वेन समस्यमानपदार्थेनान्वनार्दनत्वेना।
नान्यपदार्थे मानविरुद्धेति भावः वैयाकरणा व्याकरणे भवा वैयाकरणी त्ररगणनादित्वादण् सा चावा
च्येति समासः आत्मनेभाषा इति यद्यपीयमात्व्योर्धाद्याधायांनरइष्टा तथापि वैयाकरणीभवत्वेव
धातुसूत्रगणोणादिवाक्यपात्मकं पंचप्रस्थानं व्याकरणमिति स्वीकारात् । अस्याप्यधातुपाठे दृष्टत्वा

न् योगविभागेनेति अत एवालुग्विधिसार्थक्यं एतेन प्रकृतिविकृतिभावविरहाद्बहुव्रीहिसमासो दुर्लभ इत्यास्तं
गविष्ठिरः स्थिरशब्दः ओणादिकः किरच्प्रत्ययान्तः साम्यदायाद्योरिति निषेधे प्राप्ते इदं सूत्रं तरंगामपीति न्यायेनावा
दिनः पूर्वेणलुकि प्राप्ते आह हलदन्तादित्यस्याः प्राप्तेराह वचनादेवेति हृदिस्पृगिति ग्रामेगकलीतिवत्कर्मण्येऽधिकर
णत्वविवक्षायां सप्तमी भाष्ये तु कर्मण्येव सप्तमीत्युक्तं अलुग्विधिरेव ज्ञापकः इति तदाशयः इदमेव युक्तं
विनाधिकरणत्वं कर्मत्वासंभवात् विना च कर्मत्वं अधिकरणत्वासंभवात् ईदृशे विषये कर्मसंज्ञाया अधिक
रणसंज्ञाबाधकत्वात् अत एवाकडारसूत्रे भाष्ये उक्तं अधिकरणसंज्ञां कर्मसंज्ञा बाधते गेहं प्रविशतीति
एतेनात्रामूर्धन्यत्तकादित्येव सिद्धमित्यपास्तं विभक्तिज्ञापनार्थमावश्यकत्वात् तत्र संज्ञायामित्यनुव
र्तेऽप्यकारि नाम्निं वामग्रहणं स्पष्टार्थं संज्ञायामित्यनुवृत्त्यैव सिद्धेः कारनाम्नि चेति प्राग्देशनाम्नि चान्का
रनाम्नि चेति इदं इत्यनुसारेण भाष्ये त्वयं नियमो नोक्तः अप्याहितन्यायादेः संज्ञात्वमेवनेति तदाशयः अवि
कटेति अविशब्दात्संघाते कटच् उरणो मेषः न घामिति गवां नरफक्कारेण तन्कालिकहोतृः कारः इत्यर्थः
वणिग्भ्यः पशुपालेभ्यः कर्षकेभ्यश्च राजग्राह्यो भागः करः स एव कारः प्रज्ञाद्यणिति बोध्यं हलादाविन्यादि
ग्रहणं स्पष्टार्थं तत्र पथ्यध्यादय उदग्देशेऽकारतः हलेद्विपदिकादयः प्राग्देशे अविकटोरणादयः प्राग्देशस्तु
कुनेति अत एव प्राचामेवेत्यनेनाविकटोरणव्यावृत्तिर्भाष्ये दर्शिता प्राग्देशीय एवायःकारस्तत्रैवालुगिति ।
तद्भावः यद्यप्यत्रापि संज्ञायामित्यनुवर्त्तते अत एव तुल्यास्य सूत्रे भाष्ये भाष्यप्रयत्न इति विद्यते अलुक्
कृतावंघ इति घञन्तसमूहस्ते वंध इति तन्मुरूपेऽते नि सिद्धेति परं निषेधाच्च बलीयांस इति न्यायेन बली
यांसं च घञन्ते विभाषेति निषेधं बाधित्वा येनना प्राप्तिन्यायेन नेदमेव तथा च भाष्ये तन्मुरूपे स्तीति ।

प्राप्नेनेति सिद्धेति प्रतिषेधस्यारभ्यते तस्मिंश्चित्वं प्राप्ने इयं विभाषाऽऽरभ्यते इति यज्ञे ते विभाषाऽस्य त्र प्रति
षेध इति च स्वांगादि चात्र संबध्यते नेन चक्रे व धस्य क्तवं धरात्यादि सिद्धं उक्तरस्त्र स्य तत्पुरुषपदस्य विही
यकरुषत इति तद्भावः बहुव्रीहावप्यस्य प्रवृत्तिं स्वीकुर्वतां तत्पुरुषे पूर्वविप्रतिषेधेनास्य निषेध
बाधकता स्वीकुर्वतां इति कारादीनां मास्त्वयं श्चित्व इति बोध्यं तत्पुरुषे कृति बहुलं ग्रहणे नैव सिद्धत्वा
द्बलदं तादि त्यत्र इति र्वेथेति ध्वनयन्नुदाहरति कुरुचरइति एवं मद्रचरो पि बोध्यः अत एव गोपुचर इ
ति सिद्धं न चैवं तत्पुरुष इति व्यर्थं प्राविट्प्रारत कालेत्यादिवत्सुप्यं चार्थत्वादिति दिक् विभाषा वर्षे लिंगवि
शिष्टग्रहणात् हर्षा स्तुतो पि स्यत् चेदमलुगुत्तर इति सूत्रे भाष्ये अकालयपात्रेतनतरतमो काले तिस्व
रूपग्रहणात्तु ततः सप्तम्यर्थ लो पूर्वो द्वेतरे इति प्रकृत्यर्थ प्रकर्षविवक्षायां द्वयप्रकर्ष सत्वादाम्र इ
तः अत्रापि हलादंतादि तिव ततत्स्यात्कुः ध्वनितं चेदं सायंचिरमित्यत्र भाष्ये तत्रत्य भाष्य प्रामाण्यादेवा
त्र इति कारो क्तो विकल्पानुवृत्तिं श्चित्व इति तत्रैव निरूपयिष्यामः अपनाय इति दिगादित्वाद्यत्यो गुरो रु
यत्वत्र यत्नस्थाने जं पठंति तदाकरविरुद्धं अपतु मंता विति यथाधुनिक भाष्य पुस्तकेषु हलो नंतरा
इति सूत्रे हरिग्रंथे च मतिषिति पाठोप्यमतिरित्युदाहरणं चदृष्यते तथापि सोपपाठः हरदत्तादिग्रं
थविरोधात् कारीयो माइप भागयो रष्वग्रेसपिष्ठवसुपस्तुमेसोमोऽब्रवीदित्यनुवावेपनत्रत्रावास्तुप्रा
नु दोस्ति न च मंत्रग्रहणमपि व्यर्थम् प्रकृतिवदित्यतिदेशस्यानित्यतामाश्रित्य प्रत्ययमांतत्वनिमि
त्तकमनुत्वविकल्पको मे प्राप्ने रेव बलुं शाकत्यादिति वाच्यं तत्प्रायणतदनित्यत्वपोक्षेपनार्थत्वसंभ
वात् स्पष्टं चेदं कल्तक सूत्रे कोस्तुभे इत्याकुः एकवच्चेत्यस्यापि तिमते प्रसंगमते नापस्तुजापस्तुचरादि

वननु धन्यस्तन हि स्वस्तुमंताविन्यत्रतस्य शसंगोक्तिशब्दपरस्य नस्यैकत्वमात्रैकत्वात् उक्तं पृथक्त्वानुकोशा
प्यानस्यसिकेरस्यकलमपिनष्टामदत्र्यवेतिमनिरित्येवपाठः पुरुकः यत्नु परो रमायाम स्तुनरत्यत्र हलदंतादिते
वसिद्धमिति नत्र यद्यपि परत्वाद संज्ञात्वाद्य नन्तुरू षेरू तीत्येवो चितं न यापि हलदंतादिति सूत्रेवकुल ग्रहणं च
त्वासंज्ञाग्रहणं तन्तु रुषेरूती त्यादिच प्रत्याख्येयमित्यभिप्रायः चक्र वह शनि नि षांते न सप्तमीति योग विभाग
त्समासः अत्र तेन समासे पि चक्रवंध शत्येववं थे वेत्यत्र घञंत स्यैव ग्रहणमिति भोक्तिः स्थान्यपि च निषेधो नं
तरस्येति मायान्न तन्तु रुषे कृति रत्यस्यैव अत एव कंठे स्यः कालोपस्येति तिअनेकमन्यपदार्थे इति सूत्रस्य भा
ष्यप्रयोगः संगच्छते नत्र हि स्वमूर्द्धमस्त कादिमलुक् एतेन पावकोस्यपि शिखपाहारे स्य येति व्याख्यातं
प्रपनोहरत्र्याति य पंतं तन्नमनाद त्येत्यर्थः वष्टी चानादरइति षष्ठी देवानामिति नमूर्खत्वं ब्रह्मज्ञानरहित
त्वं तद्दुहिताहि देवानां प्रीतिं जनयंति पात स्तेदेव पशवः पशवद्द्वनियम्यात्वात् हुः देवशब्दो मूर्खवाची मू
र्खेषु मूर्खेष्वपि एवेत्यन्ने वीतिस्त्रै कैयटः आक्रोशेत्यनु वृत्तेरिरिदं लवधं अन शेपादयो वहुव्रीहिषः ऋषि
निशे षाणामेताः संज्ञाः अत एव भाष्ये संज्ञाया मनुपसंख्यानमित्युक्तं शेपो लिंगं शेप शब्दो लादिकप्र
त्ययांतो ऽकारांतोपि वस्याम्नु शातः प्रहृतमशोप मितिदर्शनान् असंज्ञायामुस्वाप्युक्तः अनो देनंदं शुन ति
दीर्घः अनुकमितिवापुत्रेन्यतानिंदायामिति आक्रोशेत्यनु वृत्तेरिदं लत्नेन न्याक्रोशेत्यनुवृत्ता वा रभसा
मर्थ्यादेव विकल्पेसिद्धे न्यतरस्यामिति वाये न चपसाग्राक्रोश इत्यत्र विकल्पकल्पनाय त्रिः असंज्ञात।
विरोध इत्यन्या येनोत्तरत्रैव ननत कल्पनायां अचितत्वात् इति चेन्न आनङ् ऋतो द्वंद्व इत्यत्र पुत्रे इत्यनुवृत्ते पुत्र ग्रहणे
विपरत आनङ् विधाय पद्यनुवृत्ते तो विभाषा रचस्त्रि निअनाक्रोशे ऋद्दे तत्पुरुषे कृति बहुलं पुत्रादी पुत्रे पिति

भाषा प्राप्नोतीति नैष दोषः संबंधमनुवर्तिष्यते षष्ठ्या आक्रोशे पुत्रेऽन्यतरस्यां च षष्ठ्या आक्रोशे इतरतो विद्या
पुत्रेऽन्यतरस्यां च षष्ठ्या आक्रोशे विभाषा स्वसृः पुत्रेऽन्यतरस्यां षष्ठ्या आक्रोशेऽस्यानुवृत्तः पुत्रे ग्रहणमनुवर्तते।
षष्ठ्या इति निवृत्तमित्यनन्तसूत्रस्य भाष्येणात्र क्रोशसंबंधबोधनात् न वेति सूत्रस्य भाष्यं तूदाहरणमात्रं न
परिगणनं अन्यतरस्यां ग्रहणं तु स्पष्टार्थं एतज्ज्ञाप्यप्रामाण्यादाक्रोशविषयेऽप्यातुः पुत्रादौ पूर्वविप्रतिषेधे
नञ्तो योनीतिबाधित्वाऽनेनाविकल्प एवेति बोध्यमित्याहुः पितुः पुत्र इति प्राख्यानानां पितृरूपत्वं इत्यर्थः
नन्वृवेति विद्यायोनिसंबंधवाचकान्यतरपूर्वोत्तरपदकृद् इत्यर्थः तेन होतुःपुत्र इत्यादिसिद्धिः न धनयत्त्रा
हृ होतृधनमिति विभाषा स्वसृपत्योः त्व स्वसृग्रहणं व्यर्थं मातृपितृभ्यां स्वसा मातुःपितुर्भ्यामिति च समा
से षत्वविधानबलेनैवालुग्विकल्पसिद्धेरिति तत्र मातुःपितुर्भ्यामिति सूत्रस्य समास इति निरवत्वापि स्वसं।
गतत्वेनालुक्शास्त्रेण बाध्यमानाभावात् मातुःपितुर्भ्यामिति सांतस्यानुकरणं रेफांतस्यैव आद्ये विसर्गांतस्यै
कदेशविकृतन्यायेन बाधितीति षात्विकसत्वे उपदेश एव षत्वं अंत्येऽभयत्राप्येकदेशविकृतन्यायेनैवेति
बोध्यं मातुःपितुर्भ्यामिति सूत्रेऽनुवृत्तसमासग्रहणं कृत्यमाह असमासे त्विति तथा च पात्विकमपि षत्वं
नेत्यर्थः नित्यस्यालुक्प्राप्तिरेव न व्यवधानात् वस्तुतो मातुरित्यस्य पूर्वान्तवत्वेन मातृशब्दत्वात् नित्यस्यापि
समासग्रहणादेवाभावः इत्यलुक्समासः घरूपाद्य शब्देन तरप्तमपौ प्रत्यये घिनिलेखग्रहणे नोत्तरप
दाधिकारे क्वचित्प्रत्ययग्रहणेन तदंतग्रहणं ज्ञापयिष्यते इति भावः चिलवेलमसन इति धातोश्चेल उ इति प
चादौ पठ्यते टित्वं ङीबर्थं आलभ्यतेनरेति तसिलादिष्विति पुंवत्वं तु न त्रातेश्चेति निषेधात् स्त्रंदरीतरे सादौ
तुपरत्वात् ह्रस्व इति बोध्यं आमलकीतिरहेति नित्यस्त्रीलिंगोऽयं हरितजातिः स्त्रियामिति लिंगानुशासनसूत्रात्

तआम्रइत्यादिप्रयोगदर्शनात्क्वाचित्कमिदमित्यन्ये।देतन्नुशौनककारल्लत्तिष्यफलात्वामलकीविवितिप्रम
रसानुप्रमादः वृत्तिकैयदहरदत्तादिप्रामाण्यात् अमरेत्वामलकीतिपाठइत्यन्येअन्येतुविवीवदरीआमल
क्यादयोभाषितपुंस्काइतिनपदांतसूत्रभाष्याल्लभ्यतेतत्रत्यकैयटस्यतुप्रमादइत्यरुचेसहकुवलीतीत्या
हुः कोशागततुशाद्रूस्यस्यारस्यनामलकीद्विविधातिष्यफलाऽन्याच तत्रतिष्यफलात्रिषुलुक्यस्त्र
न्यानित्यस्त्रीलिंगेतिलभ्यतेइतितन्नभाष्यवृत्तिकोशानांविरोधइत्यपिकेचित् धातो पूर्वसूत्रेश्रुताद
न्नः षोषः सचद्विधेत्याह ऊंगे तिभाषितपुंस्कादित्यपीहनसंबंध्यतेतथानयन्नुदाहरति स्त्रीतरेति
अतएवकत्रयानेन्यस्यल स्मीतरेत्युदाहरएंभाष्येदत्तं ऊगित परेतिविहितेतिघोषः अतएवेषुम
तोपलं स्त्रीएषु मतितरेत्यादौनित्यहूस्वएव अर्थानादेशाविहितानत. गितः एतत्त्रयुवोरनाकाविति
सूत्रेभाष्येस्पष्टं पचगिशब्देनविहितेतितन्नभोगवतितराभोगवतीतराइत्यादौविकल्पानापत्तेः
तत्रहिभोगवद्गौरिमतोः संज्ञायामितिशाद्ङीषः त्वोदित्वान्ङीनू नचविहन्नरेतिवत् हूस्वाभावेतसिला।
दिष्विनिपुंवत्वापत्तिः संज्ञाइत्येपोश्चेतिनिषेधात् निर्मूलमिति नहिस्वयमप्रवर्तमानोपि पूर्ववाधतइ
तिन्यायं अतएवस्यक्षिचसूत्रेसीयुटिवषमावाच्चिरावदिटू विप्रतिषेधेनघानिषीद्रेत्युक्ताएकाचउ
पदेशादितिसूत्रवधादेशआघकदान्ननिपातनंकरिष्यतेवधिषीद्रेत्यत्रनिपातनस्यचंप्रत्ययस्वरोवाधिष्ठा।
तेआर्धधातुकीयासामान्येनभवंतीतिभाष्यंसंगच्छते चिराघड्डावाभावेहितद्रूपं नचैवंवधादेशास्या
तरंगत्वात्स्यसिचसूत्रोक्तविप्रतिषेधानुपपत्तिः तस्यवाचनिकत्वादितिनिरूपयिष्यामः एतेनविप्र
तिषेधसूत्रइतिन्यायाश्रयणेन तदभावेपिनपुंवत्वमित्यपास्तं नचैवं वधितुएसूत्रस्यप्रामिनितरा

शामिनीतरेति भाष्यविरोधः नाकीलिकानां प्रायेण दृष्टिशालूनानां तां तच्छालूनत्वात्सेनाशूरणपोषुन्नित्ति निषे
धात्तू तत्र भाष्यप्रयोगादेव पुंवत्त्वबाधरुत्यपि काश्चित्तु खत्वरत्नौ पुंवद्भावोत्र पत्नीवक्तव्यः श्रेयस्तरा विद्वत्त
रा प्रकर्षयोगात्स्त्रीत्वस्याविवाक्षितत्वात्सिद्धमिति तस्याय माघायुः विदुषीतरेति रूपमसंगतमिति
पुंकते पुंवद्भावोत्रेति पत्नी इति द्रव्यस्वाभावपत्नीरुत्यर्थः तत्पत्नीषु पुंवद्भावप्रयोदाहृत्तं मुचितो न तु द्र।
तिभावः समाधत्ते प्रकर्षयोगादिति एवं च तस्याविवक्षयैव विद्वत्तरे त्यादेः सिद्धौ ह्रस्वविकल्पविधान
सामर्थ्यात्सती दीर्घश्रवणेतरप्रयोत्यातिशायविशिष्टे तु पश्चात्स्त्रीत्वविवक्षा पूर्वे तु सामान्येन पुं
सकं विवक्षित्वा तल्लिङ्गादेव तरप् एवं च स्वार्थद्रव्यलिङ्गानन्तरमेव प्रकर्षकुत्सादिविवक्षेति कुत्सि
तइति स्त्रत्रस्थभाष्येणापि न विरोध इति काचित्तु पुंवद्भावोप्यत्रेत्यपि घटितः पाठः तदाप्यपि संग्र
ह्यदीर्घउपसंख्येयइत्येवतात्पर्यं उत्तरस्य तूक्त एवाशयः एवं चानयारीत्या पटुतरेत्यपि साध्येव पुं
वत्त्वह्रस्वयोर्विप्रतिषेधविचारस्तु पट्वितरेत्यस्यापि साधुत्वाभिप्रायेणेति परं त्वेतद्भाष्ये न दृष्टमित्यलं अ
णंतस्येति अत एव लेखग्रहणस्य उत्तरपदाधिकारे प्रत्ययग्रहणे काचित्तदंता ग्रहणं ज्ञापनाभाष्यो
क्तासंगच्छते तदेवाह ज्ञापकमिति उत्तरपदाधिकार इति उत्तरपदं विशेष्यं कृत्वा तदंतविधिर्नत्यर्थः
एवं चास्मादेव ज्ञापकात् उत्तरपद इत्यस्य तदंशोऽसंबंध इति तात्पर्यं हृदकच्छूने वसिद्धे हृदपले खइ
त्यादिनिवृत्त्यर्थमिदं सौहार्द्यमिति ब्राह्मणादित्वात्प्यञ्ग्रहणं सिध्यते इत्यनुभपदवृद्धिः प्रपंचा।
र्थमिति नच प्रयोगह्रूपमेवेवान्यत्र ह्रूपशब्दएवेति व्यवस्थार्थमस्त्विति वाच्यं पद्भ्यो मासहृदि
त्यस्यैव पर्यापत्तौ तत्र हि प्रभृतिग्रहणं शब्दमात्रग्रहणार्थं मृते नैव सिद्धेऽस्य प्रपंचार्थतायाएवो।

दीर्घ

चित्यात्र पदस्य अत्र सूत्रे उत्तरसूत्रे च पादशब्देन न तदंतग्रहणं पादस्य विशेषणत्वाग्रहणात् अत एव द्विपदपारे
णोपहतं द्विपदपादोपहतं परमपादकाषीत्यादौ न पद्भावः परमपत्काषीति तु परमश्चासौ पत्काषीति विग्र
हे णसमाधेयमिति निषेधेन विधिरित्यत्र भाष्यकैयटयोः उत्तरसूत्रे पदग्रहणान्न पदे नैवं तदंतलुप्तविभक्तिकमि
त्याशयेनाह अहतन इति अयं चात्र ओतो दांतो निपात्यते पादशब्दो हिंस्यां गशिदामित्याद्युदात्तः पद्या
इति विध्यत्यधनुषेति यन् पाद्यमिति पादार्घाभ्यां चेति यत इवेस्त्रत्रे अत्यादिषु आदंगस्यैव करणत्वसंभवे
न तस्यैव ग्रहणं दिहाप्यर्थाधिकारात्सएव गृह्यते तेन हाभ्यां पादाभ्यां न त्वपरमिताभ्यां क्रीतमित्यर्थे पणपा
दमाषेति यति पदादेशो न स्यादेवं चेदं च त्रिपदमेकैकाद्यकेकेइति पर्यादिषु पादः पच्चेति त्वनार्ष पत्काषीति स पञ्जा
त्र ।ता विति णिनिः पद्धितिरिति कर्मण्णिक्तिन् ऋचः अत्रार्णे स्यासंभवाद्वा तुर्यो शावाचि पादशब्दग्रहणम्। य
क इति लोमादिषु पादशब्दपाठाभावात् अनर्थकस्यापि शब्दस्य त्वयेकदेशस्य ग्रहणमिति भावः संख्येक
वचनादिति शास् उदमेघ इति अत्रोदकपर्याय उदशब्दोऽप्यस्ति अत एव प्रसन्नोदं सर इत्यसंज्ञायामपि प्र
युते उदं तु संज्ञायामुदकशब्द निरत्यर्थ एकहलादाविति तु प्रपंचार्थं सारशब्दाभाव ऐयं पुरुषस्य संज्ञा उदयेषमिति
२ स्नेहनेपिषमिति णमुल् उदपिषं इति उ इति उदकं धीयते अत्र त्वर्थेः कर्मण्यधिकरणे चेति किप्रत्ययः समुद्र इति
संज्ञात्वादिति भावः एकहलादौ संज्ञायां तु पूर्वविप्रतिषेधेन नित्यमेवेति न वेति सूत्रे भाष्ये स्पष्टं एकशब्दग्रहणा
सहायवाची सहायश्च तुल्यजातीकः योऽहलेवम्यवच्छिद्यत इति बोध्यं पूरयितव्यं पूरणार्हमं प्योदन इव उद्वयस्सं
प्रक्ताः सक्तवो मंथ इति सुप्सुपेति समासः तृतीयेति योगविभागादित्यन्ये इको ह्रस्वो ग्रामणिपुत्र इत्यादावप्य
यं ह्रस्वः परत्वात् अस्त्रीभाव इति जर्यादिष्वीति निपातत्वेऽव्ययत्वं ननु देतनु कंठपं डितइतिनु कंठादीनां प्रातिप

पा॰शे॰

484

शतिपदिकानामिति यङ्-वङ्-भावित्वाभावेन सिद्धं त्वित्युक्तह्वितिक्रियाविशेषणमित्याप्याहुः ष्यङ्-वङ्-भाविप्रातिपदिकानामि
ति निषेधमाह अभूरिति एकतत्र सूत्रे तत्पुरुषस्थितस्यैकविशेषणत्वाददन्तस्यैकशब्दस्यात्वह्रस्वत्वार्थः तत्र पुंन
त्वे पुंसकयोर्ह्रस्वैति विशेषाभावादाह एकस्याद इति अत्र पद्धत्वं न त्वसर्वनाम्नो इति मात्र इत्यत्रोक्तं रेवतिपुत्र इति।
कस्यचित्संज्ञाकंदस्याह अजन्तीरमिति तिन यावप्रयोग अजन्तीरेण तु होतीति तिलेच अत्रापि संज्ञाकंदसोरि
निवर्त्तनेत्तत्र संज्ञायाश्च संभवान्तु कंदस्येवेदमिति इरत्तिः अत एव गणइति सत्त्रे उभयसंज्ञात्वस्येति भाव्य
प्रयोगः संगच्छते अनुत्तरपदार्थे वचनं बहुलग्रहणस्यैव प्रपंचः ष्यङः संप्रसारणं नुबंधह्रयोच्चारणं पाठादि
टि भोगस्य ष्यङ्गोरहैतिष्यङ् स्वव्याप्त्यर्थं तत्पुरुषपदेन पूर्वपदोपाभावात् उत्तरपदे च पुत्रपत्योर्विशेषण
मतेन कारीषत्तरपदे आत्तिष्यते तत्र पूर्वपदं ष्यङो विशिष्यते न ष्यङ् तद्ग्रहणं ष्यङ्-मात्रस्य पूर्वपदत्वाभावा
त्तु उत्तरपदे च पुत्रपत्योर्विशेषणं तेन कारीषगंध्यापरमपुत्र इत्यत्र नेत्याहुः संप्रसारणस्य इलोप इत्यतो।
दीर्घ इत्यनुवर्त्तते उत्तरपद इत्यधिक्रियते न च कारीषगंधीपुत्र इत्यादो हल इत्येव दीर्घसिद्धो इदं सूत्रं व्यर्थमि
ति वाच्यं संप्रसारणं गाह्निप्रयोरेकत्व एव तत्सूत्र इति हल इत्यस्योत्तरपदानिमित्तकत्वेन उत्तरपदनिमित्तसं
प्रसासिद्धत्वेन तन्सूत्र इत्रे प्रकोमुदेति कुमुदगंधेरपत्यं स्त्रीत्यचेत्तिगोरनार्षयोरित्यण्‌ः ष्यङि यङ् आप्सं
प्रसारणे पूर्वत्वे च दीर्घविधानसामर्थ्यादत्विधित्वे विस्थानिवत्वेन संप्रसारणत्वाद्दीर्घः ह्रस्वोनेति इको
ह्रस्वोङ्या इत्यनेनेति शेषः अनिकारीषइति अत्यादय इति समासे षष्ठीतत्पुरुषः अत्र ष्यङ्न्तेन पूर्वपदमि
ति भावः एवं कारीषगंध्यापुत्रकुलमित्यत्रापि न पुत्र इत्युत्तरपदाभावात् मातन्मादेश इति सच कवभावप
ह्लेएव ननु नद्यन्तश्चेति नित्यं कप् विधानात्तदभावपक्षो दुर्लभो न आह कप्विकल्पश्चेति नच मातन्मेन

च्युत्रार्थमर्हे नेत्यत्र ते न संबुद्धौ सिद्धमातन ननु वादेन संप्रसारणमात्रं विकल्प्यतां किं मातच्त्रादेशनिपातने।
नेति वाच्यं कारीषगंधीमातन इति भाष्योदाहरणे संबुद्धिविषयाभावात् मात्रास्यप्राधान्यद्योतनाभावा।
दित्याहुः बहुव्रीहाविवेति अत एव भाष्ये न हि गृहपदर्शनिसृर्वकमुदाहरणानि दत्तानि चिन्त्वेति मातच् इति
शेषः इहकेचीभातिचिति पाठः असंज्ञायां कंदोर्घ्यवचनं उत्तरपदाहितमपूर्वपदं विशेष्यीकृत्य तदंतविधिम
भिप्रेत्याह तदंतानामिति येन विधिरिति सूत्रे भाष्ये स्फुटमेतत् कर्त्रकरणे इति समासः मा
लभारीति मालां विभर्त्तीति स्तुप्यज्ञानानिति ताच्छील्ये णिनिः हरिपिबतिके चित्त्वं इति कार्येसत्यापरुहिंप+
दित्यलोमुमनुवर्त्तनेसत्यंकारः प्राप्यपकरणं तत्कर्त्रीच प्रशापष्ठेपि डाचं वाधित्वा परत्वात्कारप्यरेमुमेव
भवति अगदंकारो विषप्रतिपल्लड व्याकरणमिति कैयटः हरदत्तौ वैयत्यत्वेति डंताणुकरणं चेति अस्ति
तिनि डंत प्रतिरूपकमव्ययं अस्तुंकारो भ्युपगमः तत्कर्त्रीच धेनुंभव्येति भविष्यंती धेनुरित्यर्थः भव्यगेयेति
भविष्यति काले कर्त्तरि यत् धेनुस्वासी भव्या इति विग्रहः गोत्रमस्य नोऽस्य धेनुं धेनुभव्येति च्च्यादितिप्रयुक्तं तत्रा
र्थत्वान्नमुग्रेतिन व्याख्यायां हरदत्तमपूर्वं सकादित्वात्समासः एतेन विशेषणमिति समासे कृत्यतुल्या
ख्याइतिवा समासे भव्यशब्दस्य पूर्वनिपातः स्यादित्यपास्तं घ्रणत इति घ्रणातिः पूरणार्थे इति कैयटः प्रीणना
र्थे इति इत्येन न्विगुपधलक्षणं कंबाधित्वीकं घ्रणातीति विग्रहे कर्मण्यण्स्यादत आह मूलविभुजादित्वा
दिति घ्रणः इगुपधलक्षणः कः लोकस्य घ्रण इति केचित् इत्यइति कर्मण्येति सूत्रे प्राप्तिवितीविपूक्रुभ्या।
शांतमीपं नहि रुद्रमनभ्याशं हूरं आघ्रमिंध इति कर्मण्युपपदसमासः षष्ठ्यंतेन वा षष्ठीसमासः तिमिंग
लइति मत्स्यविशेषः गिरतेर्मूलविभुजादित्वात्कः अनिविभाषेति लत्वं गिलगिले चेति गिलंगिलतीति गि

प्रा॰ प्रौ॰

485

लः। निमीलनं गिलगिलः इति विग्रहे इदमारब्धं तावेव कृति अत्र प्रकरणे न दंतविधाभावे पिरात्रेः कृतो संभ
न्कृदंते इत्यर्थः यथा प्राचारकिवं ताएवुलादिः संभवति तथाप्याभिन्यक्त पदार्थोपेइति न्यायेन न तस्य हाग्
हृणमित्याहुः धृतिं चेदमत्रैव भाष्ये नित्यमेवेति तथा च प्रकृत सूत्रे भाष्यं तात्रेर प्राप्ते विभाषाप्राप्ते नित्यो विधिः प्रा इति
प्ते नित्य इति पूर्वविप्रतिषेधेनेति भाव इति कैयटः न च रिवतीत्यनुवर्त्य प्राप्ते विभाषात्वमेवास्तु कुतीत्यस्य
वैयर्थ्यापत्तेरिति दिक् तात्रिंमन्य इति स्यात्ममाने इति खश्प्रत्ययः सहस्य सादेशो निपातनाद्युदात्तः अन्य
थोदात्तानुदात्तवतः स्थाने स्वरितः स्यात् इति भाष्यं अत एव सपुत्र इत्यादि बहुव्रीहौ स्वरात्परत्वादसमन्त्रादे
शे पुनः प्रसंगविज्ञानात् पूर्वपदप्रकृति स्वरेणाद्युदात्तत्वं अव्ययीभावे तु परत्वात्सादेशो न ततः समासांतो
दात्तत्वे सति शिष्टत्वादंतोदात्तस्यैव श्रवमिति स्पष्टं माकरे सहयुध्वेति सहे चेति द्वौ निष्ठुपपदसमासः।
समुहूर्तमिति स्थितं तवचने व्ययीभावः न चात्राव्ययीभावे चाकाल इत्येव सिद्धं मुहूर्तादि शब्दानां कालवा
चिनामेव न त्वाति पादकत्वं येऽउपचाराद्भूतेर काल इति निषेधादिति भाष्यकृतः ज्योतिषमिति ज्योतिषदृ
दमित्यर्थः द्वितीये चानु उपाख्यं प्रत्यक्षं तद्भिन्नेऽनुमेये इत्यर्थस्तदाह अनुमेय इति द्वितीयस्याहित्यप्रयो
गीप्रप्रधानोयः सहायः स द्वितीयः इति लोकप्रसिद्धमिति दृरदन्नादयः सराक्षसी के निवहुव्रीहिर्ने घृत
मुचेति कप् योगोविभज्यत इति क्रंदसमपीहैतदर्थमेवोपन्यस्तः अत्र च नित्यं सपत्न्यादिषु इति निर्देशो।
ज्ञापकः अत्र वोपसर्जनस्येत्यतोऽनुवर्त्तनेसा च व्यवस्थितविभाषा तेन समानज्ञातीय इत्याद्यपीति
केचित् अत एव वक्ष्यमाण पक्षांतरेण न फलभेदः सदृशाचवन इति अयं च वृत्तिविषय एव नतु धृतनय
नौस्वपद इति बहुव्रीहिरिति अव्ययार्थे प्रान्यस्याविवक्षणात्राव्ययीभाव इति बोध्यं तेन वोपसर्जनस्ये
ति

त्तिसभावः सज्योतिरिति समानं ज्योतिरस्येति विग्रहः यत्र ज्योतिष्मादित्येन तत्रैवासंज्ञा नर्मसौचं तदस्तमय
र्येनमनुवर्त्तते नत्सज्योतिः इह समानमध्यमध्यमेति प्रतिपदोक्त एव समासो न गृह्यते सद्रूपाणामित्यादि-
निर्देशादिति हरदत्तः ब्रह्मचारीति ब्रतं इति णिनिः ब्रह्मचारिणः समानत्वं ब्रह्मणः समानत्वात् न्यायस्थ्येद्भे
दाहेद्भेदं ब्रतभेदं वापरिकल्प्य समानत्वं तेन समानवेदाध्ययननिमित्तब्रह्मचारीत्यर्थः तदुक्तं समानस्यैव ब्र
ह्मणप्युपपदे व्रतेकर्मणि चरेर्णिनिर्व्रतलोपश्चेति भाष्यव्रतलोपश्चेत्यनेन ब्रह्मशब्दो व्रतलाक्षणिक इत्यु
क्तं भाष्यात् ब्रह्मचारिघटकब्रह्मशब्दे उत्तरपदे परे समानस्य स इति सूत्रार्थः प्रतीयते समानं व्रतं चरतीति ।
तुदाहरणार्थः मूलरीत्या तु समानो ब्रह्मचारीति तीर्थे ये ऽकारेण विवक्षितः अत एव तदादिविधिः ये इति
विवक्षित सप्तमी उत्तरत्र तत्यानिर्णये नार्थाधिकारानुरोधात् तदाह पादार्थावित्यादि प्रत्यय इति व्याख्याना ।
तु बुवस्तुतोऽकाराविवक्षायां न मानं नापि फलं परत्वे प्रत्यये इत्येवोचितं प्रत्यया प्रत्यय परिभाषया व प्रत्यय
एव लभ्यते इत्याहुः प्रत्यय इति व्याख्यानात् तु उत्तरपद इत्यस्यासंबन्धस्य व्याख्यानादेव समानतीर्थे इति सादे
शोप्येकदेशविकृतन्यायेन समानतीर्थशब्दत्वं बोध्यं एवं च सतीर्थ्य इत्यादौ सादेशीय निपातनस्वरं बाधित्वा स ।
तिशिष्टत्वाद्यत्स्वर एवेति ध्येयम् विभाषोदरे अत्र ये इति वर्तनेनेत्यादि प्राप्ता एणात् साच विवक्षित सप्तमी सोद
राद्य इति सूत्रे सोदरादिन्यनुवादसामर्थ्यात् समानोदरे शयित इत्यर्थे यति विवक्षिते सादेशे कृते समानोदरे
शयित इत्यर्थे ऽप्य मो ऽन्ववारितो यो भवति सच सोदर्य इति तदर्थः समानोदरे शयित इत्यस्य तत्रानुवर्त्तनेन सम
र्थविभक्तिरनएवसप्तमी एवं चात्रापि सादेशस्य वापेक्षया सतिशिष्टत्वात् यस्वर एव सादेशाभावे तु समा
नोदरे शयित इति यत समानोदर्यः सोदरोपीति प्रयोगस्तु सह समानमुदरं यस्येति विग्रहे वोपसर्जनस्य +

सा॰ बो॰

486

न्नि सभावे वोध्यः मूल एव यत्र भ्रातास्त सोदर इत्यपि सिद्धं यमं च सभावो ऽलहल एव प्रतिपदोक्त परिभाषया समान
मध्यमध्यमवीराश्चेति विहित समासक समानोदर पूर्वपदोत्तर पदक समुदायमुद्दिश्य विहित यादिप्रत्यय एव
प्रवर्त्तते एवं तीर्थे ये इति पूर्वसूत्रमपि इत्याहुः नन्वेवमपि विभाषाग्रहणं व्यर्थं समानोदरे शयितः सोद
राद्य इति सूत्रद्वयारम्भसामर्थ्यादेव विकल्पे सिद्धे सिद्धे रिति चेन्न आनुमानिकवचनकल्पने लाघवाभावा
दिति सूत्राणां यः ये इति किं समानमुदरमित्यर्थे समानोदरमित्येव यथा स्यात् ये इत्यस्य स्वपरसप्तमीत्वप
क्षे त्यादि गृह्यास्तु चिन्त्या एव उक्तयुक्तेरिति मूलकृदाशयः दृले चेति इदं कोद संसद्दत्तास इति भाष्योदाहर
णात्त क्सोऽप्येवमिति केचित् तन्मतेपि सं दर्भयुक्त्यर्थमत्र लेखः स्वदादि पुंदृशोना लोचने कश्चन समानानस
मयोश्च दृशो क्स इति दृशोः कत्र् क्विन् क्सा दीर्घ इति अदसः आत्वे कृते सुत्वस्यासिद्धत्वात् सवर्णदीर्घ इत्य
र्थः इदं च पूर्वे पररान पि अमूदृगिति अं सेरिति व्याख्यानेप्येवमेव अकारेणाकारस्यापि ग्रहणात् अं
गुलेः संग इति एकदेशविकृतन्याये नांगुलि शब्दत्वान्न मविसर्जनीये त्यधिकारान्न प्राप्तिः अंगुले इति
सत्रु ध्यं तपाठः क्वचित् भीरोः समासे गुनिभीरूभ्यां संगस्थाने उत्तमात्रा वैधधिक्यात् योगविभाग इत्याहुः
व संप्रेचसंगस्थानमित्यादि प यमावोध्यः ज्योतिरायन्ते ग्रस्तु स्तोमो स्तोमः ज्योतिरायुष इत्येव सू त्रैणी
यं स्तोम इति सूत्रे ऽग्ने रित्यनुवृत्त्या ज्योतिरित्यत्र स्तोममात्रानुवृत्त्या च सर्वेष्टसिद्धेरिति चेन्न पुनः स्तोमग्रह
णस्याव्यवहिता व्यवहित साधारण स्तोमग्रहणार्थत्वात् तेन ज्योतिष ष्टोम इत्यत्र षत्वमाक्रोशे इत्य
लुकि षत्वं भवत्येव सूत्रे ज्योतिरायुष इत्युपस्थित षष्ठ्येकवचनातिरिक्त व्यवधानग्रहणेमानाभावादन्य
त्रालुक्यपि न सा च सा इत्यवेहया व यव षष्ठीत ध्यनयम्न तिउदाहरन्ति ज्योतिष स्तोम इति षष्ठ्यन्तो

ति स्तोमस्ति इत्नीति यनुदाहरणमित्यन्ये स्तुवामायां तर्गणस्त्रमाह एतीति नलत्वाद्धेतिच स्तुपामादि
राकृतिगणः तेननिःषेधस्तुः ष्टुः प्रत्ययः साधवः अथ पान्तनीयेति नत्र हृयोपादानं स्पष्टार्थं अषष्ठी
त्यषाःस्पष्टा विकल्पेन त्वबोधनार्थं तेन कारके छे चेति सिद्धमित्यन्ये अन्यदाशीरादयोविशेषणसमासाः
कारके छे चेति स्पष्टं चेदं भाष्ये कष्टदति बहुव्रीहिः उदाहरणे षुकुगतीसमासः इदमेवनन्तु हषणु
हणमस्मिन्नूकारलो ऽपृतिपदोक्त समासस्यापि ग्रहणेन ज्ञापकमित्याहुः जौवेतिक त्वादिभिर्याठक
ज्ञितिनिर्देशात्सिद्धमिदं प्रतीतं चेदं केवलत्रयोनविश्यपुरितिविग्रहप्रदर्शनेन भाष्ये स्वात्तेपार्थक
किंपाठेन समास इतिकैयटः कापथमिति कुगतीति समासः ऋक्पूरिति समासांतः पथाः
संख्येति नपुंसकत्वं अनीवदर्थमिदं इर्वविपृतिषेधादितिभाष्ये ऽदृष्टमपि बुन्मादि ग्रामाणपा रु
सहतं पृषोदराद्यादि पाठेन व्यवस्थावाचीयणो यदिह पदवैपर्यायत्वे स्तदाह षकारणीति उपदि
ष्टमितिभीयेक्तः कर्मणिवाउपदेशाउच्चारणेन स्पकत्रोकात्तार्यांशिष्टेरित्यध्याहारलभ्यंशिष्टा स्पार्थे।
वर्ते निमिनः ष्टुत्व इति भाष्यं पदार्थानतिवृत्तावव्ययीभावः षुमास पदविषयमिदं उत्तरपदाधिकारात्
मेरु कासमस्तानामुणादयो बहुलमित्येव सिद्धेष्ट हंसइनिर्दर्शनार्थं च यथा हंसः सिंहयोरूपणादिन्वा
त्साधुत्वं एवंभूतोन्मादेऽपृषोदरादित्वादित्यर्थः हंतेरचिसगागमे हंसः हसेरचिहिकारसकारयोः स्था
नव्यत्यये सिंहः अस्यतद्धितविषयत्वमपीति सर्वादि सूत्रे कैयटे स्पष्टं नत्वहि षुराणशब्देन नलोप
इत्युक्तं एवं जीवनस्य जलस्य मूतो भाभात्वनं जीमूतः वनशब्दलोपः दूडाशः दौरेफस्योत्वेसवर्णदी
र्घः ज्ञानस्येतिकरणि रुरंचरत्विकैयटाद्यनुरोधेनोक्तं अन्येतु आगंतुना ऽकारेणधीपाठस्त्वार्थं
वार्तिकनिर्देशः अतएवमानः समस्यद्धयाऽनिसिद्ध सर्वस्यउद्वेदरेहलिरूपदवोनोऽस्माननमावपी

दित्यन्वयः । उद्ध्यायतीति विग्रहः कारकपूर्वत्वात् घञ् न चैवं कुतोऽपि कप्रत्ययान्ततामिति भ्रमितव्यं स्पर्धासं
गतेः श्येनस्य हितारसंगतेरित्याहुः । इदं च नदीसंज्ञासूत्रे कौस्तुभे स्पष्टं कृतम् एतेन तत्सूत्रकैयटे च ध्वनितं तत्रे ।
लोभयोरपि निर्देशादिति तत्त्वं ज्ञाकृतीति तेन लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि समो वा हिततत
योर्मांसस्य पचियुड्घञोरित्यपि सिद्धं अत्राद्यचरणत्रयं समपरस्परादिति सूत्रे भाष्ये स्पष्टं मध्यचरणेत्तु मि
ति समो वा हितततयोः भाष्ये न पठ्यते । लुंपेदित्यस्य लुमानुकर्त्रीवाध्यः श्येनमिति कर्मपदं अध्याहार्ये कृत्यां
ने तुन्नरपोरवश्यमः शब्दस्यान्तं लुमान् लुंपेदित्यन्वयः । एवमग्रेपि तुमिति वचस्यर्थे प्रथमा युड्घञोर्यः पच
धातुस्तत्परे मांसस्यान्तं लुंपेदित्यर्थः । स्यार्थः । अवश्यसेव्यः गन्तुकामः गन्तुमनाः सकामनाः सहि
तः संहितः संततः सततः मांसपचनं मांसपाकः । अत्र संयोगान्तलोपाभावोपि पृषोदरादित्वादेव समास
एवेदं तेनावश्यंकर्तव्यमित्यादिसिद्धिः न चावश्यमो व्ययमिति योगविभागान्नित्यमेव समास इति भ्रमि
तव्यं अव्ययार्थाप्राधान्यात् मांसस्येत्यादेः प्राक्तनपदद्वन्द्विति सूत्रेणापि सूपपादत्वमुक्तं प्राक् क्रियासातत्ये
इति निपातनात्सांतत्यमित्यसाध्विति केचित् तत्र मानं चिंत्यं निपातनस्य बाधकत्वे हि संततमित्यपि नस्या
त् निपातनेकदेशानुमतिद्वारा प्राचीनोक्तपरिभाषाया एव ज्ञापितत्वाच्च अनभिधानात् सांतत्यमित्यसा +
ध्विति सर्वादिसूत्रे कैयटः । अत एव भाष्ये निपातनान्मलोपे संततमिति सिध्यतीत्युक्तं ननु सूत्रोच्चारितस
जातीयं सांतत्यमिति न सिध्यतीत्युक्तमित्याहुः । संहितायामपतत्प्रयोजनं यच्चास्ति ङं तस्य अतोदीर्घः स्यादित्यर्थे
केन ह्यचो नास्ति ङीत्यनेन विप्राहिताग्नेः पतिं शकटगोनामित्यत्र संहितायामिव चिदमहित्येति पदकाले न ।
दीर्घ इत्याहुः । अवग्रहेत्वशार्वधर इत्यादौ दीर्घादृश्यतेन पदेवेति नन्त्यफलं एतदधिकारस्थानां शास्त्राणां

स्म =
८

उत्तरपदाधिकारात्समासएवप्रवृत्त्यात्तत्रचसंहितायामित्यत्वादन्यत्रफलमितिबोध्यं कर्णेलक्षणस्येत्य।
स्तूनांस्वामिविशेषसंबंधज्ञापनार्थेदात्राकारादिविह्नं क्रियतेतदिहलक्षणमितिवृत्तिः अतएवविष्टादिपर्यु
दासः संगच्छते इतिहरदत्तः अतएवलंबकर्णइत्यादिसिद्धिः क्विंवतेष्विति उत्तरपदेष्वित्यर्थः णेहेः संप्रसादि
